Tarkasangraha

Benares 1862

॥ अथदीपिकानीलकण्ठीस ॥
॥ हिततर्कसङ्ग्रहः प्रारभ्यते ॥

BIBLIOTHECA REGIA MONACENSIS

Digitized by Google

॥काश्यां विद्याप्रकाशाख्ये मुद्रायन्त्र निकेतने॥
॥मुद्रितोयं शिलावर्णैः श्री मल्लक्ष्मणशर्मणा ॥
श्री काशी विश्वनाथपुरी महल्ले कचौरीगल्लीमथुरानाथपाण्डेजीके मकानमें॥
॥लक्ष्मणप्रसाद चौवेके विद्याप्रकाशयंत्रालयमें दीपिका नीलकण्ठी तर्कसंग्रह॥
॥सहित छापेखानेमुद्रित हुई लिखाल क्ष्मण छाप नेवाला दर्शन जिस्को लेना होय॥
॥उस्को कचौरीगल्ली लक्ष्मणचोवेके दुकान पर मिलैगी॰ सं॰ १९२१ भा॰ सु॰ ८ शुक्र॥

॥ॐश्रीगणेशायनमः वन्देगुरुंशिवंसाम्बन्दक्षिणामूर्तिमव्ययम् यदन्दनेनमन्दोपिविन्देद्रुह्यसमाननाम् १ प्रारिप्सितग्र
न्थस्यनिर्विघ्नपरिसमाप्तयेसमाचरितंमंगलमीश्वरनत्यात्मकंशिष्यशिक्षायैनिवध्नश्चिकीर्षितंप्रतिजानीते विश्वे
श्वरमिति· गिरामगुरुमनिखिलविद्यानामुपदेष्टारम्· इदमपिविश्वेश्वरविशेषणमगिरङ्गुरुमितिपाठेतुसरस्वतींवि
द्यागुरुञ्चप्रणिपत्येत्यर्थोवोध्यः सग्रन्थस्यैतावग्रन्थैरगतार्थत्वंदर्शयति· शिशुहितामिति· तर्कसङ्ग्रहदीपिकांतर्कस·

॥ॐश्रीगणेशायनमः विश्वेश्वरंसाम्बमूर्तिम्प्रणिपत्यगिरंगुरुम् टीकांशिशुहितांकुर्वेतर्कसंग्रहदीपिका
म् १ चिकीर्षितस्यग्रन्थस्याविघ्नपरिसमाप्त्यर्थंशिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकमिष्टदेवता
नमस्कारलक्षणंमंगलंशिष्यशिक्षार्थंनिवध्नंश्चिकीर्षितम्प्रतिजानीते निधायेत्यादिना· न
नुमंगलस्यसमाप्तिसाधनत्वन्नास्तिमंगलेकृतेपिकादंबर्यादौसमाप्त्यदर्शनात् मंगलाभावेपिकि
रणावल्यादौसमाप्तिदर्शनात् अन्वयव्यतिरेकव्यभिचारादितिचेन्न कादम्बर्यादौविघ्नबाहु·
ल्यात्समाप्त्यभावः

ङ्ग्·हार्थप्रकाशिकाम् आचरितस्यमङ्गलस्यतन्निवंधनस्यचफलंदर्शयति· चिकीर्षितेत्यादि
ना· ननुसमाप्तिंप्रतिमंगलस्यकारणतास्याच्चेत्तदातदाचरणंयुज्यतेसैवनसंभवतीत्याशङ्कते· नन्विति· व्यभिचारादिति
अन्वयव्यतिरेकव्यभिचारज्ञानरूपप्रतिवंधकसत्वान्नियतान्वयव्यतिरेकसहचारनिश्चयरूपकारणासंभवेननका
रणत्वनिश्चयइत्यभिसंधिः समाप्त्यभावइति अतोनव्यभिचारइत्यनेनान्वयः विघ्नान्यूनसंख्याकस्यवलवत्तरस्य
वामंगलस्यविघ्ननिरसनद्वारासमाप्तिसाधनत्वेनतादृशमंगलाभावान्नान्वयव्यभिचारइतिभावः ॥ १ ॥ ॥

वहिरेवेति॰ जन्मान्तर एवेत्यर्थः अतः कुत्रचिद्ग्रन्थकर्त्तुर्नास्तिकत्वेपि न क्षतिः अत इति तादृशमङ्गलस्य विघ्नध्वंसद्वा
रासत्त्वान्नव्यतिरेकव्यभिचार इत्यर्थः एवं च कारणत्वं सिध्यतीति भावः परे तु अत उक्तहेतुद्वयान्नव्यभिचारः।
नान्वयव्यतिरेकव्यभिचार इति व्याचख्युः मणिकृतस्तु मङ्गलस्य विघ्नध्वंस एव फलं समाप्तिस्तु स्वसामग्रीवशादेवेत्या
हुः एतत्तत्त्वमस्मदीयचिन्तामणिव्याख्यायामनुसंधेयम् मङ्गलस्य श्रुतिबोधितकर्त्तव्यताकत्वं व्यवस्थापयितुं शंकते
नन्विति॰ अनुमितश्रुतेरेवेति॰ अत्रायमाशयः श्रुतेर्वेदबोधितकर्त्तव्यताकत्वरूपवक्ष्यमाणविधेयकोटिप्रविष्टत्वेपि
तदननुभावेन विधेयत्वमभ्युपगम्यते तच्छ्रुतेरनुमितिपूर्वमसिद्धत्वात् एतेन वह्न्यादिसाध्यकानुमितिविषय नामा।

किरणावल्यादौ ग्रन्थाद्बहिरेव मङ्गलं कृतमतो न व्यभिचारः ननु मङ्गलस्य कर्त्तव्यत्वे किं प्रमाणमिति
चेन्न शिष्टाचारानुमितश्रुतेरेव प्रमाणत्वात् तथा हि मङ्गलं वेदबोधितकर्त्तव्यताकम् अलौकिका
विगीतशिष्टाचारविषयत्वात् दर्शश्राद्धादिवत्॥

॥दायवह्नित्यादिकमनुमिनमितिव्यवहाराभावेन श्रुतावनुमि
तव्यवहारः कथमिति शंका निरस्ता श्रुतौ विधेयताऽभ्युपगमेन तादृशव्यवहारे बाधकाभावात् एवकारोप्यर्थकस्तेन।
मङ्गलं कर्त्तव्यं समाप्तिफलकत्वादित्यनुमानरूपप्रमाणान्तरसत्त्वेपि न क्षतिरिति॰ अन्ये तु॰ स्वबोधितकर्त्तव्यताक
त्वसंबन्धेन श्रुतेरेव साध्यता अग्रिमग्रन्थस्याप्यत्रैव तात्पर्य्यम्॰ एवं च श्रुतेरनुमितित्वोपपत्तिरित्याहुः अलौकि।
केति॰ विधिमन्तरा रागादिप्राप्तभिन्नेत्यर्थः अविगीतेति धर्मशास्त्रानिषिद्धेत्यर्थः शिष्टेति॰ वेदोक्ततत्त्वज्ञानेन।
विहितकर्मकारीत्यर्थः वेदोक्ताहिंसादिकर्त्तरि बौद्धेऽतिव्याप्तिवारणाय तृतीयान्तम् आचारविषयत्वादिति॰ आ॥
चारः कृतिस्तस्या यन्नियामकविषयतासम्बन्धेन हेतुता विवादग्रस्तेति॰ तद्विषयत्वस्य हेतुत्वानुधावनमिति भा॰

पथ्याक्रमं हेतुविशेषणप्रयोजनमाह भोजनादावित्यादिना नन्वलौकिकाविगीताचारविषयत्वस्यैव हेतुनास्तु अशिष्टाचारवि
षयेताद्दशहेतोरसत्वेन व्यभिचारासंभवादित्याशंकामिष्टापत्त्या परिहरति· शिष्टपदमिति· जलताडनादावशिष्टाचारवि·
षयेहेतोरसत्वंस्फुटयति· नकुर्य्यादिति स्वर्गादिफले व्यभिचारवारणायाचारविषयत्वेति विधेयतयाचारविषयत्वा
र्थकमितिसंक्षेपः तर्कपदस्यारोपार्थकत्वभ्रमम्वारयितुन्द्र व्यादिसाधारणतर्कत्वं निर्वक्ति तर्क्यन्त इति· उपादानरू

भोजनादौ व्यभिचारवारणायालौकिकेति· रात्रिश्राद्धादौ व्यभिचारवारणायाविगीतेति· शिष्टपदंस्पष्टार्थम
नकुर्य्यान्निष्फलंकर्मेति जलताडनादेरपि निषिद्धत्वात् तर्क्यन्ते प्रतिपाद्यन्त इति तर्काद्रव्यादिपदार्थास्ते
षांसंग्रहस्संक्षेपेण स्वरूपकथनं क्रियत इत्यर्थः कस्मैप्रयोजनायेत्यतआह सुखबोधायेति सुखेनानाया

ॐश्रीगणेशायनमः निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् बालानांसुखबोधाय क्रिय

सेनबोधः पदार्थानांज्ञानंतस्मादित्यर्थः ननु बहुषु तर्कग्रन्थेषु सत्सु किमर्थमपूर्वग्रन्थः ऽऽते तर्कसंग्रहः १
क्रियत इत्यतआह बालानामिति तेषामतिविस्तृतत्वाद्बालानांबोधोनभवतीत्यर्थः ग्रहणधारणपटुर्बालोन
तुस्तनंधयः किंकृत्वाक्रियत इत्यतआह निधायेति विश्वेश्वरंजगन्नियंतारंसाम्बंशिवंहृदिनितरांस्थापयि
त्वेत्यर्थः पुनःकिंकृत्वाक्रियत इत्यतआह विधायेति गुरूणांवंदनंनमस्कारंकृत्वेत्यर्थः॥ ६ ॥ ६ ॥

पसंग्रहस्यासम्भवादाह संक्षेपेणेति स्वरूपकथनंस्वरूपज्ञानानुकूलः शब्दः एतावताद्रव्यादिपदार्थाविषयाः पदार्थत·
त्वावधारणंप्रयोजनंसम्बन्धश्च प्रतिपाद्यप्रतिपादकभावः पदार्थतत्वावधारणकामोऽधिकारीति अनुबन्धचतुष्टयंप्रे
क्षावत्प्रवृत्त्यंगंसूचितम्· षष्ठी तत्पुरुषभ्रमवारणायाह· सुखेनेति· सुखबोधरूपप्रयोजनस्यान्यतः सिद्धत्वेनैतद्ग्रन्थ

मूले· सप्तपदार्था इति द्रव्यत्वादिरूपायेसप्तधर्मास्तदन्यतमवंतः पदार्था इत्यर्थः अत्रसप्तत्वमपेक्षाबुद्धिविशेषवि
षयत्वरूपम् एवमेवाग्रिमग्रन्थस्यापिपर्यवसानमवसेयम् ननुसामान्यधर्मज्ञानस्यविशेषजिज्ञासाम्प्रतिहेतुत्वात्सा
मान्यलक्षणकथनानन्तरमेवविभागोयुक्तस्तथाचमूलेकथमादौविभागइतिन्यूनतांपरिहरति पदस्येति अर्थअभिधे
यः उक्तव्युत्पत्त्यापदसंबन्ध्यभिधाविषयत्वस्यलाभेपि पदसम्बन्धित्वांशस्याव्यावर्तकत्वादाह अभि
धेयत्वमिति· लक्षणमलभ्यतइतिशेषः तथाचनन्यूनतेतिभावः विभागादेवेति पदार्थत्वावान्तरधर्मपुरस्कारे

पदार्थान्विभजते द्रव्येति पदस्यार्थः पदार्थ इति व्युत्पत्त्या अभिधेयत्वंपदार्थसामान्यलक्षणम् न
नुविभागादेवसप्तत्वेलब्धेसप्तग्रहणंकिमर्थमितिचेन्न· अधिकसंख्याव्यवच्छेदार्थत्वात्· नन्वतिरिक्तः

॥द्रव्यगुणकर्म्मसामान्यविशेषसमवायाभावास्सप्तपदार्थाः॥

पदार्थःप्रमितोनवा नाद्यः प्रमितस्यनिषेधायोगात् नान्त्यः प्रतियोगिप्रमितिंविनानिषेधानुपपत्तेरि
तिचेन्नपदार्थत्वंद्रव्यादिसप्तान्यतमत्वव्याप्यमितिव्यवच्छेदार्थत्वात् ननुसप्तान्यतमत्वंसप्तभिन्नभि
न्नत्वम् एवञ्चसप्तभिन्नस्याप्रसिद्धत्वात्सप्तान्यतमत्वंकथमितिचेन्न द्रव्यादिसप्तान्यतमत्वंद्रव्यादिभेद
सप्तकाभाववत्त्वमितितदर्थत्वात्

णधर्मिप्रतिपादनादेव अधिकसंख्याव्यवच्छेदार्थत्वादिति· तादृशसंख्यानि
षेधसिद्धिफलकत्वादित्यर्थः उद्देश्यविधेयभावस्थलेउद्देश्यतावच्छेदकेविधेयव्याप्यत्वमानमौत्सर्गिकमित्या
शयेनाह पदार्थत्वमिति इतिव्यवच्छेदार्थकत्वादिति एतद्रूपोयोव्यवच्छेदोनिर्णयविशेषस्तदर्थत्वादित्यर्थः
सप्तभिन्नभिन्नत्वमिति द्रव्यादयोयेसप्तपदार्थास्तत्तद्भेदकूटविशिष्टभिन्नत्वमवक्तव्यमित्यर्थः द्रव्यादिभेदसप्त
काभाववत्त्वमिति· द्रव्यादिभेदानांप्रत्येकप्रसिद्धानांसप्तानांकुत्राप्यसत्त्वेनतादृशभेदसप्तकत्वावच्छिन्नाभावस्य

नथापिहेतुसाध्ययोरैक्ये हेतुमत्तानिश्चयकाले साध्यसंशयरूपपक्षताया असत्त्वेन नानुमितिरिति प्राचीनमतेद
नरभेदस्य व्यावर्तकत्वाभावेन तत्रातिव्याप्तिः सिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षतेति सिद्धान्तिमते तु व्यावृत्तेरपि
व्यावर्तकत्वेन लक्ष्यतया तत्र लक्षणसंगमनस्येष्टत्वेन नातिव्याप्तिरित्यावेदयितुं पृथक्कथनमिति ध्येयम् न
नु किमिदं नाम लक्षणलक्षणलक्ष्यतावच्छेदकम् व्यावर्तकत्वम् न तावत्सामान्यतो भेदानुमापकत्वं व्यावृत्त्यभिधे
यत्वादेरपि यत्किञ्चिदुभयत्वाद्यवच्छिन्नप्रतियोगिताकभेदानुमापकत्वेन लक्षणलक्षणलक्ष्यतया तत्रातिव्याप्ति
कथनासंगतेः सर्वेषामपि व्यतिरेकिधर्माणां यत्किञ्चिद्व्यावर्तकतया साधारण्यघटकव्यापकत्वादिवैयर्थ्यापा
ताच्च नापि विशिष्य तत्तद्धर्मावच्छिन्नेतरभेदानुमापकत्वम् तथा सति गोत्वावच्छिन्नेतरभेदानुमापकस्य सा
स्नादिमत्त्वस्य गोत्वसमनियतत्वलक्षणमित्येवरीत्या विशिष्य तल्लक्षणस्य वक्तव्यतया गोत्वादिरूपलक्ष्यता
वच्छेदकतत्तद्धर्मसमनैयत्यस्य गोत्वावच्छिन्नेतरभेदादिरूपव्यावृत्तावसत्त्वेनातिव्याप्तेरसम्भवेऽप्यभिधेयत्वादा
वतिव्याप्तलग्नकतापत्तेर्दुर्वारत्वात् गोत्वादिसमनैयत्यस्य तत्रासत्त्वादिचेन्नैवम् यत्र सास्नादिमत्त्वमङ्गी
कृत्य गोत्वावच्छिन्नेतरभेदानुमापकत्वे साध्ये विशेषव्याप्त्यावन्वयदृष्टान्तालाभेन यत् यद्धर्मसमनियतं तत्तद्ध
र्मावच्छिन्नव्यावर्तकमिति रीत्या सामान्यमुखव्याप्तेरभ्युपगन्तव्यतया तत्र सिद्धसाधनाप्रसिद्धिभ्यामव्याव
र्तकयोर्व्यावृत्त्यभिधेयत्वयोस्तत्तद्धर्मसमनैयत्यरूपप्रकृतहेतुतुल्यहेतोस्सत्त्वेन प्रकृतसाध्यस्य तत्तुल्यस्य वा साध्य
स्यासत्त्वेन व्यभिचारः स्यादतस्तद्दोषवारणाय तत्तद्धर्मावच्छिन्नेतरभेदरूपव्यावृत्तिभिन्नत्वमभिधेयत्वादिभि
न्नत्वञ्च तादृशलक्षणे निवेशनीयमित्यभिप्रायकोऽयं ग्रन्थ इति न पूर्वोक्तदोषावसरः अधिकविचारस्त्वन्य

क्तत्वेपिनक्षतिः एवमग्रेपिबोध्यम् तत्रद्रव्यत्वेसिद्धेसति अतिरिक्तत्वंव्यवस्थापयितुंलक्षणद्रव्येष्वंतर्भावंनिरा॰
चष्टे तमसइत्यादिना· अतएवरूपवत्त्वादेव· नवायाविति· अत्रभावइत्यनुषज्यते सम्बन्धभेदाभिप्रायेण
ह स्पर्शाभावादिति इदञ्चध्वंसप्रागभावाधिकरणेऽत्यन्ताभावोनांगीक्रियतइति प्राचीनमताभिप्रायेणअ
न्यथासमवायावच्छिन्नस्पर्शसामान्याभावस्यदैशिकविशेषणतयावायावप्युत्पत्तिकालावच्छेदेनसत्त्वाद्व्य
भिचरितत्वापत्तेः वस्तुतस्तुनिरवच्छिन्नदैशिकविशेषणतयातस्यहेतुत्वमितिध्येयम् विषमव्याप्तंहेतु
मभिधायसमव्याप्तंतमाह सदागतीति· सदागतिर्विजातीयक्रिया उपसंहरति· तस्मादिति लक्षणेष्वनंतर्भावा
दित्यर्थः तेजोभावरूपत्वादिति प्रौढप्रकाशकतेजोऽभावरूपत्वांगीकारादित्यर्थः अतस्तमस्यत्यपिदेशेतेजः
परमाण्वादिसत्त्वेनतेजस्सामान्याभावासत्त्वेपिनक्षतिः त्र्यणुकादिवारणायप्रौढेतीतिदिक् घटादौव्य
भिचारवारणायालोकासहकृतेति चक्षुर्ग्राह्यत्वञ्चक्षुर्जन्यज्ञानीयलौकिकविषयत्वम् तेनतमश्चा॰
क्षुषेघटादीनामुपनयमर्यादयाभानेपिनक्षतिः विशेषाभावंदृष्टांतयति आलोकाभाववदिति· आलोक
म्विनारूपवत्त्वेनतमोविषयकचाक्षुषभ्रमोदयादाह प्रमायामिति· कारणत्वादिति· अन्यथांधकारस्य
घटादेश्चाक्षुषत्वापत्तेरितिदिक् ननुतमसस्तादृशतेजोभावरूपत्वेनमसिरूपवत्ताप्रतीतिः कर्मवत्ताप्रती
तिश्चकथम् अभावेरूपकर्मणोरभावादित्यतआह तत्रेति तमसोऽतिरिक्तत्वेऽनन्तावयवतत्प्रागभावा
दिकल्पनागौरवमतआवश्यकतादृशतेजोऽभावरूपवत्त्वंसिध्यतीत्यपिबोध्यम् मुक्तिसाधनीभूतपदार्थ
तत्त्वज्ञानंलक्षणज्ञानम्विनानोपपद्यतेऽतआहद्रव्यत्वेति· संयोगादिजनकतावच्छेदकतयाद्रव्यत्वजातिसि

द्धिरितिभावः ननुलक्षणलक्ष्यतावच्छेदकयोरभेदइत्यतआह गुणवत्वमिति द्रव्यसामान्यलक्षणमिति एवञ्चसा
मान्यधर्मो कथनेनन्यूनतापिनेतिभावः दूषणत्रयरहितधर्मस्यैवलक्षणत्वस्यवक्ष्यमाणतयातज्ज्ञानम्विशेषण
णीभूतंदूषणत्रयरहितत्वज्ञानम्विनानसम्भवति दूषणत्रयरहितत्वज्ञानंतुविशिष्यदूषणत्रयज्ञानाधीनम् अ
भावबुद्धिम्प्रतिप्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्यतंत्रत्वादित्याशयेनदूषणत्रयम्प्रदर्शयति· ल
क्ष्यैकदेशावृत्तित्वमिति लक्षणतावच्छेदकत्वाभिमतसम्बन्धे नकिञ्चिल्लक्ष्यावृत्तित्वमित्यर्थःलक्ष्यमात्रेति मात्र
पदंकृत्स्नार्थकम् सम्बन्धविशेषावच्छिन्नलक्ष्यवृत्तित्वसामान्याभावस्फोरकम्· एकशफत्वमिति· नचात्राल

द्रव्यत्वजातिमत्वंगुणवत्वंवाद्रव्यसामान्यलक्षणम् लक्ष्यैकदेशावृत्तित्वमव्याप्तिः यथागोःकपिल
त्वम् अलक्ष्यवृत्तित्वमतिव्याप्तिःयथागोःशृंगित्वम् लक्ष्यमात्रावर्त्तनमसम्भवः यथागोरेकशफ॰
त्वम् एतद्दोषत्रयरहितोधर्मोलक्षणम् सएवासाधारणधर्मइत्युच्यते ॥

॥क्ष्यवृत्तिरूपाति व्याप्तेरपिसत्वा
त्संकरइतिवाच्यम् दुष्टसंकरेपिदोषासंकरादितिदिक् एतद्दूषणत्रयरहितइति उक्तदूषणत्रयाभावविशि॰
ष्टइत्यर्थः नन्वसाधारणधर्मोलक्षणमितिहिसिद्धान्तस्तत्कथंनादृशदूषणत्रयरहितोधर्मइत्यतआह· सएवे
ति इत्युच्यतइति अभियुक्तैरितिशेषः ननुसाधारणत्वस्यलक्ष्यालक्ष्यवृत्तित्वरूपतयातदभावरूपासाधारण
त्वस्याव्याप्त्यादिदोषग्रस्तधर्मेपिसत्वात्कथन्दोषत्रयरहितएवासाधारणधर्मइत्याशंकांपरिजिहीर्षुः असा
॥ धारणत्वमन्यादृशन्निर्वक्ति ॥

लक्ष्यतावच्छेदकसमनियतत्वमिति॰ लक्ष्यतावच्छेदकव्यापकत्वेसतिलक्ष्यतावच्छेदकव्याप्यत्वमित्यर्थः
अव्याप्त्यसंभवग्रस्तयोर्वारणायसत्यन्तम् अतिव्याप्तस्यवारणायविशेष्यम् धर्मपदन्तुलक्षणताघटकसं
बंधेनव्यापकत्वादितात्पर्यग्राहकमितिभावः अत्रेदम्बोध्यम् एतेदोषात्रसाधारणत्वस्यविघटकाः अति
व्याप्तौव्याप्यत्वस्येतरयोश्चव्यापकत्वस्यभंगात् एतेषांदूषकताबीजन्तुलक्षणेनेतरभेदसाधनेऽतिव्याप्तौ
व्यभिचारः इतरयोश्चभागासिद्धिस्वरूपासिद्धीति ननुलक्ष्यतावच्छेदकसमनियतत्वस्यलक्षणलक्षणत्वे
लक्षणस्यव्यावृत्तिरेवप्रयोजनमितिमतेव्यावर्तकस्यैवतादृशलक्षणलक्ष्यतयाव्यावृत्त्यादावतिव्याप्ति
रित्याशंकान्तन्मतानुसारेणैवनिराकरोति॰ व्यावर्तकस्यैवेति॰ इतरभेदानुमितिजनकस्यैवेत्यर्थः इतर

लक्ष्यतावच्छेदकसमनियतत्वमसाधारणधर्मत्वम् व्यावर्तकस्यैवलक्षणत्वेव्यावृत्तावभिधेय
त्वादौचातिव्याप्तिवारणायतद्भिन्नत्वम्धर्मेविशेषणन्देयम्॥ ॥भेदविधेयकानुमितिजनकतावच्छे
दकविषयताविशेषाश्रयस्येतियावत् एतेनव्यवहारिकस्यव्यवच्छेदः लक्षणत्वेगवादिलक्षणत्वेउक्त
लक्षणलक्षस्यलक्ष्यत्वेइतियावत् लक्ष्यत्वइतिपाठेप्ययमेवार्थोबोध्यः व्यावृत्ताविति गवादीनरभेदे
गोत्वादिरूपलक्ष्यतावच्छेदकसमनियतत्वस्याभिधेयत्वप्रमेयत्वादौपदार्थत्वसमनैयत्यस्यचसत्वेनाति
व्याप्तिवारणायव्यावृत्त्यभिधेयत्वादिभिन्नत्वंलक्षणलक्षणेनिवेशनीयमित्यर्थः यद्यपिव्यावृत्तेरपि
व्यवहारिकत्वस्यवक्ष्यमाणतयानेनैवरूपेणसर्वेषांसंग्रहसम्भवात्पृथगभिधानमनुचितम्॰ ॥

वस्तुतस्तु पदार्थत्वं द्रव्यादिसप्तान्यतमत्वव्याप्यमित्यर्थः पदार्थत्वं द्रव्यत्वादिसप्तोपाध्यन्यतमत्वव्याप्यमित्यर्थः
एवञ्च बहुषु पुस्तकेषु सप्तान्यतमत्वाप्रसिद्धिशंकातत्समाधानपरस्य ननु सप्तान्यतमत्वमित्यादिग्रन्थस्यासत्वो-
न्नक्षतिरिति ध्येयम् एवमग्रेपीति· एवंरीत्या द्रव्याणीत्यादावपीत्यर्थः द्रव्यमिति जात्येकवचनं मीमांसकम-

एवमग्रेपि द्रष्टव्यम् द्रव्यं विभजते तत्रेति द्रव्यादिमध्ये द्रव्याणि नवैवेत्यन्वयः कानि तानीत्यत आह पृथि-
वीत्यादि ननु तमसो दशमद्रव्यस्य विद्यमानत्वात्कथं नव द्रव्याणि तथाहि नीलं तमश्चलतीत्यबाधित-
प्रतीतिबलान्नीलरूपाधारतया क्रियाधारतया च द्रव्यत्वं तावत्सिद्धं तच्च न तमसो नाकाशादिपञ्चके-
न्तर्भावः रूपवत्वात् अतएव न वायोः स्पर्शाभावात्सदागतिमत्वाभावाच्च नापि तेजसि भास्वररूपाभा-

॥ तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव ॥

वादुष्णस्पर्शाभावाच्च नापि जले शीतस्पर्शाभावान्नीलरूपाश्रयत्वाच्च नापि पृथिव्यां गंधाभावात्स्पर्श-
रहितत्वाच्च तस्मात्तमो दशमद्रव्यमिति चेन्न तमसस्तेजोऽभावरूपत्वात् तथाहि तमो हि न रूपवद्द्रव्य-
म् आलोकासहकृतचक्षुर्ग्राह्यत्वात् आलोकाभाववत् रूपिद्रव्यचाक्षुषप्रमायामालोकस्य कारणत्वा-
त् तस्मात्प्रौढप्रकाशतेजः सामान्याभावस्तमः तत्र नीलं तमश्चलतीति प्रत्ययो भ्रमः अतो नव द्रव्याणीति
॥ सिद्धम् ॥

तं दूषयितुमुपन्यस्यति नन्वित्यादिना प्रतीतिबलात् प्रात्यक्षिकप्रतीतिबलात् तस्य द्रव्यत्वे तु मा-
नम्प्रमाणयति नीलरूपाधारतयेति समवायेन नीलरूपवत्तयेत्यर्थः तेन कालिकादिसम्बन्धेन तस्यातिप्रस

ननुलक्षणस्यव्यवहारोऽपिप्रयोजनत्वेनरूपेणव्यवहर्त्तव्यत्वानन्विनातद्रूपावच्छिन्नबोधकशब्दरूपव्यवहा
रासम्भवात् एवञ्चव्यावहारिकलक्षणस्यापिलक्ष्यत्वात्तद्भिन्नत्वविशेषणन्नदेयमित्याह व्यवहारस्यापीति·
ननुव्यावृत्तावतिव्याप्तिवारणायतद्भिन्नत्वमावश्यकम् व्यावृत्तेर्व्यवहारिकत्वाभावादितिभ्रमंवारयति·
व्यावृत्तेरपीति· अपिनाऽभिधेयत्वादिपरिग्रहः दृष्टान्तलाभाय नन्वाद्यक्षणावच्छिन्नेद्रव्येगुणवत्त्वस्या
सत्वेपिकालान्तरावच्छिन्नेतत्रतत्सत्वमक्षतमेवञ्चगुणाश्रयत्वंलक्षणंसाधीयइत्यतआह· उत्पन्नवि
नष्टेति याद्दशद्रव्यारम्भकसंयोगजनकक्रियोत्पत्तिस्तृतीयक्षणेऽवयवान्तरेताद्दशसंयोगनाशिकाक्रिया

व्यवहारस्यापिलक्षणप्रयोजनत्वेनदेयम् व्यावृत्तेरपिव्यवहारसाधनत्वात् ननु
गुणवत्त्वन्नद्रव्यलक्षणम् आद्यक्षणेउत्पन्नविनष्टेघटेचाव्याप्तिरितिचेन्न॥ ॥

जातानाद्दशेद्रव्यइत्यर्थः नवीनाःपुनरसमवायिकारणस्यकार्यसहभावेनकारणतामवलम्ब्योत्पन्नवि
नष्टंनाङ्गीकुर्वन्ति गुणादावतिव्याप्तिवारणायगुणसमानाधिकरणेतिजातिविशेषणम् सत्तामादायाति
व्याप्तिवारणायसत्ताभिन्नेति द्रव्यगुणान्यतरत्वमादायातिव्याप्तिवारणायजातीति समवायेनताद्दशधर्मव
त्त्वंतात्पर्यग्राहिकमतः कालिकादिसम्बन्धेनतद्वत्त्वमादायनातिव्याप्तिरितिभावः एवमपिउक्तविवक्षयाऽ
व्याप्तिवारणेपि एकार्थसमवायादेवेति एकस्मिन्नर्थेसमवायेनसत्वादेवेत्यर्थः गुणानंगीकारादिति तथाच
वक्तृत्वेनसमवायघटितसामानाधिकरण्येनैवगुणेगुणवत्ताव्यवहारोपपत्तौ तत्राक्लृप्तगुणवत्त्वकस्यनसम्भ

उद्देशक्रमानुसारेण प्रथमं शरीरलक्षणमाह आत्मन इति आयतनमवच्छेदकं तथा च यादृशं
लक्षणं सम्पन्नं तादृशमाह यदवच्छिन्न इति सुखदुःखान्यतरसाक्षात्कारावच्छेदकमिति यावत् अत्रान्त्या-
वयवित्वे सतीति विशेषणं देयम् नेन पादादीनामवच्छेदकत्वेपि तत्र नातिव्याप्तिः शरीरत्वन्तु न जातिः पृ-
थिवीत्वादिना सङ्करात् तथेन्द्रियत्वन्तु जातिरित्याशयेनाह शब्देतरोद्भूतेति आत्मादावतिव्याप्तिवारणा-
य सत्यन्तम् श्रोत्रेऽव्याप्तिवारणाय शब्देतरेति चक्षुरादौ विशेषगुणस्यानुद्भूतरूपादेस्सत्त्वेनाव्याप्तेर्वार-

प्रकारान्तरेण विभजते पुनरिति आत्मनो भोगायतनं शरीरम् यदवच्छिन्नात्मनि भोगो जायते तत्
द्भोगायतनं शरीरम् सुखदुःखान्यतरसाक्षात्कारो भोगः शब्देतरोद्भूतविशेषगुणाऽनाश्रयत्वे

पुनस्त्रिविधा शरीरेन्द्रियविषयभेदात् शरीरमस्मदादीनाम् ॥ ९ ॥ ६ ॥

॥ स्मृतिज्ञानकारणमनस्संयोगाश्रयत्वमिन्द्रियत्वम् शरीरेन्द्रियभिन्नो विषयः एवञ्च गन्धवच्छ-
रीरं पार्थिवं शरीरम् गन्धवदिन्द्रियं पार्थिवेन्द्रियम् गन्धवान्विषयः पार्थिवविषयः इति न लक्ष-
णं बोध्यम् पार्थिवं शरीरं दर्शयति शरीरमिति॥ रणायोद्भूतेति उद्भूतत्वन्न जातिः शुक्लत्वादिना स-
ङ्करात् नच शुक्लत्वादिव्याप्यनानैवोद्भूतत्वमिति वाच्यम् चाक्षुषादावुद्भूतरूपत्वादिना कारणत्वानुपपत्तेः
किन्तु यच्छुक्लत्वादिव्याप्यमनुद्भूतत्वं नानातत्तदभावकूटवत्त्वमुद्भूतत्वं न च संयोगादावपि तथा शब्देतरो-
द्भूतगुणं संयोगमादायासम्भवस्य वारणाय विशेषेति कालादावतिव्याप्तिवारणाय विशेष्यदलम् तत्रैवाति-
व्याप्तिवारणाय ज्ञानकारणेति प्राचीनमते विषयावयवेन्द्रियावयवसंयोगस्य प्रत्यक्षजनकतया तदाश्र-

लघुत्वादीनामप्रामाणिकत्वेपिलृप्तेष्वंतर्भावोन्याय्यइतिसमाधत्ते॰ लघुत्वस्येति॰ संयोगासमवायिकारणेसंयोगेऽ
तिव्याप्तिवारणायसंयोगभिन्नत्वेसतीति॰ संयोगसमवायिकारणद्रव्येऽतिव्याप्तिवारणायासमवायीति॰ भ्रमणादे
रित्यादिनारेचनस्पन्दनोर्ध्वज्वलनतिर्यग्गमनानांसंग्रहः गमनेऽन्तर्भावादिति नचोत्क्षेपणादीनामपिगम

लघुत्वस्यगुरुत्वाभावरूपत्वात् मृदुत्वकठिनत्वयोरवयवसंयोगविशेषरूपत्वात् कर्मविभजते उ
त्क्षेपणेति संयोगभिन्नत्वेसतिसंयोगासमवायिकारणंकर्मत्वजातिमद्वा ननुभ्रमणादेरप्यतिरि
क्तस्यकर्मणस्सत्वात्पञ्चत्वमनुपपन्नमितिचेन्न भ्रमणादीनामपिगमनेऽन्तर्भावान्नपञ्चत्वविरोः

उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानिपञ्चकर्माणि परमपरंचेतिद्विविधंसामा
न्यम् नित्यद्रव्यवृत्तयोविशेषास्त्वनन्ताएव समवायस्त्वेकएव अभावश्चतुर्विधःप्राग
धः सामान्यम्विभजते परमिति॰ परमधिकदेश॰ भावःप्रध्वंसाभावोऽन्यताभावोन्योभावश्चेति
वृत्तिअपरंन्यूनदेशवृत्तिसामान्यादिचतुष्टयेजातिर्नास्ति विशेषंविभजते नित्येति पृथिव्यादिच
तुष्टयस्यपरमाणवः आकाशादिपञ्चकंनित्यद्रव्याणि समवायस्यभेदोनास्तीत्याह समवायस्त्विति॰
नेऽन्तर्भावोस्त्विति शंकनीयम् स्वतंत्रेच्छस्यनियोगपर्यनुयो॥ ॥अभावंविभजते॰ प्रागभावइति॥ ॥
गानर्हस्यऋषेःसंमतत्वादितिभावः परमित्यादि लक्षणमग्रेमूलकृतैववक्ष्यतइति नन्यूनतेतिवोध्यम् सत्ताया॰
द्रव्यत्वाद्यपेक्षयाधिकदेशवृत्तित्वेनपरत्व मेवघटत्वादीनांन्यूनवृत्तित्वेनापरत्वमेवद्रव्यत्वादीनांसत्तातोऽ

परत्वंघटत्वादितः परत्वमितिविवेकः समवायस्यभेदोनास्तीति नचसमवायस्याभेदेस्पर्शसमवायवतिवायौरू
पवत्ताप्रतीतिःस्यादितिशंक्यम् रूपसमवायसत्वेपिरूपाभावेनतथाप्रतीतेरभावादितिदिक् पृथिवीलक्ष
णस्यप्राथम्येवीजमाह तत्रेति पृथिव्यादिषुमध्यइत्यर्थः गन्धसमवायिकारणतावच्छेदकतयापृथिवीत्व
जातिसिद्धिरितिबोध्यम् नाम्नेति अत्रतृतीयार्थोऽभेदः संकीर्तनपदार्थेप्रतिपादकशब्देऽन्वेति तथाच

तत्रोद्देशक्रमानुसारात्प्रथमंपृथिव्यालक्षणमाह गन्धवतीति नाम्नापदार्थसंकीर्त्तनमुद्देशः उद्देश
क्रमेसर्वत्रेच्छैवनियामिकाननुसुरभ्यसुरभ्यवयवारब्धेद्रव्येपरस्परविरोधेनगन्धानुत्पादनादव्या
प्तिःनचतत्रगन्धप्रतीत्यनुपपत्तिरितिवाच्यम् अवयवगन्धस्यैवतत्रप्रतीतिसम्भवेनचित्रगन्धान

॥ गन्धवतीपृथिवी॥

ङ्गीकारात् किञ्चोत्पन्नविनष्टघटादावव्याप्तिरितिचेन्न गन्धसमानाधिकरणद्रव्यत्वापरजातिमत्व
स्यविवक्षितत्वात् ननुजलादावपिगन्धप्रतीतेरतिव्याप्तिरितिचेन्न अन्वयव्यतिरेकाभ्यांपृथिवीग
न्धस्यैवतत्रभानांगीकारात् ननुतथापिकाल स्यसर्वाधारतयासर्वेषांलक्षणानांकालेऽतिव्याप्तिरि
तिचेन्न सर्वाधारताप्रयोजकसम्बन्धभिन्नसम्बन्धेनलक्षणसत्वाभिमतत्वात्॥ ९ ॥ ॥

वस्तुप्रतिपादकनाममात्रमुद्देशइतिलक्षणम्पर्यवस्यति अत्रघटइति लौकिकपदेऽतिव्याप्तिवारणायवस्तु
परम् लक्षणीयस्यपृथिव्यादेस्सामान्यतः प्रतिपादकेप्रमेयपदेतिव्याप्तिवारणायनामपदंलक्ष्यतावच्छे

देकावच्छिन्नपरमे लक्षणवाक्येनामसत्वादतिव्याप्तिरतोमात्रपदमितिध्येयम् आरब्धेजन्येपरस्परविरोधेने।
ति॰ सुरभिगन्धस्नमसुरभिगन्धस्यासुरभिगन्धंप्रतिसुरभिगन्धस्यप्रतिवन्धकत्वेनेत्यर्थः प्रतीत्यनुपपत्ति।
रिति॰ अतश्चित्रगन्धएवाप्रतिवद्धःस्वीकर्त्तव्यइतिभावः अवयवगन्धस्यैवइति स्वाश्रयसमवेतत्वसंवन्धेने
त्यादि तुष्यतुदुर्जनइतिन्यायेनांगीकृत्याह किंचेति जलत्वादिकमादायातिव्याप्तेर्वारणायगन्धसमानाधिक
रणेति सत्तावारणायद्रव्यत्वापरेति द्रव्यत्वन्यूनवृत्तीत्यर्थकत्वेनद्रव्यत्वव्युदासः गन्धप्रतीत्तेरिति॰ सुरभि
जलमित्यादिप्रतीतेरित्यर्थः पृथिवीगन्धस्यैवेति स्वाश्रयसंयुक्तत्वसंवन्धेनेत्यादि तत्रजलादौयथाश्रुतग्रा

॥ ॥ ॥ पृथिवीम्विभजते साद्विधेति नित्यत्वंध्वंसाप्रतियोगित्वम् ॥ ॥ ॥ ॥

साद्विधानित्याःनित्याच नित्यापरमाणुरूपाअनित्याकार्यरूपा

॥ ॥ ॥ ध्वंसप्रतियोगित्वमनित्यत्वम् ॥ ॥ ॥ ॥ ॥

हीकश्चनशंकते ननुतथापीति॰ अनुगतरूपेणलक्षणताघटकसम्बन्धान्निवेश्यकालादवतिव्याप्तिंवार
यति सर्वाधारतेति वस्तुतस्तुसमवायादीनांसमवायत्वादिनैवसंसर्गतयातेनैवरूपेणतत्तत्सम्वन्धस्यलक्ष
णघटकत्वम्बोध्यम् नित्यपृथिवीत्वादिरूपलक्षणगतनित्यत्वादिप्रदर्शयति नित्यत्वमिति प्रकारान्तरेणे
ति पृथिवीमित्यनुषज्यते अत्रनित्यपृथिव्याःशरीरेन्द्रियभिन्नत्वरूपविषयलक्षणान्तर्गतत्वेनविषया
न्तर्गतत्वमितिपृथिव्यास्त्रिविधत्वमत एवमूलेपुनस्त्रिविधेत्युक्तिसंगच्छतेइतिध्येयम् केचित्तु अनित्यपृ

सामान्यवानिति· सामान्यवत्वंसमवायेनवोध्यम् तेननकालिकसम्बन्धेनतद्वति ध्वंसेऽतिव्याप्तिः गुणइति लक्ष्य
निर्देशोलाघवादाह·गुणत्वजातिमान्वेति यद्यपिलक्षणलक्ष्यतावच्छेदकयोरभेदस्तथापिलक्षणेनेतरभेदे।
साध्येहेतौसाध्यसामानाधिकरण्यनिश्चयेपिहेतुधर्मितावच्छेदकसाध्यनिश्चयस्यानियतत्वाभिप्रायेणेदमि
तिसंक्षेपः एवमग्रेपिवोध्यम् गुणत्वजातिसिद्धिस्तुगुणपदशक्यतावच्छेदकतयेतिगुणदीधितौभट्टाचार्याः
नचैवम्विभुपदशक्यतावच्छेदकतयाविभुत्वमपिजातिःसिध्येदितिवाच्यम् भूतत्वसंकरस्यवाधकस्यसत्वे

गुणसमानाधिकरणसत्ताभिन्नजातिमत्वस्यविवक्षितत्वात् ननु एवमपिएकंरूपंरसात्पृथक्इति
व्यवहाराद्रूपादावतिव्याप्तिरितिचेन्न एकार्थसमवायादेवतादृशव्यवहारोपपत्तौगुणेगुणानंगीका

रूपरसगन्धस्पर्शसंख्यापरिमाण पृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्द
वुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिगुणाः॥ ११ एतन् गुणान्विभजते द्रव्य
कर्मभिन्नत्वेसतिसामान्यवान्गुणःगुणत्वजातिमान्वा लघुत्वमृदुत्वकठिनत्वादीनाम्विद्यमानत्वात्कथ
ऽऽचतुर्विंशतिगुणाइतिचेन्न॥
नतस्यजातित्वासम्भवात् जातित्वाभिमतसंकरस्यैवजातित्ववाधकत्वात्
तथाचोक्तंद्रव्यकिरणावल्यामुदयनाचार्यैः व्यक्तेरभेदस्तुल्यत्वंसंकरोथानवस्थितिः रूपहानिरसम्बन्धोजा
तिवाधकसंग्रहः व्यक्तेरभेदः स्वाश्रयव्यक्तेरैक्यमाकाशत्वादेर्जातित्वेवाधकम् व्यक्तेस्तुल्यत्वञ्च अन्यूनान
तिरिक्तव्यक्तिकत्वम् घटत्वकलशत्वयोर्भिन्नजातित्वे संकरः परस्परात्यंताभावसमानाधिकरणयोर्धर्मयो
रेकत्रसमावेशो भूतत्वमूर्तत्वादेर्जातित्वे अनवस्थाजातित्वादेर्जातित्वेरूपहानिस्वतोव्यावर्तकत्वात्मकरूपस्य
हानिर्विशेषत्वस्यजातित्वे असम्बन्धोऽसमवेतत्वमभाव
त्वादेर्जातित्व इतिसंक्षेपः

यस्येन्द्रियावयवस्य नवीनमते कालादौ रूपाभावप्रत्यक्षे सन्निकर्षघटकतया कारणीभूतचक्षुस्संयोगाश्रयस्य कालादेश्च वारणाय मनःपदम् न चात्मान्यत्वे सतीत्यनेनैवात्मन्यतिव्याप्तिवारणसंभवे किं गुरुतरेण शब्देतरेत्यादिविशेषणेनेति वाच्यम् तथासति च मे मनस्संयोगस्य ज्ञानमात्रं प्रति हेतुत्वमते तुत्रातिव्याप्तेरित्यलमतिविस्तरेण एवञ्चेति तत्रदर्थस्य शरीरादिसामान्यलक्षणत्वे चेत्यर्थः ननु गन्धवत्त्वप्रवेशेनैव तल्लक्षणस्य सा॰

इन्द्रियन्दर्शयति इन्द्रियमिति· गन्धग्राहकमिति प्रयोजनकथनम् घ्राणमिति संज्ञा नासाग्रेत्याश्रयोक्तिः एवमुत्तरत्र ज्ञेयम्· पार्थिवविषयं दर्शयति मृत्पाषाणेति· अपां लक्षणमाह शीतेति· उत्पन्नविनष्टेज

इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति विषयो मृत्पाषाणादिः शीतस्पर्शवत्य आपः ता द्विविधः नित्या अनित्याश्च नित्याः परमाणुरूपाः अनित्याः कार्यरूपाः पुनस्त्रिविधाः शरीरेन्द्रियविषयभेदात् शरीरं वरुणलोके इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति विषयस्सरित्समुद्रादिः

ले ऽव्याप्तिवारणाय शीतस्पर्शसमानाधिकरणद्रव्यत्वापरजातिमत्त्वेतात्पर्य्यम् शीतं शि
लातलमित्यादौ जलसम्बन्धादेव शीतस्पर्शभानमिति नातिव्याप्तिः अन्यत्सर्वं मूर्ववरीत्या व्याख्येयम्॥ ॥

मे जस्से गन्धग्राहकत्वनिवेशनमनुचितम् एवञ्चेन्द्रियङ्गन्धग्राहकमिति मूलमनुपपन्नमित्याशंकाम्परिजिहीर्षुस्तन्मूलन्तत्प्रयोजनकथनपरतया व्याचष्टे गन्धग्राहकमिति उत्तरत्रेन्द्रियं रसग्राहकमित्यादौ शीतस्पर्शसमानाधिकरणेति तत्र विशेषणप्रयोजनं पूर्वोक्तरीत्योत्यम्· जलत्वजातिसिद्धिस्तु स्नेहजनकतावच्छेदकतयेति ध्येयम् अन्यत्सर्वं मूर्ववरीत्येति· नित्यत्वादिकञ्जलशरीरादिलक्षणञ्च गन्धवत्त्वस्थाने शीतस्पर्शवे

मूले अविन्धनमिति· आपएवेन्धनमुद्दीपनंयस्यतदित्यर्थः भुक्तस्येति· भुक्तस्योदनादेः परिणामः परिपाकस्त
त्रहेतुरित्यर्थः आकरजमिति आकरः खनिस्तत्रजातमित्यर्थः सुवर्णस्यतैजसत्वंव्यवस्थापयितुंशंकतेदी
पिकायां नन्विति पार्थिवत्वसाधकंपीतत्वहेतुमुक्त्वातैजसत्वाभावसाधकंहेतुमाह गुरुत्वादिति एतेन

तेजसोलक्षणमाह उष्णस्पर्शवदिति उष्णजलमितिप्रतीतेस्तेजस्सम्बन्धानुविधायित्वान्नातिव्याप्तिः
विषयंविभजते भौममिति ननुसुवर्णस्यपार्थिवस्यपीतत्वाद्गुरुत्वाद्धरिद्रावदितिचेन्न अत्यंतानलसंयोगे
सति घृतादौद्रवत्वनाशादर्शनेनजलमध्यस्थघृतनाशादर्शनेनासतिप्रतिबन्धकेपार्थिवद्रवत्वना
शाग्निसंयोगयोः कार्यकारणभावावधारणात्सुवर्णस्यात्यन्तानलसंयोगेसत्यनुच्छिद्यमानद्रव।-

उष्णस्पर्शवत्तेजस्स्यात्तद्द्विविधंनित्यमनित्यञ्चनित्यंपरमाणुरूपमनित्यंकार्यरूपम्
पुनस्त्रिविधम् शरीरेन्द्रियविषयभेदात् शरीरमादित्यलोके इन्द्रियंरूपग्राहकंचक्षुः
कृष्णताराग्रवर्ति: विषयश्चतुर्विधः भौमदिव्योदर्याकरजभेदात् भौमंवह्न्यादिकम् अविन्ध
नंदिव्यंविद्युदादि भुक्तस्यपरिणामहेतुरौदर्यं आकरजंसुवर्णादि॥ ॥त्वाधिकरणत्वेनपार्थिव
त्वानुपपत्तेः तस्मात्पीतद्रव्यद्रवत्वनाशप्रतिबन्धकतयाद्रवद्रव्यान्तरसिद्धौनैमित्तिकद्रवत्वाधिकरणतयाजल
त्वानुपपत्तेः रूपवत्तयावाय्वादिष्वनन्तर्भावात्तैजसत्वसिद्धिः तस्योष्णस्पर्शभास्वररूपयोरुपष्टम्भकपार्थिवरू
पस्पर्शाभ्यांप्रतिबन्धादनुपलब्धिस्तस्मात्सुवर्णंतैजसमिति· ॥ ॥सुवर्णरूपतेजसिविजातीयपीतरूपंस्वीक्रि
यते पीतंसुवर्णमित्यबाधितप्रत्यक्षप्रतीतिबलात् एवंतैजसत्वस्यनिर्बाधतयापृथिवीत्वंनसिध्यतीतिकस्य।-

तर्क० टी·नी· १०

चिभ्रांतिर्निरस्तागुरुत्वस्याप्रत्यक्षत्वेनतथावक्तुमशक्यत्वादितिदिक्‌ सुवर्णस्यपीतिमगुरुत्वाश्रयत्वेनातिरिक्तत्वं व्यवस्थापयिष्यन्वक्ष्यमाणानुमानेऽप्रयोजकत्वशंकावारणायकार्यकारणभावमनुकूलतर्कम्व्यवस्थापयति अत्यंतानलेति सुवर्णस्येत्यादिअनुमानप्रयोगस्त्वित्थमवसेयः सुवर्णमपार्थिवमसतिप्रतिबन्धकेऽत्यंतानलसंयोगेसत्यनुच्छिद्यमानद्रवत्वाधिकरणत्वाद्यन्नैवंतन्नैवमयथापृथिवीजलमध्यस्थघृतादौव्यभिचारवारणायासतिप्रतिबन्धकेतिअग्निसंयोगासमानाधिकरणंद्रवत्ववतिघृतादौव्यभिचारवारणायात्यंतानल

वायुंलक्षयतिरूपरहितेति आकाशादावतिव्याप्तिवारणायस्पर्शवानिति पृथिव्यादावतिव्याप्तिवारणाय रूपरहितेति ननुप्राणस्यकुत्रान्तर्भावइत्यतआह शरीरेति· सचेति· एकएवप्राणःस्थानभेदात्प्राणापानादिशब्दैर्व्यवह्रियतइत्यर्थः॥

रूपरहितस्पर्शवान्वायुः सद्विविधः नित्योनित्यश्चनित्यः परमाणुरूपः अनित्यःकार्यरूपःपुनस्त्रिविधः शरीरेन्द्रियविषयभेदात् शरीरंवायुलोकेइन्द्रियंस्पर्शग्राहकंत्वक्सर्वशरीरवर्तिविषयोवृक्षादिकम्पनहेतुः शरीरान्तःसंचारीवायुःप्राणःसचैकोप्युपाधिभेदात्प्राणापानादिसंज्ञांलभते॥

॥संयोगेसतीति द्रवद्रव्यान्तरसिद्धाविति अत्यंतानलसंयोगीपीतिमाश्रयः द्रवत्वनाशप्रतिबंधकद्रवद्रव्यान्तरसंयुक्तः अत्यंतानलसंयोगेप्यनुच्छिद्यमानद्रवत्वाधिकरणत्वेसतिगुरुत्वाज्जलमध्यस्थघृतादिवदित्यनुमानेनतत्सिद्धिर्द्रष्टव्याजलादिकमादायानुमानपर्यवसानम्वारयति·नैमित्तिकेति ननूष्मस्पर्शभास्वररूपलब्ध्यभावेनसुवर्णस्यतैजसत्वमनुपपन्नमित्यतआहतस्येति प्रतिबन्धादिति·दोषविधयेत्यादि· शरीरेति·तथाचप्राणस्यविषयेऽन्तर्भावइतिभावः

स्वमतं दर्शयति स्पर्शानुमेय इति अस्येति उपलभ्यमानस्पर्शस्याश्रयः पृथिवी न चेत्यन्वयः चतुष्टयमिति इदमा-
काशादिप्रत्येकभेदसाधनानि प्रायेण सर्वत्रोपलब्धिप्रसंगादिति स्पर्शस्येत्यादिः आकाशादीनां विभुत्वादिति
भावः प्रत्यक्षः बहिरिन्द्रियजन्यप्रत्यक्षविषयः अनुद्भूतस्पर्शाश्रये व्यभिचारवारणाय प्रत्यक्षेति उपाधित्वादिति
तथा च हेतावुपाधिव्यभिचारेण साध्यव्यभिचारोन्नयनसम्भवान्न प्रत्यक्षत्वसिद्धिरिति भावः ननु नादृशाप्रत्यक्षत्वा-

त्वगिन्द्रियेः

स्पर्शानुमेयो वायुः तथा हि योयं वायौ वाति सति अनुष्णाशीतस्पर्शो भासते स स्पर्शः क्वचिदाश्रितः
गुणत्वात् रूपवत् न चास्य पृथिव्याश्रयः उद्भूतस्पर्शवतः पार्थिवस्योद्भूतरूपवत्त्वनियमात् न जल-
तेजसी अनुष्णाशीतत्वात् न विभुचतुष्टयम् सर्वत्रोपलब्धिप्रसंगात् नेमनः परमाणुस्पर्शस्यातीन्द्रि-
यत्वात् तस्माद्यः प्रतीयमानस्पर्शाश्रयः स वायुः ननु वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् घटव-
दिति चेन्न उद्भूतरूपवत्त्वस्योपाधित्वात् यत्र द्रव्यत्वे सति बहिरिन्द्रियप्रत्यक्षत्वं तत्रोद्भूतरूपवत्त्व-
मिति साध्यव्यापकत्वम् पक्षे साधनाव्यापकम् न चैवमतप्तवारिस्थतेजसोपि अप्रत्यक्षत्वापत्तिः
इष्टत्वात् तस्माद्रूपरहितत्वाद्वायुरप्रत्यक्षः ॥

ऽऽस्पर्शगुणादावपि सत्त्वेन तत्रोद्भूतरूपाभावेन साध्याव्याप-
कत्वात्कथं तस्योपाधित्वमित्यत आह यत्रेत्यादिना तथा च पक्षधर्मावच्छिन्नसाध्यव्यापकोऽयमुपाधिरिति
भावः एवं प्रत्यक्षस्पर्शाश्रयस्याप्युद्भूतरूपाभावेन प्रत्यक्षत्वानङ्गीकारे अप्रत्यक्षत्वापत्तिस्तत्रोद्भूतरूपाभा-
वादिति भावः ननु परमाणुपुञ्जस्येव घटादिरूपत्वेनातिरिक्तावयविनोऽसत्त्वात्पृथिव्यादिचतुष्टयस्य नित्य-
त्वानित्यत्वाभ्यां विभागमनुपपन्नमित्याशंकां वारयति ॥ ६ ॥ ६ ॥

त.दी. टी.नी. ११

इदानीमिति पृथिव्यादिचतुष्टयनिरूपणानंतरमित्यर्थः द्व्यणुकस्य नाशादित्यस्य परमाणुद्वयसंयोगनाशादित्या
दिः सर्वत्रेति जन्यद्रव्यसामान्य इत्यर्थः सर्वत्रैकरीतिरेवोचितेति भावः चाक्षुषद्रव्यत्वादिति चाक्षुषत्वे सा

इदानीं कार्यरूपपृथिव्यादिचतुष्टयस्योत्पत्तिविनाशक्रमः कथ्यते ईश्वरस्य चिकीर्षावशात्परमा
णुषु क्रिया जायते ततः परमाणुद्वयसंयोगे सति द्व्यणुकमुत्पद्यते त्रिभिर्द्व्यणुकैस्त्र्यणुकम् एवं चतुर
णुकादिक्रमेण महापृथिवी महत्य आपः महत्तेजः महान्वायुरुत्पद्यते एवमुत्पन्नस्य कार्यद्रव्यस्य
संजिहीर्षावशात्क्रियया परमाणुद्वयविभागे सति द्व्यणुकनाशस्ततस्त्र्यणुकस्य ततश्चतुरणुकस्य
इत्येवं पृथिव्यादिनाशः परमाणावाद्यस्य समवायिकारणस्य नित्यत्वात् असमवायिकारण
नाशाद्व्यणुकनाशः समवायिकारणनाशात्त्र्यणुकनाश इति सम्प्रदायः सर्वत्रासमवायिकारण
नाशाद्द्रव्यनाश इति नवीनाः किम्पुनः परमाणुसद्भावे प्रमाणमुच्यते जालसूर्यमरीचिस्थं
सूक्ष्मतमं यद्दृश्यते तत्सावयवम् चाक्षुषद्रव्यत्वात् घटवत् त्र्यणुकावयवोपि सावयवः महदा
रंभकत्वात् तन्तुवत् यो द्व्यणुकावयवः स एव परमाणुः स च नित्यः कार्यत्वेऽनवस्थाप्रसङ्गात् न
याच मेरुसर्षपयोरपि तुल्यपरिमाणापत्तिः सृष्टिप्रलयसद्भावे किम्प्रमाणमिति चेन्न धाता यथा
पूर्वमकल्पयदिति श्रुतिः प्रमाणम् सर्वकार्यद्रव्यध्वंसोऽवान्तरप्रलयः सर्वभावकार्यध्वंसो महाप्रल
य इति विवेकः

तिद्रव्यत्वादित्यर्थः रूपादावात्मनि च व्यभिचारवारणाय विशेष्यविशेषणे न चेदमप्रयोज
कमिति शंक्यम् चाक्षुषप्रतिकारणस्य महत्वस्य त्रुटावपेक्षितत्तया सावयवत्वं विनावयवसंख्याजन्यस्य

एम: ११

शब्दगुणकमित्यत्र शब्दवदिति वक्तव्ये तथाकथनमाकाशे शब्द एव विशेषगुण इति सूचनाय घटाकाशो मठाकाश इ
त्यादिव्यवहारस्योपाधिकृतत्वेनासाधकत्वादाकाशस्यानेकत्वे प्रमाणन्नेत्याह। भेद इति· एकत्वादिति आकाशस्ये
त्यादिः नन्वेकत्वेप्यविभुत्वमस्त्वत आह सर्वत्रेति सर्वदिगवच्छेदेनेत्यर्थः परिच्छिन्नपरिमाणवत्वमिति य
दि परिच्छिन्नत्वस्यापकर्षाश्रयत्वात्मकतया परमाणोरणुतरत्वेन द्व्यणुकपरिमाणापेक्षया परमाणुपरिमा
णस्यापकृष्टत्वाभावात्परमाणुष्वव्याप्तमिदं लक्षणमित्युच्यते नैतदाप्याह· क्रियावत्वमिति वस्तुतस्तु लाघवमे॰

आकाशं लक्षयति शब्दगुणकमिति ननु किमाकाशं पृथिव्यादिवन्नानानेत्याह· तच्चैकमिति· भेदे प्रमाणा
भावादित्यर्थः एकत्वादेव सर्वत्र शब्दोपलब्धेर्विभुत्वमंगीकर्त्तव्यमित्याह विभ्विति· सर्वमूर्तद्रव्यसंयो

शब्दगुणकमाकाशम् तच्चैकम् विभुर्नित्यञ्च अतीतादिव्यवहारहेतुः कालः सचैको वि

गित्वम्विभुत्वम् मूर्त्तत्वं परिच्छिन्नपरिमाणवत्वं क्रियावत्वम्वा विभुत्वादेवा॑भुर्नित्यश्च॥ ॥
त्मवन्नित्यत्वमित्याह नित्यश्चेति कालं लक्षयति अतीतेति सर्वाधारः कालः सर्वकार्ये निमित्तकारणञ्च

वोत्तरकल्यानुसरणबीजमितिध्येयम् अतीतादिव्यवहारहेतुः काल इति· मूले आदिनाऽनागतादिपरिग्रहः अतीत
त्वम्वर्त्तमानध्वंसप्रतियोगित्वम् वर्तमानत्वमिह शब्दप्रयोगाधिकरणकालवृत्तित्वम् भविष्यत्वं च वर्तमानप्राग
भावप्रतियोगित्वम् अत्र सर्वत्र कालस्य घटकतया शब्दप्रयोगरूपातीतादिव्यवहारहेतुत्वन्तस्येतिध्येयम्॰
नचतादृशव्यवहारस्य सूर्यपरिस्पन्दादिरूपोपाधिमादायापि सम्भवतीति वाच्यम् अनुगतव्यवहारस्यानु
गतविषयम्विना सम्भवेनातिरिक्तकालस्वीकारादिति दिक् सर्वाधार इति कालिकसम्बन्धेनेत्यादि अत्र भित्त

कालिकयोराधाराधेयभावविरहात्क्रियादेः सर्वाधार
त्वं कैवनावतातीति भावः ॥

प्राच्यादिव्यवहारहेतुरितिमूले॰ आदिनाप्रतीच्यादिपरिग्रहः उदयाचलसन्निहितमूर्त्तावच्छिन्नादिक्प्राची तेष्व॰
वहितमूर्त्तावच्छिन्नाचप्रतीचीमेरुसन्निहितमूर्त्तावच्छिन्नादिगुदीचीनद्व्यवहितमूर्त्तावच्छिन्नानुदक्षिणा ज्ञा
नाधिकरणमिति समवायेनज्ञानवदित्यर्थः तत्रतयोर्मध्येदीपिकायाम् नित्यज्ञानाधिकरणत्वमिति नचनित्यम्विज्ञा
नमानन्दम्ब्रह्मेति श्रुत्यादिविरोधइतिवाच्यम् आनंदपदस्यानन्दवदर्थकतायाइवविज्ञानपदस्यापिविज्ञानवद
र्थकतास्वीकारेणाविरोधात् नचानन्दस्येवताद्दृशार्थकत्वमसिद्धमितिवाच्यम् अशीआद्यजित्यजनत्वांगीकारेण॰

दिशोलक्षणमाह प्राचीति दिगपिकार्यमात्रेनिमित्तकारणम् आत्मनोलक्षणमाह ज्ञानेति आत्मानम्वि
भजते सद्विविधइति परमात्मनोलक्षणमाह तत्रेति नित्यज्ञानाधिकरणत्वमीश्वरत्वम् नन्वीश्वरस्यस

प्राच्यादिव्यवहारहेतुर्दिक् साचैकाविभ्वीनित्याच ज्ञानाधिकरणमात्मासद्विविधः परमात्मा
जीवात्माचेति तत्रेश्वरस्सर्वज्ञः परमात्माएकएव॥ ११ द्वावेप्रमाणं किंनतावत्प्रत्यक्षं तद्धिवात्यमाभ्य

न्तरम्वानाद्यः अरूपिद्रव्यत्वात् नान्त्यःजीवात्मसुखादिव्यतिरिक्तत्वात् नाप्यनुमानंलिंगाभावादितिचेन्न
क्षित्यंकुरादिकंकर्तृजन्यंकार्यत्वात् घटवदित्यनुमानस्यप्रमाणत्वात्॥ ८ तादृशार्थसिद्धेः अन्यथानपुंसकत्वा

नुपपत्तेः अत्रानन्दोभारापगमेसुखीसम्वृत्तोहमितिवद्दुःखाभावेउपचर्यते नवीनास्तुनित्यमीश्वरस्यांगीकुर्वन्तीत्य
लमधिकजल्पनेन अरूपिद्रव्यत्वादितिवाह्यप्रत्यक्षम्प्रत्युद्भूतरूपस्यहेतुत्वादितिभावः आत्मसुखादिव्यतिरिक्ते रामः १२
ति विजातीयात्ममनस्संयोगादिरूपस्यमानसप्रत्यक्षहेतोरीश्वरेऽभावादितिभावः प्रमाणत्वादिति नचेदमप्रयो
जकमितिशंक्यम् कार्यत्वावच्छिन्नम्प्रतिकृतित्वावच्छिन्नस्यहेतुत्वेनाप्रयोजकत्वाभावादितिदिक्॥ ९ ॥

उपादानगोचरेति यद्यपि कर्तृत्वं कृतिमत्त्वमेव सम्भवति तथाप्यपरोक्षज्ञानादेश्चिकीर्षादिकस्यापि कारणत्वप्रदर्श
नाय तत्त्योक्तिरित्यवध्येयम् सर्वविदिति विद्धात्वर्थो विशेषरूपेण ज्ञानं लक्षणमाहेति स्वरूपमाहेत्यर्थः मूले
जीवः प्रतिशरीरं भिन्न इति नचावयवोपचयापचयाभ्यान्तत्त्वैत्रादिशरीराणामपि भिन्नत्वेपि जीवभेदाभावादिदमसं
गतमेवं कायव्यूहस्थलेपीति वाच्यम् समानकालिकयोगजधर्माजन्यशरीरभेदेन जीवभेदस्यैव विवक्षित
त्वेनादोषात् एवञ्चैतच्छरीरावच्छिन्नभोगवान् समानकालिकयोगाद्यजन्यशरीरावच्छिन्नभोगवद्भिन्न इति शे

उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं कर्तृत्वम् उपादानं समवायिकारणम् सकलपरमा
ण्वादिसूक्ष्मदर्शित्वात्सर्वज्ञत्वम् यस्सर्वज्ञस्स सर्वविदित्यागमोपि प्रमाणम् जीवलक्षणमाह जीवेति सु
खादिकं जीवलक्षणम् ननु मनुष्योहं ब्राह्मणोहमित्यादौ सर्वत्राहम्प्रत्यये शरीरस्यैव विषयत्वाच्छरीर
मेवात्मेति चेन्न शरीरस्य करपादादिनाशे शरीरनाशादात्मनोपि नाशापत्तेः नापीन्द्रियाणामात्मत्वं यो

॥ जीवात्मा प्रतिशरीरम्भिन्नो विभुर्नित्यश्च ॥

हं घटमद्राक्षं सोहमिदानीं स्पृशामीत्यनुसन्धानाभावप्रसङ्गात् अन्यानुभूतेऽन्यस्यानुसन्धानायो
गात् तस्मात् देहेन्द्रियव्यतिरिक्तो जीवः सुखादिवैचित्र्यात्प्रतिशरीरम्भिन्नः सचन परमाणुपरिमाणः
शरीरव्यापिसुखाद्यनुपलब्धिप्रसङ्गात् नमध्यमपरिमाणः तथा सत्यनित्यत्वप्रसङ्गे कृतहानाकृ
ताभ्यागमप्रसङ्गात् तस्मान्नित्यो विभुर्जीवः॥ ॥त्या प्रतिशरीरजीवभेदसाध्यकमिति लम् शरीरस्यैवेति अन्य
था मनुष्यत्वादीनां शरीरधर्मत्वेन तथा प्रत्ययस्यैवासङ्गतिरित्यभिमानः नाशापत्तेरिति समवायिकारणनाशस्यद्र
व्यनाशकत्वादिति भावः योहमिति भूतकालिकदर्शनवतिवर्तमानकालिकस्पार्शनवत्त्वं प्रत्याय्यते तच्च भवता

म्मतेनसम्भवति चाक्षुषस्पार्शनवत्तोभेदादितिभावः अनुसन्धानायोगादिति अन्यथाचैत्रेणानुभूतस्यवस्तुनोमैत्रेणस्मरणाप
त्तेरितिभावः ननुसर्वशरीरावच्छेदेनात्मनिसुखादिसाक्षात्कारोपरोनपेसर्वव्यापित्वमात्मनोस्तुतथापिविभुत्वाङ्गीका
रेप्रयोजनाभावइत्याशयेनशङ्कते नमध्यमेति अनित्यत्वप्रसङ्गेनेति यन्मध्यमपरिमाणन्तदनित्यमितिव्याप्तेरिति
भावः कृतेति कृतस्ययागादिनासम्पादितस्यधर्मादेर्हानंनाशः अकृतस्याभ्यागमः प्राप्तिस्तत्प्रसङ्गादित्यर्थः कर्तुरा

मनसोलक्षणमाह सुखेति स्पर्शरहितत्वेसतिक्रियावत्वम्मनसोलक्षणम् मनोविभजते तच्चेति·
एकैकम्मन एकैकस्यात्मन इत्यात्मनामनेकत्वान्मनसोप्यनेकत्वमित्यर्थः अणुरूपमिति मध्य
मपरिमाणवत्वेऽनित्यत्वप्रसङ्गादित्यर्थः ननुमनोविभुस्पर्शरहितद्रव्यत्वात् आकाशादिवदितिचेन्न

सुखाद्युपलब्धिसाधनमिन्द्रियम्मनः तच्चप्रत्यात्मनियतत्वादनन्तम् अणुरूपन्नित्यञ्च

मनसोविभुत्वेआत्ममनस्संयोगस्यासमवायिकारणस्याभावात् ज्ञानानुत्पत्तिप्रसङ्गात् नचविभुद्वय
संयोगोस्त्विति वाच्यम् तत्संयोगस्यनित्यत्वेनसुषुप्त्यभावप्रसङ्गात् पुरीततिव्यतिरिक्तप्रदेशात्ममनः
संयोगस्यसर्वदाविद्यमानत्वात् अणुत्वेतुयदामनः पुरीततिनाड्याम्प्रविशतितदासुषुप्तिः यदानिस्सर
\\ तितदाज्ञानोत्पत्तिरित्यणुत्वसिद्धिः
त्मनउत्तरजन्मन्यसत्वात् अकर्तुश्चसत्वादितिभावः ननुजीवस्याणुत्वमेवास्तांता
वतानोक्तदोषः सूक्ष्मस्यदीपस्यसर्वगृहावच्छेदेनेवाणुरूपस्यापिजीवस्यसर्वशरीरावच्छेदेनप्रभाप्रसरणाङ्गीकारा
दितिचेन्न तथासतिकायव्यूहस्थलेसुखादिसाक्षात्कारानुत्पत्तेरितिदिक् मनस्संयोगाद्यतिव्याप्तिवारकेन्द्रियत्व
घटितमूलोक्तलक्षणापेक्षयालघुलक्षणमाह स्पर्शरहितत्वे सतीति एकैकम्मनइतिसर्वात्मनामेकस्यमनसः

Digitized by Google

स्वीकारे एकस्य ज्ञानद्वयस्यापरस्य तदनुत्पत्तिः तस्याणुत्वेन सकलेन्द्रियैरेकदा संयोगाभावादिति भावः विभ्विति न
याचतस्य परममहत्परिमाणवत्वेन पूर्वोक्तदोषानवकाश इति भावः अभावादिति विभुद्वयसंयोगानभ्युपगमा
दिति भावः ज्ञानानुत्पत्तीति भावकार्यस्यासमवायिकारणजन्यत्वनियमादिति भावः विभुद्वयसंयोगोऽस्त्विति न
स्य नित्यत्वेनासमवायिकारणक्रियाद्यसत्वेपि न क्षतिरिति भावः ॥ ॐ ॥ मात्रपदमिति यद्यपि चक्षुर्मात्रग्राह्यत्व
ञ्चक्षुरितरग्राह्यत्वे सति चक्षुर्ग्राह्यत्वं तदिति ध्येयम् गुणपदमिति नचैवमपि प्रभाभित्तिसंयोगेऽतिव्याप्तिरिति वा

रूपं लक्षयति चक्षुरिति संख्यादावतिव्याप्तिवारणाय मात्रपदम् रूपत्वेऽतिव्याप्तिवारणाय गुणपदम्

चक्षुर्मात्रग्राह्यो गुणो रूपम् तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात्सप्तविधम् पृ
थिवीजलतेजोवृत्तिः तत्र पृथिव्यां सप्तविधम् अभास्वरं शुक्लं जले शुक्लं भास्वरं तेजसि

नन्वव्याप्यवृत्तिनीलादिसमुदाय एव चित्ररूपमिति चेन्न रूपस्याव्याप्यवृत्तित्वनियमात् ननु चित्रप
टेऽवयवरूपस्य प्रतीतिरिति चेन्न रूपरहितत्वेन पटस्याप्रत्यक्षत्वप्रसङ्गात् ॥ ॥ व्यम् त्वगग्राह्यचक्षु

र्ग्राह्य गुणविभाजकधर्मवत्वे पर्यवसानेनादोषात् अत एव न परमाणुरूपादावव्याप्तिरिति ध्येयम् समुदाय एवेति
एवकारेणातिरिक्तचित्ररूपव्यवच्छेदः व्याप्यवृत्तित्वेति दैशिकव्याप्यवृत्तित्वेत्यर्थः इदमुपलक्षणम् एकैक
चित्ररूपस्थलेनेकरूपाणामेकैकतत्प्रागभावादिस्थले चानेकप्रागभावादीनां कल्पनेनानेकरूपेषु चित्रइत्या
कारकप्रतीतिविषयत्वकल्पनेन च गौरवमिति रूपरहितत्वेनेति समवायेनेत्यादिः प्रसङ्गादिति द्र
॥ व्यचाक्षुषमतिसमवायेनैव रूपस्य कारणत्वादिति भावः ॥

रूपवत्समवेतत्वंस्वाश्रयसमवेतत्वसम्बन्धेनरूपम् प्रत्यक्षत्वप्रयोजकमिति प्रत्यक्षविषयत्वप्रयोजकमस्त्वित्यर्थः
गौरवादिति साक्षात्सम्बन्धेनकारणत्वापेक्षयागौरवादित्यर्थः चित्रावयवकपालैरारब्धघटस्यचाक्षुषत्वानुरोधेन
स्वसमवायिसमवेतसमवेतत्वसम्बन्धेनैवरूपस्यतत्प्रयोजकत्वमङ्गीकर्त्तव्यम् एवञ्चत्रुटेश्चाक्षुषत्वानुपपत्ति

नचरूपवत्समवेतत्वम्प्रत्यक्षत्वप्रयोजकम् गौरवात् तस्मात्पटस्यप्रत्यक्षत्वानुपपत्याचित्ररूप-
सिद्धिः रसंलक्षयति रसनेति रसत्वेऽतिव्याप्तिवारणायगुणपदम् तस्याश्रयमाह पृथिवीति श्रा

रसनाग्राह्योगुणोरसः सचमधुराम्ललवणकटुकाषायतिक्तभेदात्षड्विधः पृथिवीजल
वृत्तिः पृथिव्यांषड्विधःजलेमधुरएव घ्राणग्राह्योगुणोगन्धःसचद्विविधःसुरभिरसुरभि
श्चपृथिवीमात्रवृत्तिः त्वगिन्द्रियमात्रग्राह्योगुणःस्पर्शःसत्रिविधः शीतोष्णानुष्णाशीतभेदा
त् पृथिवीजलतेजोवायुवृत्तिः तत्रशीतोजले उष्णस्तेजसि अनुष्णाशीतःपृथिवीवाय्वोः।

श्रयम्विभज्यदर्शयति पृथिव्यामिति गन्धंलक्षयति घ्राणेति गन्धत्वे ऽतिव्याप्तिवारणायगुणपदम्
स्पर्शंलक्षयति त्वगिति स्पर्शत्वेऽतिव्याप्तिवारणायगुणपदम् संयोगादावतिव्याप्तिवारणायमात्रपदम्

रपि द्रष्टव्या प्रत्यक्षत्वानुपपत्येति एतेनचित्ररूपवच्चित्ररसोपिसिध्येदितिशङ्कानिरस्ता द्रव्यलौकिकरासन
स्याप्रसिध्यात्तदनुपपत्त्यभावेनचित्ररसासिद्धेरितिसंक्षेपः रसत्वइति रसनाग्राह्यगुणविभाजकोपाधिमत्वेता
त्पर्य्यम् एवङ्गन्धलक्षणेपि मात्रपदमिति चक्षुरग्राह्यत्वगिन्द्रियग्राह्य गुणविभाजकोपाधिमत्वमितितुप

परमाणुष्वेवपाकइतिः परमाणुष्वेवपूर्वरूपपरावृत्त्यादिजनकतेजस्संयोगइत्यर्थः एवकारव्यवच्छेद्यंस्फुटयति
नद्व्यणुकादाविति आमपाकनिक्षिप्तेघटेइति घटेआमपाकनिक्षिप्तेसतिश्यामघटनाशेपरमाणुषुरूपान्तरो-
त्पत्तावित्यन्वयः तत्र परमाणुरूपेअवयविनिपाकानङ्गीकारादाह कारणरूपमिति परमाणुष्वेवपाकंवदतामेव

पाकजमिति पाकस्तेजःसंयोगः तेनपूर्वरूपंनश्यतिरूपान्तरमुत्पद्यतइत्यर्थः अत्रपरमाणुष्वेव
पाकोनद्व्यणुकादौ आमपाकनिक्षिप्तेघटेपरमाणुषुरूपान्तरोत्पत्तौश्यामघटनाशेपुनर्द्व्यणुकादि
क्रमेणरक्तघटोत्पत्तिः तत्रपरमाणवस्समवायिकारणम् तेजस्संयोगोऽसमवायिकारणम् अदृष्टा
दिकन्निमित्तकारणम् द्व्यणुकादिरूपेकारणरूपमसमवायिकारणमितिपीलुपाकवादिनः पूर्वघ

रूपादिचतुष्टयम्पृथिव्याम्पाकजमनित्यञ्च अन्यत्रापाकजन्नित्यमनित्यञ्च नित्यग
तन्नित्यम् अनित्यगतमनित्यम् ॥ ॥ टनाशाग्निनैवावयविन्यवयवेषुपरमाणुपर्यन्तेषुयुगप
द्रूपान्तरोत्पत्तिरितिपिठरपाकवादिनोनैयायिकाः अतएवपार्थिवपरमाणुषुरूपादिकमनित्यमि
त्यर्थः अन्यत्रजलादावित्यर्थः नित्यमिति परमाणुगतमित्यर्थः अनित्यगतमिति द्व्यणुकादिनिष्ठ
मित्यर्थः रूपादिचतुष्टयमुद्भूतम्प्रत्यक्षम् अनुद्भूतमप्रत्यक्षम् उद्भूतत्वम्प्रत्यक्षत्वप्रयोजकोधर्मस्त
शेषिकाणामयमाशयः वेगातिशयवतातेजसापरमाणूनामभिघातसंयोगेसत्यव ॥ दभावोनुद्भूतत्वम् ॥
श्यन्तेषुक्रियाजायतेततोविभागस्ततआरम्भकसंयोगनाशस्ततोवयवावयविनाशस्ततः स्वतन्त्रेषुपरमाणुषु

रूपान्तरोत्पत्तौ पुनरदृष्टादिघटितसामग्रीवशात्परमाणुषु क्रियाविभागादिक्रमेण यथास्थितमहावयविपर्य
न्तमुत्पत्तिरिति अवयविन्यपि पाकं वदतां नैयायिकानां न्वयमाशयः तेजसा परमाणूनामभिघातसंयो
गे पितस्य नियमत आरम्भकसंयोगप्रतिद्वन्द्वि विभागजनकक्रियाजनकत्वे मानाभावेनावयविन्यपि या
कस्वीकार उचितः अत एव सोयं घट इति प्रत्यभिज्ञा संगच्छते· अनन्तावयविनाशाद्यकल्पनेन लाघ
वश्चेति नचावयविरूपमप्रतिस्त्रवयवरूपस्य तन्नाशं प्रत्याश्रयनाशस्य हेतुतायां व्यभिचार इति वा

संख्यां लक्षयति· एकेति· ॥ ॥ ॥ ॥ ॥

एकत्वादिव्यवहारहेतुः संख्या नवद्रव्यवृत्तिः एकत्वादिपरार्द्धपर्यन्ता एकत्वन्नित्य
मनित्यञ्च नित्यगतन्नित्यम् · अनित्यगतमनित्यम् द्वित्वादिकन्तु सर्वत्रानित्यमेव·

॥ ॥ ॥ ॥ ॥ ॥

म· कार्यतावच्छेदककोटौ वैजात्यनिवेशनेव्यभिचारवारणसम्भवात् जलादावित्यर्थ इति यद्यपि रू
पादिचतुष्टयस्य जलादौ वाधितन्तथापि यथायोग्यमन्वयेतात्पर्य्यम् उद्भूतमिति उद्भूतत्वं जातिः नच
शुक्लत्वादिना सांकर्यं गुणसाङ्कर्य्ये न्तवाधकमिति नवीनमताभिप्रायकोयं ग्रन्थ इति न दोषः केचित्तु शुक्लत्वा
दिव्याप्यमनुद्भूतत्वन्नानातत्तदभावकूटवत्वमेवोद्भूतत्वमित्याहुः मूले द्वित्वादिकन्तु सर्वत्रानित्यमेवेति· हेतुभू
तापेक्षाबुद्धिनाशेन द्वित्वनाशादिति भावः परिमाणस्य गुणिबोधकशब्दैर्विभजनमसङ्गतमतोदीपिकाया

असाधारणेतीति कालादेस्साधारणकारणत्वेन तत्र नातिव्याप्तिरितिभावः स्वात्यन्ताभावेति· स्वप्रतियोगित्वस्वसामाना
धिकरण्योभयसम्बन्धेनाभाववत्वमितितुनिष्कर्षः संयोगनाशकइतीति· नचतथापिसंयोगेतिव्याप्तिस्तस्यप्रतियो·

परिमाणंलक्षयति मानेति परिमाणंविभजते तच्चेति· भावप्रधानोनिर्देशः अणुत्वंमहत्वन्दीर्घत्वंह्रस्व·
त्वञ्चेत्यर्थः पृथक्त्वंलक्षयति· पृथगिति· इदमस्मात्पृथगितिव्यवहारकारणमित्यर्थः संयोगंलक्षयति
संयुक्तेति· इमौसंयुक्ताविितिव्यवहारहेतुरित्यर्थः संख्यादिलक्षणेसर्वत्रदिक्कालादावतिव्याप्तिवार·
णायासाधारणेति· संयोगोद्विविधः कर्मजः संयोगजश्च आद्योहस्तक्रियया पुस्तकसंयोगः द्वितीयो

मानव्यवहारासाधारणङ्कारणम्परिमाणम् नवद्रव्यवृत्तिः तच्चतुर्विधम् अणुमहद्दी
र्घह्रस्वञ्चेति· पृथग्व्यवहारासाधारणंकारणम्पृथक्त्वम् सर्वद्रव्यवृत्तिः संयुक्तव्यवहारहेतु
र्गुणस्संयोगः सर्वद्रव्यवृत्तिः संयोगनाशकोगुणोविभागः सर्वद्रव्यवृत्तिः ॥ ६ ॥

हस्तपुस्तकसंयोगात्कायपुस्तकसंयोगः अव्याप्यवृत्तिस्संयोगः स्वात्यन्ताभावसमानाधिकरणत्वमव्याप्य·
वृत्तित्वम् विभागंलक्षयति संयोगेति कालादावतिव्याप्तिवारणायगुणइति रूपादावतिव्याप्तिवारणाय
संयोगनाशकइति विभागोपिद्विविधः कर्मजोविभागजश्च आद्योहस्तपुस्तकविभागः द्वितीयःकायपु
स्तकविभागः·

गिविधयानाशम्प्रतिकारणत्वादितिवाच्यम् प्रतियोगितासम्बन्धानवच्छिन्ननाश विशिष्टज
न्यतानिरूपितजनकत्वविवक्षणेनादोषादितिकेचित ॥ ॥

परेतुसंयोगमात्रत्वावच्छिन्ननिरूपितसमवायावच्छिन्नकारणत्वमितिनिष्कर्षः एतत्तात्पर्यग्राहकं गुणपदमित्याहुः वि
भागइति अयमव्याप्यवृत्तिरितिबोध्यम् आद्येतीति आद्यत्वमिहस्वसमानाधिकरणपतनप्रतियोगिकध्वंसास

परत्वापरत्वयोर्लक्षणमाह परापरेति परव्यवहारकारणम्परत्वम् अपरव्यवहारकारणमपरत्वमि
त्यर्थः तेविभजते द्विविधेइति दिक्कृतयोरुदाहरणमाह दूरस्थइति कालकृतेउदाहरति ज्येष्ठइतिगु
रुत्वंलक्षयति आद्येति द्वितीयादिपतनस्यवेगासमवायिकारणत्वात्वेगेऽतिव्याप्तिवारणायाद्येति द्रव

परापरव्यवहारासाधारणकारणेपरत्वापरत्वे तेद्विविधे दिक्कृतेकालकृतेच दूरस्थेदिक्कृतम्प
रत्वम् समीपस्थेदिक्कृतमपरत्वम् ज्येष्ठेकालकृतम्परत्वम् कनिष्ठेकालकृतमपरत्वम् ॥
आद्यपतनासमवायिकारणंगुरुत्वम् पृथिवीजलवृत्तिः आद्यस्यन्दनासमवायिकारणन्द्रव
त्वम् पृथिवीजलतेजोवृत्ति तद्द्विविधम् सांसिद्धिकम् नैमित्तिकञ्चेति सांसिद्धिकंजले नैमि
त्तिकम्पृथिवीतेजसोः पृथिव्यांघृतादावग्निसंयोगजन्द्रवत्वम् तेजसिसुवर्णादौ ॥ ९ ॥

त्वंलक्षयति स्यन्दनेति स्यन्दनम्प्रस्रवणम् तेजस्संयोगजन्नैमित्तिकम् तद्भिन्नंसांसिद्धिकम् पृथिव्या
न्नैमित्तिकमुदाहरति घृतादाविति तेजसितदाह सुवर्णादौ ॥

समानकालिकत्वम् द्वितीयपतनादीनाम्प्रा
थमिकपतनध्वंससमानकालिकत्वान्निरासइतिभावः तदाहेति नैमित्तिकमाहेत्यर्थः ॥ ९ ॥

पिण्डीभावेतीति· पिण्डीभावः संयोगविशेषः भेरीदण्डसंयोगजन्यइति आद्योसमवायिकारणमेर्य्याकाशसंयोगो
निमित्तकारणन्तु भेरीदण्डसंयोगः द्वितीयेवंशदलाकाशविभागोऽसमवायिकारणम् दलद्वयविभागोनिमित्तका
स्नेहंलक्षयति चूर्णइतिकालादावतिव्याप्तिवारणायगुणइतिरूपादावतिव्याप्तिवारणायपिण्डीभावेति
शब्दंलक्षयति श्रोत्रेति शब्दत्वेऽतिव्याप्तिवारणायगुणइति रूपादावतिव्याप्तिवारणायश्रोत्रेति· शब्द
स्त्रिविधः संयोगजोविभागजःशब्दजश्चेति· तत्राद्योभेरीदण्डसंयोगजन्यः द्वितीयोवंशेपाट्यमानेदलद्वय

चूर्णादिपिण्डीहेतुर्गुणस्नेहः जलमात्रवृत्तिः श्रोत्रग्राह्योगुणः शब्दः आकाशमात्रवृत्तिः
सद्विविधः ध्वन्यात्मकोवर्णात्मकश्चेति ध्वन्यात्मकोभेर्यादौवर्णात्मकः संस्कृतभाषादि
रूपः सर्वव्यवहारहेतुर्गुणोबुद्धिर्ज्ञानम् साद्विविधा स्मृतिरनुभवश्च॥ ६ ॥

विभागजन्यश्चटचटाशब्दः भेर्यादिदेशमारभ्यश्रोत्रपर्यंतम् द्वितीयादिशब्दाः शब्दजाः बुद्धेर्ल
क्षणमाह सर्वेति· कालादावतिव्याप्तिवारणायगुणइति रूपादावतिव्याप्तिवारणायसर्वव्यवहारइतिज्ञा
नामीत्यनुव्यवसायगम्यज्ञानत्वंलक्षणमित्यर्थः बुद्धिंविभजते सेति· ॥ऽऽरणम्· तृतीयेतुपूर्वपूर्वशब्दोऽसम
वायिकारणम् पवनादिनिमित्तकारणमितिविवेकः जानामीत्यादिः ज्ञानत्वमात्रलक्षणेज्ञानामीत्यनुव्यवसायग
म्यत्वन्तुज्ञानत्वस्यप्रमाणसिद्धत्वसूचनाय तथाहिघटज्ञानामीत्याद्यनुगतानुव्यवसायस्यानुगतधर्ममन्तराऽनुपपन्नत्वेनत
स्यस्वीकर्तव्यतयालाघवाज्ज्ञानत्वसिद्धिः इत्थञ्चमूलेसर्वव्यवहारहेतुरितिबुद्धेःस्वरूपकथनमितिभावः॥

त·दी· संस्कारस्त्रिविधस्तत्राह· भावनाख्य इति प्रत्यभिज्ञायामतिव्याप्तिरितिसोयंदेवदत्त इत्याद्याकारकप्रत्यभिज्ञायांतत्तद्देशका
टी· लवृत्तित्वरूपतत्तांशसंस्कारजन्यत्वस्यसत्वेनतत्रातिव्याप्तिरिति भावः मात्रेतीति यद्यपिसंस्कारमात्रजन्यत्वं संस्कारेतराज
१७ न्यत्वेसति संस्कारजन्यत्वंतच्च स्मृतावसम्भवि तत्रसंस्कारसंस्कारेतरात्मादिजन्यत्वसत्वात्तथापिचक्षुराद्यजन्यत्वेसति
संस्कारजन्यत्वेतात्पर्य्यमवसेयम् मूलेतदितितत्प्रकारानुभव इति सप्तम्यर्थोविशेष्यत्वमाश्रयतासम्बन्धेनानुभवान्वयी

स्मृतेर्लक्षणमाह संस्कारेति· भावनाख्यः संस्कारः संस्कारध्वंसेतिव्याप्तिवारणाय ज्ञानमितिघटादिप्रत्य
क्षेऽतिव्याप्तिवारणायसंस्कारजन्यमिति प्रत्यभिज्ञायामतिव्याप्तिवारणाय मात्रेति अनुभवंलक्षयतितद्भि

संस्कारमात्रजन्यंज्ञानंस्मृतिः तद्भिन्नंज्ञानमनुभवः सद्विविधः यथार्थोऽयथार्थश्चेति तद्वति

न्नमिति स्मृतिभिन्नंज्ञानमनुभव इत्यर्थः अनुभवंविभजते· सद्विविध इति यथार्थो॥ ॥ ॥

नुभवस्यलक्षणमाह तद्वतीति॥ ॥ तथाचतद्वद्विशेष्यकतत्प्रकारकानुभवत्वंयथार्थानुभवस्यलक्षणम्तत्पदार्थः
प्रकारः तद्वत्वम्प्रकारतावच्छेदकसम्बन्धेनग्राह्यमतेनकालिकसम्बन्धेनशुक्त्यादौरजतत्वसत्वेपि इदंरजतमि
तिभ्रमेनातिव्याप्तिः नचतथापिरङ्गत्वेनरजतावगाहिनिरजतत्वेनचरङ्गावगाहिनिइमेरङ्गरजतेइत्याकारकस
मूहालम्बनभ्रमेऽतिव्याप्तिस्तत्ररङ्गविशेष्यकत्वरङ्गत्वप्रकारकत्वयोरजतविशेष्यकत्वरजतत्वप्रकारत्वयोश्चस
त्वादितिवाच्यम् तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वविशिष्टानुभवत्वरूपार्थविवक्षणेनादोषात् तथाहिय
योर्विषयतयोर्निरूप्यनिरूपकभावः तन्निरूपितविषयितयोरेवावच्छेद्यावच्छेदकभाव इति सिद्धान्तः दर्शितभ्रमे १७

ङ्गः तत्प्रकारत्वयोर्विशेष्यतानिरूपितत्वस्य रजतत्वप्रकारतायाञ्च रजतविशेष्यतानिरूपितत्वस्य सत्वेऽङ्ग विशेष्यकत्वावच्छिन्नर
ङ्गत्वप्रकारकत्वरजतविशेष्यकत्वावच्छिन्नरजतत्वप्रकारकत्वयोरभावान्नातिव्याप्तिः स्मृतिव्यावर्तकतयाऽनुभवत्वनिवे
शः एतत्फलमनुपदं स्फुटीभविष्यति ननु तद्वतीत्यस्य तदधिकरण इत्यर्थकतया घटे घटत्वमिति प्रमायामव्या
प्तिः आधेयतायाः वृत्त्यनियामकतया तेन सम्बन्धेन घटरूपप्रकाराधिकरणाप्रसिद्धेरित्याशयेन ननु घटे घटत्व

ननु घटे घटत्वमिति प्रमायामव्याप्तिर्घटत्वे घटाभावादिति चेन्न यत्र यत्सम्बन्धोऽस्ति तत्र तत्सम्बन्धानुभव
इत्यर्थात् घटत्वेऽपि घटसम्बन्धोऽस्तीति नाव्याप्तिः सैवेति यथार्थानुभव एव शास्त्रे प्रमेत्युच्यत इत्यर्थः अयथा
र्थानुभवं लक्षयति तदभाववतीति नन्विदं संयोगीति प्रमायामतिव्याप्तिरिति चेन्न यदवच्छेदेन यत्सम्ब

तत्प्रकारकोऽनुभवो यथार्थः यथायं घट इति ज्ञानं सैव प्रमेत्युच्यते तदभाववति तत्प्रकारक
श्चायथार्थः यथार्थानुभवश्चतुर्विधः प्रत्यक्षानुमित्युपमितिशाब्दभेदात् ॥ ॥ ९ ॥

न्धाभावस्तदवच्छेदेन तत्सम्बन्धज्ञानस्य विवक्षितत्वात् संयोगाभावावच्छेदेन संयोगज्ञानस्य भ्रमत्वात्
संयोगावच्छेदेन संयोगसम्बन्धस्य सत्वान्नातिव्याप्तिः यथार्थानुभवं विभजते यथार्थेति

मिति तद्वतीत्यस्य तत्सम्बन्धिनीत्यर्थः एवञ्च घटत्वस्यापि घटसम्बन्धितया तादृशप्रमायामाधेय ॥
तया घटसम्बन्धिघटत्वविशेष्यकत्वावच्छिन्नघटप्रकारकत्वसद्भावान्नाव्याप्तिरिति समाधत्ते यत्रेति यथार्था
नुभव एवेत्येवकारेणायथार्थस्मृतिव्यवच्छेदः यथार्थज्ञानमात्रस्य प्रमात्वे स्मृतिकरणम

माणान्तरतापत्तेरितिभावः अतिव्याप्तिरितिसंयोगाभाववतिसंयोगप्रकारकत्वसत्वादिति यदवच्छेदेनेति यदवच्छे
देनयत्सम्बन्धावच्छिन्नप्रतियोगिताकयद्भाववत्तदवच्छेदेनेतितेनसंबन्धेनतत्प्रकारकानुभवस्यविवक्षितत्वादित्यर्थः
संयोगाभावावच्छेदेनेति संयोगाभावावच्छेदकावच्छेदेनेत्यर्थः संयोगावच्छेदेनेति संयोगावच्छेदकावच्छेदेन सं
योगसम्बन्धस्येति समवायसम्बन्धेनसंयोगस्येत्यर्थः अत्रेदमवधेयम् इदमव्याप्यवृत्तिसंयोगादिप्रकारक
भ्रमानुरोधेनाव्याप्यवृत्तिरजतत्वादिप्रकारकभ्रमलक्षणन्तुतत्सम्बन्धावच्छिन्नप्रतियोगिताकतद्भाववान्यत्तद्वि
शेष्यकत्वावच्छिन्नतत्सम्बन्धावच्छिन्नतत्प्रकारकत्वविशिष्टानुभवत्वम् प्रतियोगितायाम्प्रकारतावच्छेदकसम्ब

प्रसङ्गात्प्रमाकरणंविभजते तत्करणमिति प्रमाकरणमित्यर्थः प्रमायाः करणंप्रमाण॥ ९ ॥

तत्करणमपिचतुर्विधम् प्रत्यक्षानुमानोपमानशब्दभेदात् ॥ ९ ॥

मितिप्रमाणसामान्यलक्षणम् करणलक्षणमाह॥ ६ ॥ ६ ॥ ॥

न्धावच्छिन्नत्वनिवेशात्पर्वतोवन्हिमानितिप्रमायांसमवायावच्छिन्नवन्ह्यभाववत्पर्वतविशेष्यकत्वसत्वेपि
नातिव्याप्तिः विशेष्यत्वप्राकारित्वयोरवच्छेद्यावच्छेदकभावविवक्षणेनेमेरंगरजतइत्याकारकप्रमायांरंगत्वा
घभाववद्रजतादिविशेष्यकत्वरंगत्वादिप्रकारकत्वयोस्सत्वेपिनातिव्याप्तिरित्यलमतिविस्तरेण प्रसंगादिति
स्मृतस्योपेक्षानर्हत्वम्प्रसङ्गस्तस्मादित्यर्थः सामान्यतोऽवगतस्यैवविशेषरूपेणप्रतिपादनंसम्भवतीतिसामा
न्यलक्षणंस्फुटयति प्रमायाः करणंप्रमाणमिति·

असाधारणेनेति दिक्कालादृष्टादेः कार्यत्वावच्छिन्नम्प्रत्येवकारणत्वात् अनुभवत्वव्याप्यधर्मावच्छिन्नप्रमा इति कार्य-
तानिरूपितकारणत्वरूपमसाधारणकारणत्वस्य तत्रासत्वान्नातिव्याप्तिः प्राचीनास्तु व्यापारवत्वे सतीत्यपि वक्तव्यमत
श्चक्षुस्संयोगादौ नातिव्याप्तिः श्रोत्रमनस्संयोगः शब्दो वा व्यापारः सम्भवत्येवेति न श्रोत्रेन्द्रिये करणलक्षणाव्याप्तिरिति
वदन्ति यद्विलम्बात्प्रकृतकार्यानुत्पादस्तत्कारणत्वस्यासाधारणत्वात्मकतया कालादिषु तादृशाकारणत्वाभावान्ना
तिव्याप्तिः व्यापारत्वेनाभिमतेन्द्रियसंयोगादिकमेव कारणम् एतच्च लिंगपरामर्शोऽनुमानमिति मूल एव स्फुटीभवि
ष्यति अत एव मणिकारैरप्युक्तं न च लिंगपरामर्श इति ग्रन्थेनेति नु नव्याः अधिकमस्मदीयमणिप्रभायामनुसंधेय

असाधारणेति साधारणकारणे दिक्कालादावतिव्याप्तिवारणायासाधारणेति कारणलक्षणमाह कार्येति

॥असाधारणंकारणंकरणम्॥

पूर्ववृत्तिकारणमित्युक्ते रासभादावतिव्याप्तिवारणाय नियतेति तावन्मात्रोक्ते कार्येऽतिव्याप्तिरतः पूर्ववृ
त्तीति ननु तन्तुरूपमपि पटं प्रति कारणं स्यादिति चेन्न॥ ॥अनियतेनेति नियतत्वं हि व्यापकत्वं तच्च रासभादेर्न सं
भवतीति तत्र न घटकारणत्वातिप्रसक्तिरिति भावः पूर्ववृत्तीति स्वव्यापकत्वस्य स्वस्मिन्सत्वेऽपि स्वपूर्वकालवृत्तित्वस्यासत्वेन
नातिप्रसंग इति भावः कार्यतावच्छेदकसम्बन्धेन कार्याधिकरणकार्याव्यवहितप्राक्क्षणावच्छेदेन विद्यमानात्यन्ताभावप्रति
योगितानवच्छेदकतद्धर्मवत्वमनेन रूपेण कारणत्वमिति समुदितार्थो बोध्यः कारणं स्यादिति तस्य नियतपूर्ववृत्ति
॥त्वादिति भावः॥

त·दी॰ निबन्धान्तरेऽप्यन्यथासिद्धेः पंचविधत्वेपि मणिकारमताभिप्रायेणाह त्रिविधेतियेनसहैवेत्यादियेनतन्तुनासहैवयस्य
नी॰ तन्तुरूपस्यपटंप्रतिपूर्ववृत्तित्वमवगम्यतेतस्यपटंप्रतितन्तुरूपंतेनतन्तुनान्यथासिद्धमित्यर्थः अत्रसहितत्वमेक
१९ ज्ञानविषयत्वम्बोध्यम् तन्तुरूपस्यपटपूर्ववृत्तित्वज्ञानेऽनतिप्रसक्ततन्तुरूपत्वेनैवविषतावाच्यानयाचतन्तुरूपमन्य
थासिद्धम् एवन्तन्तुत्वस्यपूर्ववृत्तित्वज्ञानमपितन्तुविषयकमेवेतितदप्यन्यथासिद्धमितिभावः येनेत्यस्यस्वतंत्रा॰

अनन्यथासिद्धेसतीतिविशेषणात् अनन्यथासिद्धत्वम् अन्यथासिद्धिविरहः अन्यथासिद्धस्त्रिविधः
येनसहैवयस्ययंप्रतिपूर्ववृत्तित्वमवगम्यतेतत्तेनान्यथासिद्धम् यथातन्तुनातन्तुरूपंतन्तुत्वञ्चपटंप्र

॥कार्यनियतपूर्ववृत्तिकारणम्॥

तिअन्यंप्रतिपूर्ववृत्तित्वेज्ञातएवयस्ययंप्रतिपूर्ववृत्तित्वमवगम्यतेतंप्रतितदन्यथासिद्धंयथाशब्द
म्प्रतिपूर्ववृत्तित्वेज्ञातएवपरंप्रति आकाशस्य ॥ २१ न्वयव्यतिरेकशालिनेनियस्येत्यस्यचस्वतंत्रान्वयव्यतिरे
कशून्यस्येतिविशेषणंबोध्यम् तेनननतथाभूतेनतंतुत्वेनतन्तोरन्यथासिद्धिःनवातन्तुसंयोगस्यतंतुनासहान्यथासिद्धिरितिसंक्षेपः
भूतएवान्वयव्यतिरेकप्रयुक्तान्वयव्यतिरेकशालिपततदन्यथासिद्धिरितितुपरे शब्दंप्रतीति आकाशत्वंहिशब्दसमवायिकारणत्वम् प्रमः
तथाचशब्दकारणमगृहीत्वाकाशस्याकाशत्वेनघटपूर्ववृत्तित्वंगृहीतुमशक्यमित्याकाशोन्यथासिद्धइत्यर्थः॥ ६ १९

अन्यचक्लृप्तेति अपाकजस्थलेगंधम्प्रतिक्लृप्तनियतपूर्ववृत्तिनागन्धप्रागभावेनैवपाकजस्थलेऽपितत्सम्भवेरूपप्रागभावोन्य
थासिद्ध इत्यर्थः अत्रैवन्नियतपदमव्यर्थम् अनियतरासभादेस्तृतीयान्यथासिद्धत्वेनसत्यन्तेनैववारणसम्भवादितिचेन्न
घटसामान्यम्प्रत्यन्यथासिद्ध्यसम्भवात् अन्यत्रघटभिन्नेपटादौक्लृप्तपूर्ववर्तिनस्तन्त्वादितोघटोत्पत्त्यसम्भवादिति न
वीनाः पुनरेवमाहुः लघुनियतपूर्ववर्तिनएवकार्यसम्भवेतद्भिन्नमन्यथासिद्धमित्येकविधमेवान्यथासिद्धम् लघु
त्वञ्चशरीरकृतमुपस्थितिकृतसम्बन्धकृतञ्च तत्रप्रथममनेकद्रव्यसमवेतत्वापेक्षयामहत्त्वेद्वितीयंगन्धम्प्रतिरू

अन्यत्रक्लृप्तनियतपूर्ववृत्तिनएवकार्यसम्भवेतत्सहभूतमन्यथासिद्धम् यथापाकजस्थलेगन्धम्प्रतिरू

**कार्यप्रागभावप्रतियोगि कारणंत्रिविधम् समवाय्यसमवायिनिमित्तभेदात् यत्समवेतं**
**कार्यमुत्पद्यतेतत्समवायिकारणम्॥** ऽऽपप्रागभावस्यएवञ्च अनन्यथासिद्धनियतपूर्ववृत्तित्वंका
रणत्वम् कार्यलक्षणमाह कार्यमितिकारणम्विभजते कारणमिति समवायिकारणमाह यत्समवेतमि

ऽऽति यस्मिन्समवेतमित्यर्थः
पप्रागभावापेक्षयागन्धप्रागभावेगन्धस्यप्रतियोगिनउपस्थितत्वेनशीघ्रंतदुपस्थितेः
तृतीयंदण्डत्वदण्डरूपाद्यपेक्षयादण्डादौस्वाश्रयदण्डसंयोगादिरूपपरम्परायागुरुत्वात् एवञ्चैतावतैवनिर्वाहे
न्यथासिद्धिस्त्रिधायंचधाचेतिप्रपंचोव्युत्पत्तिवैचित्र्याय नचनियतपदंव्यर्थंरासभादेरन्यथासिद्धत्वेनैववारणा
दितिवाच्यम् यतोऽन्यथासिद्धत्वस्याननुगतस्यदुर्वचनतयात्रयत्रप्रामाणिकानामन्यथासिद्धत्वव्यवहारः तत्तद्भेद
कूटंनिवेशनीयम् लघुनियतेत्यादिकन्तुभेदप्रतियोगितत्तद्व्यक्तिपरिचायकम् इत्थंचतत्रानियतानन्तरासभादीना

मेकेननियतत्वविशेषणेनैववारणात् नत्तद्भेदकूटनिवेशेगौरवम् नियतानांदण्डत्वादीनान्त्वनायत्याजत्तद्भेदत्वंनिवेशा
नीयमित्यभिसन्धिरितियस्मिन्समवेतमित्यर्थइति यद्धर्मावच्छिन्नंयद्धर्मावच्छिन्नेसमवायेनोत्पद्यतेतद्धर्मावच्छिन्नम्प्र
तितद्धर्मावच्छिन्नंसमवायिकारणमितिपरमार्थः॥ ॥कारणेनपटेनेति स्वकार्येकारणेनपटेनेत्यर्थः स्वंतन्तुरूपंपटा
दिकम्प्रतितुरीतन्तुसंयोगादीनामसमवायिकारणत्ववारणायतत्तदसमवायिकारणलक्षणेतत्तद्भिन्नत्वन्देयमितिदिक्

असमवायिकारणलक्षणमाह कार्येणेति कार्येणेत्येतदुदाहरति तन्तुसंयोगइति कार्येणपटेनसह।

यथातन्तवःपटस्यपटश्चस्वगतरूपादेः कार्येणकारणेनवासहैकस्मिन्नर्थेसमवेतत्वेसतिय
त्कारणान्तरसमवायिकारणम् यथातन्तुसंयोगःपटस्यतन्तुरूपंपटरूपस्यतदुभयभिन्नं।

एकस्मिन् तन्तौसमवेतत्वात्तन्तुसंयोगः पटस्यासमवायिकारणमित्यर्थः कारणेनसहे ॥कारणम्
त्येतदुदाहरति तन्तुरूपमिति कारणेनपटेनसहएकस्मिन्तन्तौसमवेतत्वात्तन्तुरूपंपटरूपस्यासमवायिका
॥रणमित्यर्थः॥
ननुतुरीयविषयतानिरूपकस्यनिर्विकल्पकज्ञानस्यनिरूपकतासम्बन्धेनप्रकारताशून्यत्वमिववि
शेष्यताशून्यत्वंसंसर्गताशून्यत्वञ्चलक्षणंसम्भवतिविनिगमनाविरहादित्यतोलक्षणत्रयन्दर्शयति विशेष्येति विशेष्य
तादिविधयाविशेष्याद्यनवगाहिज्ञानमित्यर्थः तथाज्ञानत्वघटितम्विशेष्यताशून्यत्वम्विशेषणताशून्यत्वंसंसर्गता
शून्यत्वञ्चेतिलक्षणत्रयम्पर्यवसितमितिभावः केचित्तु ननुनिष्प्रकारकत्वंप्रकारताशून्यत्वंप्रकारतावभासमान

वैशिष्ट्यप्रतियोगित्वंसंसर्गावच्छिन्नविषयतेतियावत् तथाचसंसर्गानवगाहिज्ञानत्वमेवसंसर्गताशून्यज्ञानत्वमेववा
लक्षणमास्ताम् लाघवादित्यतस्तथैवमूलार्थमाह विशेष्येत्याहुः तच्चित्यंसिद्धान्तेसंसर्गतायाइवप्रकारतायाअपि

निमित्तकारणंलक्षयति तदुभयेति समवाय्यसमवायिभिन्नकारणंनिमित्तकारणमित्यर्थः कारणा
लक्षणमुपसंहरति तदेतदिति प्रत्यक्षलक्षणमाह तत्रेति प्रमाणचतुष्टयमध्येइत्यर्थः प्रत्यक्षज्ञा
नस्यलक्षणमाह इन्द्रियेति इन्द्रियंचक्षुरादिकमर्थोघटादिः तयोस्सन्निकर्षः संयोगादिः तज्जन्यं

निमित्तकारणम् यथातुरीवेमादिकंपटस्य तदेतत्त्रिविधकारणमध्येयदसाधारणंका
रणंतदेवकरणम् तत्रप्रत्यक्षज्ञानकरणम्प्रत्यक्षम् इन्द्रियार्थसन्निकर्षजन्यंज्ञानम्प्र
त्यक्षम् ॥ = = ॥ तद्द्विविधम् निर्विकल्पकंसविकल्पकञ्चेति तत्रनिष्प्रकारकंज्ञा
नंनिर्विकल्पकम् सप्रकारकंज्ञानंसविकल्पकं यथाडित्थोयम्ब्राह्मणोऽयंश्यामोयमिति

ज्ञानमित्यर्थः निर्विकल्पकस्यलक्षणमाह निष्प्रकारकेति विशेषणविशेष्यसम्बन्धानवगाहि
ज्ञानमित्यर्थः ननुनिर्विकल्पकेकिंप्रमाणमितिचेन्न गौरिति विशिष्टज्ञानम्विशेषणज्ञानजन्यं
विशिष्टज्ञानत्वात् दण्डीति ज्ञानवदित्यनुमा नस्यप्रमाणत्वात् विशेषणज्ञानस्यापिसवि
विलक्षणविषयतात्मकत्वेननिष्प्रकारकज्ञानत्वरूपलक्षणेगौरवानवकाशादितिदिक् ऽकल्पकत्वे
निर्विकल्पकस्यातीन्द्रियतयातत्रप्रत्यक्षप्रमाणासम्भवादनुमानम्प्रमाणयतिगौरितीति विशिष्टज्ञानत्वादि

ति विशिष्टबुद्धिम्प्रतिविशेषणज्ञानस्यकारण
त्वान्नाप्रयोजकत्वशंकेतिभावः॥

अनवस्थाप्रसंगादिति सविकल्पकस्यविशिष्टबुद्धित्वेन विशेषणज्ञानजन्यत्वनियमादितिभावः विशेष्यविशेषणसम्बन्धा वगाहीति अत्राप्युक्तरीत्यालक्षणत्रयम्बोध्यम् मनइन्द्रियेणेति संयुज्यतेइत्यनेनान्वयः एवमग्रेपि आत्मप्रत्यक्षसं ग्रहस्त्वात्मामनसासंयुज्यतेततः प्रत्यक्षज्ञानमुत्पद्यतेइति योजनान्तरेणकथंश्रोत्रसम्बन्धइति नचश्रोत्रस्यनभोरू

अनवस्थाप्रसङ्गात् निर्विकल्पकत्वसिद्धिः सविकल्पकंलक्षयतिसप्रकारकमिति नामजात्यादिविशेषण विशेष्यसम्बन्धावगाहिज्ञानमित्यर्थः सविकल्पमुदाहरति यथेति इन्द्रियार्थसन्निकर्षंविभजते प्रत्य क्षेति संयोगसन्निकर्षमुदाहरति चक्षुषेति द्रव्यप्रत्यक्षेसर्वत्रसंयोग सन्निकर्षइत्यर्थः आत्मामन

प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः संयोगः संयुक्तसमवायः संयुक्तसमवेतसम वायः समवायः समवेतसमवायः विशेषणविशेष्यभावश्चेति चक्षुषाघटप्रत्यक्षजनने संयोगः सन्निकर्षः घटरूपप्रत्यक्षेसंयुक्तसमवायस्सन्निकर्षः चक्षुःसंयुक्तेघटेरूप स्यसमवायात् रूपत्वसामान्यप्रत्यक्षेसंयुक्तसमवेतसमवायस्सन्निकर्षः चक्षुःसंयु क्तेघटेरूपंसमवेतन्तत्ररूपत्वस्यसमवायात् श्रोत्रेणशब्दसाक्षात्कारेसमवायस्सन्नि कर्षः कर्णविवरवृत्त्याकाशस्यश्रोत्रत्वात् शब्दस्याकाशगुणत्वात् गुणगुणिनोश्चसम वायात् शब्दत्वसाक्षात्कारेसमवेतसमवायस्सन्निकर्षः श्रोत्रसमवेतेशब्देशब्दत्वस्यस मवायात्

सासंयुज्यतेमनइन्द्रियेण इन्द्रियमर्थेनततःप्रत्यक्षज्ञानमुत्पद्यते संयुक्तसमवायमु दाहरति घटरूपेति तत्रयुक्तिमाहचक्षुःसंयुक्तेति संयुक्तसमवेतसमवायमुदाहरति रूपत्वेति समवा यमुदाहरतिश्रोत्रेति तदुपपादयतिकर्णेति ननुदूरस्थशब्दस्यकथंश्रोत्रेणसम्बन्धइतिचेन्न॥

पत्वेनतत्समवायोदूरस्थशब्देप्यक्षतइतिशंकाम् अतिप्रसङ्गभङ्गायकर्णविवरावच्छिन्ननभोऽनुयोगिकत्वनि ष्ठसमवायसम्बन्धेतु लाङ्गिकारणनहि श्रवणम् ... शब्देऽभावादितिभावः॥

प्रथमतोभेरीदण्डसंयोगेननभसिशब्दउत्पद्यतेतेनशब्दान्तेष्वपुनश्शब्दाद्युत्पत्त्येवंक्रमेणनिखिलदिगवच्छेदेनशब्दो
त्पत्तेरङ्गीकरणीयतयातदंशेपिसाम्यनिर्वाहायाह कदम्बेतिद्रष्टव्यमिति अत्रेदमवधेयम् विशेषणानांसंयुक्तवि
शेषणतात्वादिरूपेणबहुविधत्वेपिविशेषणतात्वेनैवपरिगणनान्नषड्विधत्वहानिः नचैवंसमवायत्वेनैवसंयुक्त
समवायादीनामनुगमः कुतोनकृतइतिवाच्यम् स्वतंत्रेच्छस्येत्या दिन्यायानुसरणेनादोषादिति एतेनाभावप्रमा

वीचीतरंगन्यायेनकदम्बमुकुलन्यायेनवाक्रमेणश्रोत्रदेशेजातस्यश्रोत्रसम्बन्धात् प्रत्यक्षत्वसम्भा
वात् समवेतसमवायमुदाहरति शब्दत्वेति विशेषणविशेष्यभावमुदाहरति अभावेति तदुपपाद

**अभावप्रत्यक्षेविशेषणविशेष्यभावस्सन्निकर्षः घटाभाववद्भूतलमित्यत्रचक्षुस्संयुक्ते**
**भूतलेघटाभावस्यविशेषणत्वात् एवंसन्निकर्षषट्कजन्यंज्ञानंप्रत्यक्षम् तत्करणमि**
**न्द्रियम्॥**

यति घटाभाववदिति भूतलेघटोनास्तीत्यत्र अभावस्यविशेष्यत्वंद्रष्टव्यम् एतेनअनुपल
ब्धेः प्रमाणान्तरत्वन्निरस्तम् यद्यत्रघटोऽभविष्यत्तदाभूतलमिवाद्रक्ष्यतदर्शनाभावान्नास्तीति॥ ९॥

याविशेष्यविशेषणभावसन्निकर्षजन्यत्वप्रदर्शनेनप्रमाणान्तरत्वम् प्रत्यक्षाद्यतिरिक्तप्रमाणत्वम् नन्वनुपलब्धेः प्र
माणांतरत्वानंगीकारेघटोपलब्धिदशायान्तदभावप्रत्यक्षापत्तिः ममनतेतु अनुपलब्ध्यात्मकप्रमाणान्तराभावान्नापत्तिरि
तिभट्टशंकाम्परिजिहीर्षुर्योग्यानुपलब्धेरिन्द्रियसहकारित्वमात्रेणैवनिर्वाहेऽतिरिक्तप्रमाणत्वमसम्भवीत्याह यद्यत्रे
त्यादिना अत्रचक्षुस्संयोगादिमद्भूतलेतर्कस्यापादकाभावसाधकविपर्ययप्रतियोग्यापाद्यकत्वरूपविपर्ययेतन्कोटिपर्य
॥वसायितान्दर्शयति दर्शनाभावान्नास्तीति॥ तद्दर्शनाभावान्नास्तीत्यर्थः

न॰ टी॰ तर्कितेत्यादि तर्कितान्आपादिता प्रतियोगिनो घटादेस्सत्वस्य सत्वप्रसक्तेर्विरोधिनीया उपलब्धिस्तत्प्रतियोगिकोऽभावोऽनुपलब्धि
नी॰ स्तत्सहकृतेनेत्यर्थः विरोधित्वविशेषणमुपलब्धेरनाहार्यत्वसूचनाय प्रतियोगिसत्वापादनापादितोपलम्भप्रतियोगिकत्वरूपयोग्य
२४ ताविशिष्टानुपलब्धिसहकृतेनेति तु परमार्थः आलोकसंयोगाद्यसत्वदशायां यद्यत्र घटः स्यात्तर्हि उपलभ्येतेत्यापादनासम्भवे
न योग्यानुपलब्ध्यभावान्न तत्र घटाभावप्रत्यक्षमिति संक्षेपः केचित्तु तर्कितेत्यादि तर्कितमारोपितं यत्प्रतियोगिसत्वं तद्विरो
धिनी याऽनुपलब्धिः तत्सहकृतेनेत्यर्थः एतावता प्रतियोगिसत्वरूपकारणाभावप्रयोज्य उपलब्ध्यभावोऽभावप्रत्यक्षे कारण
न्नतु इतरकारणविरहप्रयोज्य उपलब्ध्यभाव इति सूचितम् अत एवान्धकारे उपलम्भाभावसत्वेपि तद्घटाभावप्रत्यक्ष

तर्कित प्रतियोगिसत्वविरोध्यनुपलब्धि सहकृतेनेन्द्रियेणैवाभावज्ञानोपपत्तौ अनुपलब्धेः प्रमाण

तस्मादिन्द्रियम्प्रत्यक्षप्रमाणमिति सिद्धम् प्रत्यक्षव्याख्यानम्॥ ९ ॥

नरत्वासम्भवात् अधिकरणज्ञानार्थमपेक्षणीयेन्द्रियस्यैव करणत्वोपपत्तावनुपलब्धेः करणत्वायुक्तत्वा

मित्याहुः नन्वभावप्रमायामिन्द्रियस्य कारणत्वमनुपलब्धेस्सहकारित्वञ्च त्वया कल्पनीयम् तदपेक्षया नुपलब्धेरेवा एमः
कारणत्वकल्पनं वरमित्याशंक्याभावाधिकरणभूतलप्रत्यक्षे इन्द्रियस्यावश्यमपेक्षणीयतया क्लृप्तेनैवेन्द्रियकर २२
णत्वेनाभावप्रत्यक्षोपपत्तावनुपलब्धेर्विजातीयप्रमितिकरणकल्पनमयुक्तमित्याह अधिकरणेति ननु विशेष्य

विशेषणभावाख्यस्सम्बन्धोऽतिरिक्तः कल्पनीयस्त्वयेत्यत आह॥ ९ ॥

विशेष्यविशेषणभावइति अत्रेदम्बोध्यम् प्रत्यक्षंद्विविधंलौकिकमलौकिकञ्चेति लौकिकत्वञ्चविषयताविशेषः।
लौकिकेषोढासन्निकर्षः कारणम् अलौकिकेतुसामान्यलक्षणाज्ञानलक्षणायोगजधर्मश्चेतित्रिविधप्रत्यासत्तिस्तत्र
सामान्यलक्षणाधूमत्वादिरूपाततज्ज्ञानरूपावासामान्यंलक्षणंस्वरूपंविषयोवायस्येतिव्युत्पत्तेः साचाश्रयाणान्नि

विशेषणविशेष्यभावोविशेषणविशेष्यस्वरूपमेवनातिरिक्तसम्बन्धः प्रत्यक्षज्ञानमुपसंहरन्तत
स्यकरणमाहएवमितिं असाधारणकारणत्वादिन्द्रियम्प्रत्यक्षज्ञानकरणमित्यर्थः प्रत्यक्षमु
पसंहरति तस्मादिति ॥०॥ इतितर्कदीपिकायांप्रत्यक्षपरिच्छेदः समाप्तः ॥ १ ॥ ॥

खिलधूमादीनामलौकिकप्रत्यक्षेउपयुज्यतेऽतीतानागतधूमादिचक्षुस्संयोगादेरसम्भवात् इन्द्रियाणामसन्निकृ
ष्टानाम्प्रत्यक्षाजनकत्वात् ज्ञानलक्षणातुसुरभिचंदनमितिचाक्षुषोपनीतभानेसौरभेणचक्षुषोयोग्यसन्निकर्षा।
सम्भवात् एवंयोगिनान्देशकालविप्रकृष्टपदार्थप्रत्यक्षेयोगजधर्मः प्रत्यासत्तिः ॥०॥ इतितर्कसंग्रहदीपिकाप्र
॥काशेभगवदर्पितेप्रत्यक्षपरिच्छेदः॥

त॰दी॰ अनुमानंलक्षयतीति प्रत्यक्षोपजीवकत्वसंगत्याऽनुमानंनिरूपयतीत्यर्थः परामर्शेतीति तथाचप्रत्यक्षंप्रमित्यपेक्ष
नी॰ याऽनुमितेविलक्षणप्रमितित्वेनानुमानस्यप्रमाणांतरत्वंसिध्यतीति भावः विपरीतज्ञानोत्तरप्रत्यक्षंप्रतिविशेषदर्श
२३ नस्यहेतुत्वमङ्गीकुर्वतांमतमवलम्ब्यशङ्कते नन्विति स्थाणुपुरुषसंशयेति इदम्विरुद्धभावद्वयकोटिकसंशयाङ्गी
कारेणपरंतुस्थाणुपुरुषेति स्थाणुत्वतदभावपुरुषत्वतदभावकोटिकेत्यर्थः इत्याहुः पुरुषएवेति निर्णयसूचनाऽ
यतश्चसंशयोत्तरप्रत्यक्षस्थलेऽनुव्यवसायविरोधादिति इदमुपलक्षणम्पुरुषमनुमिनोमीत्यनुव्यवसायाभावेन

अनुमानंलक्षयति अनुमितिकरणमिति अनुमितेर्लक्षणमाह परामर्शेति ननुसंशयोत्तरप्रत्यक्षेऽ
ऽतिव्याप्तिःस्थाणुपुरुषसंशयानन्तरम्पुरुषत्वव्याप्यकरादिमानयमितिपरामर्शेपुरुषएवेति प्रत्यक्षज

॥ अनुमितिकरणमनुमानम् परामर्शजन्यंज्ञानमनुमितिः।

नमान् नचतत्रानुमितिरेवेतिवाच्यम् पुरुषंसाक्षात्करोमीत्यनुव्यवसायविरोधादितिचेन्न पक्ष
प्रमाणाभावादित्यपिद्रष्टव्यम् संशयोत्तरप्रत्यक्षेजनऽऽतासहकृतपरामर्शजन्यत्वस्यविवक्षितत्वात्॥ ॥
नीयेवक्ष्यमाणपक्षतायाः परामर्शसहकारित्वेप्रयोजनाभावेनपक्षतासहकृतपरामर्शजन्यत्वविवक्षणान्नाति
ध व्याप्तिरित्याह पक्षतेति एतेनवह्निव्याप्यधूमोपर्वतवानयमितिविशिष्टवैशिष्ट्यावगाहिबुद्धिम्प्रतिविशेषणताव तम॰
च्छेदकप्रकारकनिर्णयविधयावह्निव्याप्यधूमवान्पर्वतइतिपरामर्शस्यकारणत्वेपिनतत्रातिव्याप्तिः पक्षत २३
॥सहकृतपरामर्शजन्यत्वस्यासत्वेनातिव्याप्तेरभावादितिसंक्षेपः॥

यद्यपिसाध्यसंशयस्यपक्षतात्वेपिसाध्यनिश्चयकालेऽनुमितिवारणंसम्भवति तथापिघनगर्जनेनमेघानुमितौव्यभिचारः
अतोऽन्यादृशींपक्षतामाह सिषाधयिषेति· सिषाधयिषायाः साध्यानुमितीच्छायास्समवायेनयोऽभावस्वरूपसम
वायेतदुभयघटितसामानाधिकरण्यसम्बन्धेनतद्विशिष्टायाः सिद्धेस्समवायेनाभावइत्यर्थः साध्यसिद्धिः पक्षताव
च्छेदकविशिष्टेसाध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहिनिश्चयइत्यर्थः सिद्धौसिषाधयिषाविरहवैशिष्ट्यनि
वेशनस्यप्रयोजनन्दर्शयतिसिद्धिसत्वेपीति अत्रसिद्धिश्चपर्वतोवह्निमान्वह्निव्याप्यधूमवांश्चेतिसमूहालम्बनरूपातः

सिषाधयिषाविरहसहकृतसिध्यभावः पक्षतासाध्यसिद्धिरनुमितिप्रतिवन्धिकासिद्धिसत्वेपि अनुमि
नुयामीतीच्छायामनुमितिदर्शनात् सिषाधयिषोत्तेजिकाततश्चोत्तेजकाभावविशिष्टमण्यभावस्तदाह

व्याप्तिविशिष्टपक्षधर्मताज्ञानम्परामर्शः यथावह्निव्याप्यधूमवान्पर्वतइतिज्ञानम्पराम
र्शस्तज्जन्यंपर्वतोवह्निमानितिज्ञानमनुमितिः॥ ।:॥ ‹‹ कारणत्ववत्सिषाधयिषाविरह सहकृ
तसिद्ध्यभावस्यापिअनुमितिकारणत्वम् परामर्शलक्षयतिव्याप्तीति व्याप्तिविषयकंपक्षधर्मताज्ञानं
सपरामर्शइत्यर्थः परामर्शमभिनीयदर्शयति यथेति अनुमितिमभिनीयदर्शयति तज्जन्यमितिपरा
मर्शजन्यमित्यर्थः॥ ‹‹ परामर्शसम्पत्तिरितिध्येयम् व्याप्तिविशिष्टपक्षधर्मताज्ञानमित्यत्रव्याप्तिविशिष्टेपक्षधर्म
ताव्याप्तिविशिष्टपक्षधर्मताततज्ज्ञानमितिसप्तमीतत्पुरुषाङ्गीकारेव्यभिचारिलिंगकानुमितौव्याप्तिविशिष्टपक्षधर्मताज्ञा
नजन्यत्वाभावेनाव्याप्तिरतोव्याप्तिविशिष्टपदस्य व्याप्तिविषयकेत्यर्थमवलम्ब्यज्ञानानन्तपदेनकर्मधारयमङ्गीकृ
तेति व्याप्तिविषयकमिति व्याप्यवच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताशालिनिश्चयः पराम

त॰ दी॰ नी॰ २४ अभिनीयत्र्अभिलापकशब्दमुच्चार्यनियतसामानाधिकरण्यंसाध्याभाववदवृत्तित्वादिरूपंनसम्भवति इदम्वाच्यं ज्ञे
यत्वादित्यादावव्याप्तेः साध्याभावाप्रसिद्धेरित्यालोच्याह हेतुसमानाधिकरणेति वह्निमान्धूमादित्यादौ धूमसमा
नाधिकरणोयोऽत्यन्ताभावोघटात्यन्ताभावस्तदप्रतियोगिवह्निस्तत्सामानाधिकरण्यंधूमेऽस्तीति लक्षणसमन्वयः
धूमवान्वह्नेरित्यादौतु धूमसामान्याभावस्यापिहेतुसमानाधिकरणतयातत्प्रतियोग्येवधूमइतिनातिव्याप्तिः नच
वह्निमान्धूमादित्यादौतत्तद्वह्न्यभावस्यचालिनीन्यायेनधूमसामानाधिकरणतयातादृशाभावाप्रतियोगित्वंना
कस्यापिवह्नेरित्यव्याप्तिरितिवाच्यम् अप्रतियोगिसाध्येत्यस्यप्रतियोगितानवच्छेदकसाध्यताव

व्याप्तेर्लक्षमाह यत्रेति यत्रधूमइतिव्याप्तेरभिनयः साहचर्यनियमइतिलक्षणम् साहचर्यंसामा

**यत्रधूमस्तत्राग्निरितिसाहचर्यनियमोव्याप्तिः ॥**

नाधिकरण्यंतस्यनियमः हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यंव्याप्तिरित्यर्थः

च्छेदकावच्छिन्नेत्यर्थतात्पर्यकतयादोषात् प्रतियोगितायांसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वंनिवेशनीयम् तेनव
ह्निमान्धूमादित्यादौसमवायेनवह्नित्वावच्छिन्नप्रतियोगिताकाभावस्यधूमसमानाधिकरणत्वेपिनक्षतिः हेतुपदंहे
तुतावच्छेदकावच्छिन्नपरम् अतोद्रव्यम्विशिष्टसत्वादित्यादौविशिष्टस्यशुद्धानतिरेकितयाहेत्वधिकरणगुणादि ल॰ म॰ २४
निष्ठत्वेपिद्रव्यत्वाभावस्यनाव्याप्तिः हेत्वधिकरणताहेतुतावच्छेदकसम्बन्धावच्छिन्नाग्राह्यातेनवह्निमान्धूमादि
त्यादौवह्निसामान्याभावस्यधूमसमवायिनिष्ठत्वेपिनाव्याप्तिः नचैवमपिकपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्ति
स्साध्यस्यहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नत्वादितिवाच्यम् हेतुसमानाधिकरणाभावे

प्रतियोगिवैयधिकरण्यस्यनिवेशनीयत्वात् केवलान्वयिसाध्यकेनादृशास्यघटाभावादेः प्रसिद्धत्वान्नाव्याप्तिरि
तिअधिकमस्मदीयमणिदीधितिव्याख्यायांवुद्धिकुशलैरनुसन्धेयम् स्वार्थानुमानमिति स्वस्यार्थः प्रयोजनंसाध्य
संशयनिवृत्तिरूपंयस्यादृतिव्युत्पत्त्यास्वीयसंशयनिवृत्तिप्रयोजनिकानुमितिरित्यर्थः पश्यन्निति एकसम्वन्धि
ज्ञानमपरसम्वन्धिस्मारकमितिरीत्यादर्शनस्यस्मृतिहेतुत्वादितिभावः कथम्व्याप्तिग्रहइतीतिव्यभिचारज्ञान
दशायांनकश्चिदपिव्याप्तिनिश्चयमभ्युपैतीतिभूयोदर्शनस्यव्याप्तिनिश्चयहेतुत्वंनसम्भवतीतिभावः इदमु

पक्षतारूपमाह व्याप्यस्येति अनुमानम्विभजते अनुमानमिति स्वार्थानुमानन्दर्शयति· स्वयमे

व्याप्यस्यपर्वतादिवृत्तित्वंपक्षधर्मता अनुमानंद्विविधम् स्वार्थंपरार्थंच स्वार्थंस्वानु
मितिहेतुः तथाहि स्वयमेवभूयोदर्शनेनयत्रधूमस्तत्राग्निरितिमहानसादौव्याप्तिंगृ
हीत्वापर्वतसमीपङ्गतस्तद्गतेचाग्नौसन्दिहानः पर्वतेधूमंपश्यन्व्याप्तिंस्मरति॥

वेति· भूयोदर्शनेनेति ननुपार्थिवत्वलोहलेख्यत्वादौशतशः सहचारदर्शनेपिमण्यादौव्यभिचा
पलक्षणम् भूयोदर्शनमित्यस्यभूयसांदर्शनानांसमाहारइतिभूयसांसाध्यहे ॥ रोपलब्धेर्भूयोदर्शनेन॥
तूनान्दर्शनमितिभूयस्स्वधिकरणेषुदर्शनमितिवार्थः नाद्यः एकत्रैवसहचारदर्शनधारयाव्याप्तिनिश्चयप्रस
ङ्गात् नद्वितीयतृतीयौएतद्रूपवानेतद्रसादित्यादिसाध्यहेत्वोरधिकरणेचभूयस्त्वाभावेनव्याप्तिनिश्चयानुत्पाद
प्रसङ्गादित्यपिवोध्यम् मणिकारसिद्धान्तमवलम्ब्याह

त॰दी॰ व्यभिचारज्ञानविरहेति॰ व्याप्तिग्राहकत्वादिति॰ व्याप्तिश्च हेतुसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदक
नी॰ साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरणवृत्तिहेतुतावच्छेदकरूपेव सामानाधिकरण्यांतस्य एव असभादि
२५ साधारण्यात् धूमत्वादेस्स्वरूपतो व्याप्यतावच्छेदकत्व नादृशधूमत्वत्वादिरूपेण च व्याप्तित्वमित्यवच्छेद्याव
च्छेदकयोरैक्यापिनक्षतिः इत्यञ्च साध्यतावच्छेदके तथाविधप्रतियोगितानवच्छेदकत्वांशग्रहे साध्यताव
च्छेदके तथाविधप्रतियोगितावच्छेदकत्वरूपव्यभिचारग्रहाभावो विपरीतग्रहाभावविधया हेतुस्साध्य

कथं व्याप्तिग्रह इति चेन्न व्यभिचारज्ञानविरहसहकृत

यत्र धूमस्तत्राग्निरिति तदनन्तरं वह्निव्याप्यधूमवानयम्पर्वत इति ज्ञानमुत्पद्यते अ
ऽयमेव लिंगपरामर्श इत्युच्यते ॥ ॥

सहचारज्ञानस्य व्याप्तिग्राहकत्वात् ॥

समानाधिकरणवृत्तिहेतुतावच्छेदकांशग्रहे तु विशेषकज्ञानविधया सामानाधिकरण्यज्ञानं हेतुरिति रीत्या व्य
भिचारज्ञानाभावसामानाधिकरण्यज्ञानयोर्व्याप्तिग्रहहेतुतेति ध्येयम् वस्तुतस्तु हेतुव्यापकसाध्यसामानाधि
करण्यमेव व्याप्तिः नच व्याप्तेरसम्भसाधारण्येन प्रमात्मकरासभलिंगकपरामर्शाद्भ्रमात्मकवह्न्यनुमित्याप तर्कः
त्तिः प्रमात्मकपरामर्शस्य भ्रमानुमित्यजनकत्वनियमसत्त्वेनेष्टापत्तेरयोगादिति वाच्यम् यद्धर्मावच्छिन्नव्या २५
पकत्वं व्याप्तिघटकं तद्धर्मधर्मितावच्छेदककव्याप्तिप्रकारकनिश्चयस्यैवानुमितिहेतुत्वोपगमेनादोषात्
अत एव व्याप्तिशरीरे धूमत्वत्वाप्रवेशेन लाघवमिति दिक्

शङ्केति व्यभिचारसंशयस्यापि व्याप्तिग्रहप्रतिबन्धकत्वानुभवात्साधारणव्यभिचारज्ञानत्वावच्छिन्नाभावो हेतुरिति हृदयम् तद्विरहो व्यभिचारशङ्काविरहः क्वचिदिति तर्काभावे तर निखिलकारणसमवधानस्थल इत्यर्थः क्वचित्स्वतःसिद्ध एवेति· इतरकारणविरहस्थले तादृशकारणविरहप्रयुक्त एवेत्यर्थः तथाच तत्र तर्कापेक्षा नेति भावः धूमाग्न्योरिति धूमाग्न्योर्व्याप्तिग्रहे उत्पत्स्यमाने व्यभिचारशङ्कानिवर्तककार्यकारणभावभङ्ग·प्रसङ्ग लक्षणस्तर्क इत्यन्वयः स च तर्को धूमो यदि वह्निव्यभिचारी स्यात्तर्हि वह्निजन्यो न स्यादित्याकारको बोध्यः ननु महानसीयवह्निधूमयोस्स

व्यभिचारज्ञानं द्विधम् निश्चयः शङ्का च तद्विरहः क्वचित्तर्कात्क्वचित्स्वतः सिद्ध एव धूमाग्निव्याप्तिग्रहे कार्यकारणभावभङ्ग·प्रसङ्ग·लक्षणस्तर्कः व्यभिचारशङ्कानिवर्तकः· ननु सकलवह्निधूमयोरस

॥ तस्मात्पर्वतो वह्निमानिति ज्ञानमनुमितिरुत्पद्यते तदेतत्स्वार्थानुमानम् ॥

न्निकर्षात्कथं व्याप्तिग्रह इति चेन्न धूमत्ववह्नित्वरूपसामान्यप्रत्यासत्त्या सकलधूमवह्निज्ञानसम्भवा

न्निकृष्टत्वेन सहचारग्रहेऽप्यन्येषां वह्निधूमानामसन्निकर्षेण सहचा "तत् तस्मादिति लिङ्गपरामर्शादित्यर्थः रप्रत्यक्षासम्भवेन निखिलधूमेषु व्याप्तिप्रत्यक्षं न सम्भवति तथाच पर्वतीयधूमदर्शनेन व्याप्तिस्मरणासम्भवात्परामर्शानुपपत्तिरित्याशयेन शङ्कते ननु सकलेति सकलवह्निधूमेषु लौकिकसन्निकर्षाभावेऽपि सामान्यप्रत्यासत्त्यात्मकालौकिकसन्निकर्षसद्भावात् वह्नित्वावच्छिन्नसामानाधिकरण्यत्वेन निखिलवह्निधूमसहचारप्रत्यक्षसम्भवान्निखिलधूमेषु व्याप्तिग्रहस्सम्भवति एवञ्च पर्वतीयधूमेऽपि व्याप्तेर्गृहीतत्वेन धूमदर्शनेन स्मरणसम्भवा

॥ न्न परामर्शानुपपत्तिरिति समाधत्ते· वह्नित्वधूमत्वेति॥

यद्यपिपरार्थानुमानशब्दस्यपरस्यमध्यस्थस्यार्थः प्रयोजनंसाध्यानुमितिरूपंयस्मादितिव्युत्त्यापरसमवेतानुमितिकरण
लिङ्गपरामर्शोर्थः अत एवस्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एवकरणमित्याद्यग्रिममूलंसाधुसङ्गच्छते त
थापि परामर्शानुमानप्रयोजकेपञ्चावयववाक्येपरार्थानुमानशब्दस्यौपचारिकप्रयोगइतिमनसिकृत्यमूलमवा
तारयति· परार्थानुमानमाहेति पंचावयववाक्यमित्यनेनपंचावयवायस्यवाक्यस्येतिव्यु

परार्थानुमानमाह यत्त्विति यच्छब्दस्यतत्परार्थानुमानमितितच्छब्देनान्वयः पंचावयववाक्यमुदा

यत्तुस्वयंधूमादग्निमनुमायपरप्रतिपत्त्यर्थंपञ्चावयववाक्यंतत्परार्थानुमानम् यथापर्वतोव
ह्निमान्धूमवत्त्वात् योयोधूमवान्सःसोग्निमान्यथामहानसस्तथाचायन्तस्मात्तथेति अनेनप्रति
पादितात्लिङ्गात्परोप्यग्निम्प्रतिपद्यते प्रतिज्ञाहेतूदाहरणोपनयनिगमनानिपञ्चावयवाः ॥

हरति यथेति अवयवस्वरूपमाह प्रतिज्ञेति उदाहृतवाक्येषुप्रतिज्ञादिविभागमाह· ॥ ९ ॥

त्पत्त्याप्रतिज्ञादिवाक्यपञ्चकसमुदायत्वंन्यायलक्षणंबोध्यम् अनेनप्रतिपादितात्लिङ्गादितिमूलस्यप्रतिज्ञादिप
ञ्चकसमुदायप्रयोज्यलिङ्गपरामर्शादित्यर्थः साध्यवत्तयापक्षवचनमिति साध्यतावच्छेदकावच्छिन्नसाध्यप्रका
रताकपक्षतावच्छेदकावच्छिन्नपक्षविशेष्यकबोधजनकवाक्यमित्यर्थः उदाहरणात्साध्यतावच्छेदकविशि
ष्टवैशिष्ट्यावगाहिज्ञानंनपक्षतावच्छेदकविशिष्टेउपनयाच्चपक्षतावच्छेदकविशिष्टेनसाध्यतावच्छेदकविशि
ष्टवैशिष्ट्यज्ञानमितितयोर्निरासः ॥

वाक्यपदस्यन्यायावयववाक्यपरत्वान्न्यायवहिर्भूतवाक्यव्युदासः एवमग्रेपि अयन्नदण्डीत दण्डसंयोगाजन्यद्रव्य
त्वादित्यादौ प्रतिज्ञायामव्याप्त्यनन्वसत्त्वादतिव्याप्तेर्वारणाय लिङ्ग· प्रतिपादकमिति· हेतुप्रतिपादकवाक्यमित्यर्थः
व्याप्तिप्रतिपादकमिति प्रकृतहेतुमति प्रकृतहेतुव्यापकत्वविशिष्टसाध्यबोधकवाक्यमित्यर्थः कथमुदाहरण
स्यव्यापकत्वबोधकत्वेनेति चेदित्थं साध्यपदस्य हेतुव्यापकत्वविशिष्टसाध्यनिरूढलक्षणया नचवह्निरुक्तयत्पद
स्यवैयर्थ्यमितिशंक्यम् तादृशतात्पर्यग्राहकतया सार्थक्यात् अथवा प्रथमयत्पदार्थे महानसे द्वितीययत्पदा

पर्वतो वह्निमानिति साध्यवत्तया पक्षवचनं प्रतिज्ञा पञ्चम्यन्तं लिङ्गप्रतिपादकं हेतुः व्याप्तिप्रतिपादकम्वचन
मुदाहरणम् पक्षधर्मताज्ञानार्थमुपनयः हेतुसाध्यवत्तया पक्षप्रतिपादकम्वचनम् निगमनम् प
पर्वतोग्निमानितिप्रतिज्ञा धूमवत्त्वादितिहेतुः योयोधूमवान्सः सोग्निमान्यथामहानसमित्यु
दाहरणन्तथाचायमित्युपनयः तस्मात्तथेतिनिगमनम्॥ ११ क्षज्ञानम्प्रतिज्ञाप्रयोजनम् लिं
गज्ञानंहेतुप्रयोजनम् पक्षधर्मताज्ञानमुपनयप्रयोजनम् अबाधितत्वादिकन्निगमनप्रयोजनम्॥ ९॥

र्थेचमहानसान्यस्मिन्प्रकृतहेतुमत्वस्यतत्पदार्थेतस्मिन्साध्यस्यचशाब्दबोधेजातेउत्तरकालम्व्यापकत्वावोधोमा
क नसः तथाचव्याप्तिप्रतिपत्तिपरत्वमुदाहरणस्याक्षतमितिनौक्तदोषगन्धइतिदिक् व्याप्तिविशिष्टलिङ्ग· प्रतिपा
दकमिति पक्षतावच्छेदकविशिष्टविशेष्यकप्रकृतसाध्यव्याप्यहेतुप्रकारकबोधजनकवाक्यमित्यर्थः प
क्षधर्मताज्ञानज्ञानार्थमुपनयइतिपाठेतुप्रयुज्यतइतिशेषपूरणेनप्रदर्शितार्थएवयथाकथञ्चित्सङ्गः

त·दी· तृतीयः हेतुसाध्यवत्तयापक्षवचनमिति हेतुज्ञानज्ञाप्यत्वविशिष्टसाध्यवद्विषयकबोधजनकवाक्यमित्यर्थः ३ तत्रकाल
नी· मबाधितासत्प्रतिपक्षितत्वविषयकबोधोमानसोद्रष्टव्यः ननुविशिष्टवैशिष्ट्यावगाहिपरामर्शस्यानुमितिम्प्रतिहे
२ तुत्वेनत्रानन्यथासिद्धत्वनियतपूर्ववृत्तित्वयोर्द्वयोः कल्पनीयतयागौरवम्वह्निव्याप्योधूमोधूमवान्पर्वतइतिज्ञान
द्वयस्यतवमतेविशिष्टपरामर्शम्प्रतिकारणत्वेनक्लृप्तस्यकारणत्वेतुअनन्यथासिद्धत्वमात्रस्यकल्पनीयतयालाघव
मितिप्रभाकरः शङ्कतेनन्विति वह्निव्याप्यधूमवानयमिति अत्रत्वदभिमतकारणसत्वेनव्यभिचारान्तज्ञानद्वयस्यका

अनुमितिकरणमाह स्वार्थेति ननुव्याप्तिस्मृतिपक्षधर्मताज्ञानाभ्यामेवानुमितिसम्भवेविशिष्टपरामर्शः
किमर्थमङ्गीकर्त्तव्यइतिचेन्न वह्निव्याप्यधूमवानयमितिशाब्दपरामर्शस्थलेपरामर्शस्यावश्यकत्तया
लाघवेनसर्वत्रपरामर्शस्यैवकारणत्वात्लिङ्गन्तुकरणमतीतानागतादौव्यभिचारात् व्यापारवत्कारणं
करणमितिमतेपरामर्शद्वाराव्याप्तिज्ञानंकरणंतज्जन्यत्वेसतितज्जन्यजनकोव्यापारः अनुमानमुपसंहर

रणत्वंसम्भवतीतिभावः कथंचिदपिव्याप्यतावच्छेदकधूमत्वादेर्भानम्परामर्शेनसम्भवतीति ''ति तस्मादिति॥
स्फोरणायशाब्देतिलाघवेनेति कल्पनालाघवेनेत्यर्थः तथाहिज्ञानद्वयेऽनन्यथासिद्धत्वनियतपूर्ववृत्तित्वयोःक
ल्पनापेक्षयाविशिष्टपरामर्शेतत्कल्पनस्यैवलघीयस्त्वमिति वस्तुतस्तु तद्धर्मावच्छिन्नविशेष्यकव्याप्तिप्रकारकनिश्च
यविशिष्टतद्धर्मावच्छिन्नप्रकारकपक्षतावच्छेदकावच्छिन्नविशेष्यकनिश्चयत्वस्यैवकारणतावच्छेदकत्वंज्ञा एम: २
नद्वयसाधारण्यानुरोधेनतेनमन्तव्यम् नैयायिकमतेतुव्याप्तिविशिष्टवैशिष्ट्यावगाहिति श्रयत्वंकारणताव
च्छेदकमितिकारणतावच्छेदकलाघवमवधेयम् विनिगमनाविरहेणज्ञायमानलिङ्गत्वेनापिकारणत्वद

नामाचार्याणांमतंनिरस्यति लिङ्गंन्तकारणमिति व्यभिचारादिति तत्राप्यनुमितेरनुभवसिद्धत्वेनतदव्यवहितपूर्वं
म्भूतभविष्यत्धूमादेरसत्वादितिभावः मतइति फलायोगव्यवच्छिन्नङ्कारणमितिमतेतुपरामर्शएवकारणमिति
ध्येयम् कारणेऽतिव्याप्तिवारणायतज्जन्यत्वेसतीति ॥ यद्यप्यनुमाननिरूपणस्यैवप्रतिज्ञातत्वेनतद्विभागएवो
चितस्तथापिलिङ्गस्यत्रैविध्यप्रदर्शितेनज्ञानस्यत्रैविध्यम्फलतीतिमनसिकृत्याहलिङ्गंन्त्विभजतइति अन्वये

लिङ्गंन्त्विभजतेलिङ्गमिति अन्वयव्यतिरेकिणंलक्षयति अन्वयेनेति हेतुसाध्ययोर्व्याप्तिरन्वयव्या॰
प्तिस्तदभावयोर्व्याप्तिर्व्यतिरेकव्याप्तिः केवलान्वयिनोलक्षणमाह अन्वयेति ॥ ९ ॥ ॥

स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्शएवकरणम् तस्माल्लिङ्गपरामर्शोनुमान
म् लिङ्गंत्रिविधं अन्वयव्यतिरेकिकेवलान्वयिकेवलव्यतिरेकिचेति अन्वयेनव्यति
रेकेणचव्याप्तिमदन्वयव्यतिरेकि यथावह्नौसाध्येधूमवत्वम् यत्रधूमस्तत्राग्निरित्यन्वय
व्याप्तिः यत्राग्निर्नास्तितत्रधूमोपिनास्तियथामहाह्रदइतिव्यतिरेकव्याप्तिः अन्वयमा॰
॰त्रव्याप्तिकङ्केवलान्वयि

= केवलान्वयिसाध्यकंलिङ्गंकेवलान्वयि अत्यन्ताभावाप्रतियोगित्वं
केवलान्वयित्वम् केवलान्वयिनमुदाहरति॥ ॰अव्यतिरेकेणचव्याप्तिमदिति मूलस्यान्वयसहचारग्रह
ग्राह्यव्याप्तिमत्वेसतिव्यति = = = रेकसहचारग्रहग्राह्यव्याप्तिमदित्यर्थम्मनसिकृत्यतादृशव्याप्तिरूप॰
म्प्रकाशयति हेतुसाध्ययोरिति. अन्वयमात्रव्याप्तिकत्वरूपकेवलान्वयिलक्षणेमात्रपदेनव्यतिरेकव्याप्तेर्व्य

त·दी· वच्छेद्यतयासिद्धिसिद्धिभ्यांव्याघातदूत्यालोच्यप्रकारान्तरेणपरिष्करोति केवलान्वयिसाध्यकमिति केवलान्वयिसाध्यकव्य
नी· तिरेकहेतोस्सङ्ग्रहायसाध्येकेवलान्वयित्वंनिवेशितन्तदेवनिर्वक्ति अत्यन्ताभावेति निरवच्छिन्नवृत्तिमदत्यन्ताभावेत्य
२८ र्थः तेनगगनाभावसंयोगाभावादिसाध्यकहेतोस्सङ्ग्रहः घटपदाद्यभिधेयत्वस्यपटादावसत्त्वेनसर्वत्रसत्त्वासम्भ
वादाह सर्वपदाभिधेयमिति मूलेव्यतिरेकमात्रव्याप्तिकमिति निश्चितव्यतिरेकव्याप्तिमात्रकमित्यर्थः तेनपृथि
वीतरेभ्योभिद्यतेगन्धवत्वादित्यादावन्वयव्याप्तेस्सत्वेपिनलक्षणासङ्गतिः इतरभेदः पृथिवीतरत्वावच्छिन्नप्रति

घटोभिधेयःप्रमेयत्वादिति ईश्वरप्रमाविषयत्वंसर्वपदाभिधेयत्वञ्चसर्वत्रास्तीतिव्यतिरेकाभावः केवल

यथाघटोभिधेयःप्रमेयत्वात् पटवत् अत्रप्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति स
र्वस्यैवप्रमेयत्वादभिधेयत्वाच्च॥ ॥व्यतिरेकिणोलक्षणमाह व्यतिरेकेति केवलव्यतिरेकिणमु

योगिताकभेदः अन्वयित्वमिति अन्वयसहचारग्रहग्राह्यव्याप्तिमत्वंस्यादित्यर्थः तथा ॥दाहरति पृथिवीति
चप्रसिद्धानुमानमिवैतदप्यन्वयव्यतिरेक्येवस्यादितिभावः असाधारण्यमिति सपक्षव्यावृत्तित्वरूपासाधारणल
क्षणाक्रान्तत्वादितिभावः अप्रसिद्धसाध्यकेपिसाध्यविशेषणकानुमितिरेवेत्यभिप्रायेणाह साध्येत्यादिव्यतिरे एभः
कव्याप्तीति· साध्याभावव्यापकाभावप्रतियोगित्वरूपेत्यर्थः पृथिवीइतरसामान्यभेदोनसाध्यतेपितुजलादिभे २८
दकूटंसाध्यंतेनतथाचनोक्तदोषावसरइत्याह जलादीति जलादीनांयत्त्रयोदशान्योन्याभावास्तेषाङ्कूटसाध्यतद
त्यर्थः समुदायस्यप्रसिध्यसम्भवादाह प्रत्येकमिति त्रयोदशत्वावच्छिन्नेति॥ ॥

अनुमितेः पूर्वन्निश्चितसाध्यतावच्छेदकावच्छिन्नवत्तोर्धर्मिणएवाप्रसिद्यानतत्र हेतोस्सत्वासत्वनिवन्धने अन्वयित्वासाधार
ण्येइतिसमुदितार्थः प्रत्येकप्रसिद्धावपेक्षाबुद्धिविशेषविषयत्वरूपसमुदायत्वविशिष्टज्ञानंसम्भवति तथाचविशेषा
णतावच्छेदकप्रकारकनिर्णयस्यसद्भावात् साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाह्यनुमितिर्व्यतिरेकव्याप्तिज्ञानञ्च
सम्भवतीत्याह प्रत्येकाधिकरणेत्यादिनायद्यपिजलादिचतुर्दशान्योन्याभावानाञ्चतुर्दशसुप्रत्येकमितिरीत्यावत्तुमु
नञ्चितरभेदः प्रसिद्धोनवाआधेयत्रप्रसिद्धस्तत्रहेतुसत्वेऽन्वयित्वम् असत्वे साधारण्यम् द्वितीयेसाध्य
ज्ञानाभावात्कथन्तद्विशिष्टानुमितिः विशेषणज्ञानाभावेविशिष्टज्ञानानुदयात् प्रतियोगिज्ञानाभावाद्व्यतिरे
कव्याप्तिज्ञानमपिनस्यादितिचेन्न जलादित्रयोदशान्योन्याभावानांत्रयोदशसुप्रत्येकम्प्रसिद्धानांमेलनंए

व्यतिरेकमात्रव्याप्तिकंकेवलव्यतिरेकि यथापृथिवीतरेभ्योभिद्यतेगन्धवत्वात् यदितरेभ्यो
नभिद्यतेनतद्गन्धवत् यथाजलमनचेयन्तथा तस्मान्नतथेति अत्रयद्गन्धवत्तदितरभिन्न
मित्यन्वयदृष्टान्तोनास्ति पृथिवीमात्रस्यपक्षत्वात्॥ पृथिव्यांसाध्यतेत्रयोदशत्वावच्छिन्नसाध्य
स्यैकाधिकरणवृत्तित्वाभावान्नान्वयित्वासाधारण्येप्रत्येकाधिकरणप्रसिद्ध्यासाध्यविशिष्टानुमितिः साध्या
भावव्यापकीभूताभावप्रतियोगित्वमितिव्यतिरेकव्याप्तिनिरूपणञ्च यदितरेति॥ चितन्तथापिअर्थापत्तेःप्र
माणान्तरत्वमङ्गीकुर्वन्तम्प्राभाकरमाक्षेप्तुम्व्यतिरेकव्याप्तेरनुमित्यंगत्वस्यप्रदर्शनीयतयातन्मतसाधारण्येनव्यति
रेकव्याप्तिम्प्रदर्शयितुञ्जलादित्रयोदशान्यादिकथनम् नचतन्मतेजलादिचतुर्दशान्योन्याभावाप्रसिद्धाः अभावस्या
धिकरणानात्मकस्यतेनानङ्गीकारादितिध्येयम् केचित्तु जलमेवादियेषांत्रयोदशानामितिविग्रहेण जलादि प्रतियोगि

कानाञ्चतुर्दशानामन्योन्याभावानामित्यर्थः त्रयोदशास्वि
ति जलादीत्याद्युक्तविग्रहेण चतुर्दशास्वित्यर्थः अग्रेप्येवं
॥बोध्यमित्याहुः॥

वह्न्यभावावावतिव्याप्तिः वह्न्यभाववान्ह्रद इत्याकारकयथार्थज्ञानविषयत्वस्य॥

मूले सन्दिग्धसाध्यवानिति विशेष्यतासम्बन्धेन साध्यप्रकारकसंशयविशिष्ट इत्यर्थः सपक्षलक्षणादिकमप्येवमेवप[illegible]
म् पक्षलक्षणस्याव्याप्तिमाशङ्कते दीपिकायामनन्विति संशयविघटकशब्दसिद्धिस्थलेऽव्याप्तिमुक्त्वा प्रत्यक्षस्थलेऽपिता
माह किञ्चेति उक्तेति सिसाधयिषाविरहविशिष्टसिद्ध्यभावरूपपक्षताश्रयत्वस्य पक्षलक्षणत्वादित्यर्थः सद्धेतून्निरू-
प्येति व्याप्त्यादिविशिष्टहेतून्निरूप्येत्यर्थः सद्धेतुनिरूपणेऽसद्धेतोस्स्मरणात्प्रसङ्गसङ्गत्यानन्तरनिरूपणमिति भावः मूले
हेत्वाभासा इति हेतुवदाभासन्त इति हेत्वाभासाः दुष्टहेतवो निरूप्यन्त इत्यर्थः ननु सामान्यधर्मप्रकारकज्ञानमन्तरा विशे
षजिज्ञासानुदयेन सव्यभिचारेत्यादिना विभागोऽनुचित इत्याशंकामपनिनीषुर्दोषलक्षणेऽभिहिते दोषवत्त्वरूपदुष्टल

पक्षलक्षणमाह सन्दिग्धेति ननु श्रवणानन्तरभाविमननस्थलेऽव्याप्तिस्तत्र वेदवाक्येनात्मनो निश्चि

**सन्दिग्धसाध्यवान्पक्षः यथा धूमवत्त्वे हेतौ पर्वतः निश्चितसाध्यवान्सपक्षः यथा तत्रैव महानसम् निश्चितसाध्याभाववान्विपक्षः यथा तत्रैव महाह्रदः॥**

ऽतत्वेन सन्देहाभावात् कि
ञ्च प्रत्यक्षेऽपि वह्न्युपपत्तेश्छ्रयानुमितिस्तत्राव्याप्तिरिति चेन्न उक्तपक्षताश्रयत्वस्य पक्षलक्षणत्वान्सप
क्षणस्यातिस्फुटत्वाद्व्याभोभवतीत्याशयेन दोषसामान्यलक्षणमाह अनुमितीति हेत्वाभासत्वमिति ''क्षलक्षणमाह
हेतोराभासा हेत्वाभासाः हेतुनिष्ठा दोषास्तेषामभावस्तत्त्वमित्यर्थः ह्रदो वह्निमानित्याद्यनुमितिप्रतिवह्न्यभाववान्ह्रद इत्या
दिबाधनिश्चयस्य प्रतिबन्धकतया प्रमात्मकतादृशनिश्चय विषयत्वस्य वह्न्यभाववद्ध्रदादावक्षतमिति लक्षणसमन्व
यः तत्रानुमितिपदमजहल्लक्षणयाऽनुमितितत्करणान्यतरपरं तेन व्यभिचारादिज्ञानस्य परामर्शप्रतिबन्धकतयैव निर्वा
हाद अनुमित्यप्रतिबन्धकत्वेऽपि व्यभिचारादिषु नाव्याप्तिः पर्वतो निर्वह्निरिति बाधभ्रमस्य पर्वतो वह्निमानित्यनुमितिप्रतिबन्ध

न्तान्तद्विषयवह्न्यभावावावति व्याप्तिरतो यथार्थेति भ्रम
भिन्नेत्यर्थः अथैवमपि वह्न्यभाववद्ध्रदात्मकबाधैकदेशे

तत्रसत्वादितिचेन्न यद्रूपावच्छिन्नविषयकज्ञानसामान्यमनुमितिप्रतिबन्धकनद्रूपावच्छिन्नत्वन्दोषत्वमित्यर्थपर्यव
सानेनादोषात् वह्न्यभाववत्वावच्छिन्नविषयकस्यवह्न्यभाववान्ह्रद इति ज्ञानस्यानुमितिप्रतिबन्धकत्वेपिताद्दशसामान्याना
गेनस्यवह्न्यभावद्रूत्याकारकज्ञानस्याप्रतिबन्धकत्वेनवह्न्यभाववत्वादेर्यद्रूपपदेनोपादानासम्भवात् नचतर्हि यथार्थप
दम्यर्थम्यर्वनोनिर्वह्निरितिभ्रमविषयेवह्न्यभावादावतिव्याप्तेरुक्तरीत्यैववारणसम्भवादितिवाच्यम् ज्ञानपदस्यज्ञा
नविशेषतात्पर्यग्राहकतयायथार्थपदसार्थक्यात् एवञ्चयद्रूपावच्छिन्नविषयकानाहार्याप्रामाण्यज्ञानानास्कन्दि
ननिश्चयसामान्यम्प्रत्यनानुमितिप्रतिबन्धकनद्रूपावच्छिन्नत्वन्दोषत्वमित्यर्थः पर्यवसितस्तेनवह्न्यभाववद्ध्रदविषय
निश्चितेति विपक्षलक्षणमाह निश्चितेति एवञ्चसद्धेतून्निरूप्यासद्धेतून्निरूपयितुम्विभजते सव्य

सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्चहेत्वाभासाः सव्यभिचारोऽनैकान्तिकः स
त्रिविधः साधारणासाधारणानुपसंहारिभेदात्॥

॥भिचारेति अनुमितिप्रतिबन्धकयथार्थज्ञा
नविषयत्वंहेत्वाभासत्वम् सव्यभिचारम्विभजते सत्रिविधइति॥ ॥कस्याहार्यस्याप्रामाण्यज्ञानविशिष्टज्ञा
नस्यसंशयस्यवानुमित्यप्रतिबन्धकत्वेपिनासम्भवइत्यलम्पल्लवितेन परेतुइदन्दुष्टानामेवलक्षणम्परन्तुज्ञायमान
व्यभिचारादेः प्रतिबन्धकत्वमभ्युपेत्यतदर्थत्वनुमितिप्रतिबन्धकायेव्यभिचारादय एकज्ञानविषयप्रकृतहेतुना
वच्छेदकत्वसम्बन्धेनतत्प्रकारकयथार्थज्ञानविशेष्यत्वं धूमवान्वह्नेरित्यादौ धूमाभाववद्वह्नित्वविशिष्टव ह्निर्व्य
भिचारः उक्तसम्बन्धेनतद्वान्वह्निरित्याकारकयथार्थज्ञानविशेष्यत्वमस्तीतिलक्षणसमन्वयः अनुमितिपदस्यप्रकृ
तानुमितिपरत्वासद्धेतावनुमितिप्रतिबन्धकीभूतव्यभिचारादीनामप्रसिद्ध्यानातिव्याप्तिः यथार्थपदादानेदर्शितस

त·दी· मूलेतत्रेति साधारणादिषु मध्य इत्यर्थः साध्याभाववद्वृत्तिरिति साध्यतावच्छेदकधर्मसम्बन्धावच्छिन्नप्रतियोगिताकाभा
नी· ववन्निरूपितहेतुतानवच्छेदकसम्बन्धावच्छिन्नाधेयताव इत्यर्थः तेन वह्निमान् धूमादित्यादौ हेतुमति पर्वतादौ ~
३० तत्तत्साध्याभावस्य सम्बन्धा ताऽवच्छिन्नसामान्याभावस्य च सत्त्वेपि साध्याभाववति धूमावयवादौ समवायादिना धूमा
देर्वृत्तित्वेपि च नातिव्याप्तिः अत्र च साध्याभाववत्तायां सम्बन्धविशेषावच्छिन्नत्वानिवेशे वह्निमान् धूमादित्यादौ वह्न्याद्य।

साधारणं लक्षयति तत्रेति उदाहरति यथेति असाधारणं लक्षयति सर्वेति अनुपसंहारिणो ल

तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः यथा पर्वतोऽग्निमान् प्रमेयत्वादिति प्रमे
यत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात् सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसा
धारणः यथा शब्दोऽनित्यः शब्दत्वादिति शब्दत्वं हि सर्वेभ्यो नित्येभ्योऽनित्येभ्यो व्यावृ
त्तं शब्दमात्रवृत्तिः अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी ॥ ५ ॥ ६ ॥

क्षणमाह अन्वयेति ॥ विरुद्धं लक्षयति साध्येति ॥ ऽऽभावस्य कालिकादिसम्बन्धेन पर्वतादौ वृत्तेरतिव्या
प्तिः दैशिकविशेषणताविशेषावच्छिन्नत्वनिवेशे घटत्वाभावादिसाध्यकव्यभिचारिणि साध्याभावस्य घटत्वादे
र्विशेषणताविशेषेणाधिकरणाप्रसिद्ध्याव्याप्तिरतः साध्यतावच्छेदकसम्बन्धेन साध्यवत्ताग्रहं प्रति येन सम्बन्धेन साध्या
भाववत्तानिश्चयः प्रतिबन्धकस्तेन सम्बन्धेन साध्याभाववत्त्वं विवक्षणीयं वह्न्यादौ साध्ये तादृशसम्बन्धो दैशिक
विशेषणघटत्वाभावादौ च साध्ये समवायस्तथेति न दोषः कपिसंयोग्येतद्वृक्षत्वादित्यादौ तादृशसम्बन्धो निरव
च्छिन्नदैशिकविशेषणतेति दिक् न च विरुद्धेऽतिव्याप्तिरिति भ्रमितव्यम् उपधेयसङ्करेप्युपाधेरसङ्करादिति

...यपेन तस्य विरुद्धसाधारणेपि क्षतिविरहात् एवं सपक्ष ॐ
व्यावृत्तद्वृत्ति सपक्षवृत्तित्वावच्छिन्नाभाववान् नित्य
एमः
३०

सर्वपदंसपक्षवृत्तित्वसामान्याभावनिवेशस्फोरकंसपक्षपदनिश्चितसाध्यवदर्थकंशब्दोऽनित्यःसाधकशब्दत्वादित्सद्धेता
वपिपक्षेसाध्यसन्देहदशायामसाधारण्यस्येष्टत्वादितिसम्प्रदायविदःनवीनास्तुसद्धेतावपिपक्षेसाध्यसन्देहदशाया
मसाधारण्यस्यप्रकृतपरामर्शकालिकविरुद्धपरामर्शदशायांस त्प्रतिपक्षस्यचस्वीकारेवाधभ्रमदशायाम्बाधस्या
प्यङ्गीकारापत्तेःनहिवैषम्येयुक्तिम्पश्यामःएवञ्चात्रसपक्षपदंकेवलसाध्यवत्परम्‌ ॥ शब्दोऽनित्यश्चाक्षुषत्वादित्य

॥

सत्प्रतिपक्षंलक्षयति यथेति ॥ ॥

यथासर्वमनित्यम्प्रमेयत्वादिति अत्रसर्वस्यापिपक्षत्वाद्दृष्टान्तोनास्तिसाध्याभावव्याप्तो
हेतुर्विरुद्धः यथाशब्दोनित्यःकृतकत्वादिति कृतकत्वंहिनित्यत्वाभावे
नानित्यत्वेनव्याप्तम्‌ यस्यसाध्याभावसाधकंहेत्वन्तरंससत्प्रतिपक्षः यथाशब्दोनित्यःश्रा
वणत्वाच्छब्दत्ववत्‌ शब्दोऽनित्यःकार्यत्वात्‌ घटवदिति असिद्धस्त्रिविधः ॥ ९ ॥

॥ ॥ ॥दिसाध्यवद्वृत्तिहेतोरेवल

असिद्धंविभजते असिद्धइति॥२१

क्ष्यतेतिनकोपिदोषइतिप्राहुःअन्वयव्यतिरेकदृष्टान्तरहितइतितत्त्वञ्चकिञ्चिद्विशेष्यकनिश्चयाविषयसाध्यकत्वे
सतिकिञ्चिद्विशेष्यकनिश्चयाविषयसाध्याभावकत्वम्‌ नवीनमतेतुअत्यन्ताभावाप्रतियोगित्वविशिष्टसाध्यादि
प कमेवानुसंहारित्वन्तत्‌ ज्ञानस्यव्यतिरेकव्याप्तिग्रहप्रतिबन्धकतासाध्याभावव्याप्तइति साध्याभावव्याप्तिःसाध्य
वद्वृत्तित्वंअसाधारणस्यतुनिश्चितसाध्यवद्वृत्तित्वरूपतयानाभेदः नवीनमतेतुसाध्याभावस्यव्यतिरेकव्या

प्तिस्साध्यव्यापकाभावप्रतियोगित्वरूपेतिनासाधारण्याभेदः एतादृशव्याप्तिविशिष्टहेतुमत्ताज्ञानंसाक्षादनुमितिप्रतिबन्धकमितिध्येयम् यस्यसाध्याभावेत्यादि यत्सम्बन्धियत्साध्यतदभावव्याप्यहेत्वन्तरस्यज्ञानम्पक्षेऽस्तिससत्प्रतिपक्षइत्यर्थः प्रकृतसाध्यव्याप्यत्वेनज्ञायमानोयः प्रकृतहेतुस्ततोऽन्यस्मिन्हेतौसाध्याभावव्याप्यत्वंज्ञानदशायामेवतस्यसत्प्रतिपक्षतेतिसूचनायहेत्वन्तरेतीतिप्राञ्चः नवीनाः पुनरेवम्वर्णयंतियत्सम्बन्धिसाध्याभावव्याप्यहेत्वन्तरस्यस

आश्रयासिद्धमुदाहरति गगनेति ॥ ॥ ॥ ॥ ॥

आश्रयासिद्धस्स्वरूपासिद्धोव्याप्यत्वासिद्धश्चेति आश्रयासिद्धोयथागगनारविन्दंसुरभि अरविन्दत्वात्सरोजारविन्दवदिति अत्रगगनारविन्दमाश्रयसस्चनास्त्येवंरूपासिद्धो ह यथाशब्दोनित्यश्चाक्षुषत्वाद्रूपवदिति अत्रचाक्षुषत्वंपक्षेनास्तिशब्दस्यश्रावणत्वात्

स्वरूपासिद्धमुदाहरति शब्दइति ॥ ॰ ॥ ॥ ॰ ॥ ॰ ॥

त्वम्पक्षेसतथाविधइत्यर्थः आश्रयासिद्धो यथेति आश्रयासिद्धिश्चपक्षेपक्षतावच्छेदकविरहः पक्षतावच्छेदकविरहवान्पक्षोवासचनास्त्येवेति अरविन्दस्यप्रसिद्धत्वात् सविशेषणेहीतिन्यायेनारविन्देगगनीयत्वन्नास्तीति पर्यवसितोऽर्थः स्वरूपासिद्धिश्चपक्षेहेत्वभावोहेत्वभाववान्पक्षोवा ॥ ॥ ॥

ननुसोपाधिकस्यातिरिक्तस्यसद्भावात्कथमस्यहेत्वाभासाद्युत्पन्नत्राह सोपाधिकइति व्याप्यत्वसिद्धिःव्याप्त्यभावः नस्या
त्सोपाधिकहेतौनियमेनसत्वात्सोपाधिकोव्याप्यत्वासिद्धएवनत्वतिरिक्तोहेत्वाभासइतिभावः उपाधेर्दोषत्वमसम्भवीति
दीपिकायांव्यक्तीभविष्यत्यग्रे अत्रेदमवधेयंसाध्येसाध्यतावच्छेदकाभावः साध्याप्रसिद्धिः हेतौहेतुतावच्छेदकाभावःसा
धनाप्रसिद्धिः यथाकाञ्चनमपवह्निमान्काञ्चनधूमादित्यादौनह्रदहदशायांहेतुतावच्छेदकविशिष्टेसाध्यतावच्छेदकवि

व्याप्यत्वासिद्धस्यलक्षणमाह सोपाधिकइति उपाधेर्लक्षणमाह साध्येति उपाधिश्चतुर्विधः केवलसाध्यव्या
पकः पक्षधर्मावच्छिन्नसाध्यव्यापकः साधनावच्छिन्नसाध्यव्यापकः उदासीनधर्मावच्छिन्नसाध्यव्यापक
श्चेति आद्यआर्द्रेन्धनसंयोगः द्वितीयोयथावायुःप्रत्यक्षःप्रमेयत्वादित्यत्रवहि द्रव्यत्वावच्छिन्नप्रत्यक्षा-

सोपाधिकोव्याप्यत्वासिद्धः साध्यव्यापकत्वेसतिसाधनाव्यापकत्वमुपाधिः साध्यसमानाधि
करणात्यन्ताभावाप्रतियोगित्वंसाध्यव्यापकत्वम् साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वंसा
धनाव्यापकत्वम् यथापर्वतोधूमवान्वह्निमत्वादित्यत्रार्द्रेन्धनसंयोगउपाधिस्तथाहि यत्र
धूमस्तत्रार्द्रेन्धनसंयोगइतिसाध्यव्यापकत्वम्॥

ऽऽत्वव्यापकमुद्भूतरूपवत्वम् तृतीयोयथाध्वंसाभा
वोविनाशीजन्यत्वादित्यत्रजन्यत्वावच्छिन्नानित्यत्वम्भावत्वम् चतुर्थस्तुप्रागभावोविनाशीप्रमेयत्वादित्यत्रज ३२
शिष्टव्याप्तिग्रहप्रतिबन्धःफलंतयोर्व्याप्यत्वासिद्धावन्तर्भावान्नहेत्वाभासाधिक्यमितिसाध्यव्यापकऽऽन्यत्वावच्छिन्ना
त्वसाधनाव्यापकत्वेएकरूपेणएकसम्बन्धेनचग्राह्येतेनवह्निमानधूमादित्यादौनतद्द्वौवह्नित्वेनसाध्यव्यापकस्यतत्तद्वह्नित्वेन
चसाधनाव्यापकत्वस्यसत्वेपिआलोकेसंयोगेनसाध्यव्यापकत्वस्यसमवायेनचसाधनाव्यापकस्यसत्वेपिचनातिव्याप्तिः

त·दी·
नी·
२२

मूलोक्तोपाधिलक्षणस्याव्याप्तिम्वारयितुं लक्ष्यलक्षणभेदम्प्रदर्शयति उपाधिश्चतुर्विध इति पक्षधर्मविशिष्टसाध्यव्या
पकत्वेन तद्धर्मविशिष्टसाधनाव्यापकत्वं लक्षणे निवेशनीयमन्यथा पर्वतत्वात्मकपक्षधर्मविशिष्टवह्निव्यापका-
त्वस्य कस्यचिदु मत्त्वावच्छिन्नाव्यापकत्वादतिव्याप्तिः स्यादिति ध्येयम् ॥७॥ उदासीनेति पक्षधर्मसाधनधर्मा-
भ्यामभिन्नेत्यर्थः वह्निर्द्रव्यत्वम् आत्मान्यद्रव्यत्वमिदं केवलप्रत्यक्षत्वस्यैव साध्यत्वानुसारेण प्रागभावो विनाशी
जन्यत्वादिति अत्र जन्यत्वम्पक्षधर्मो न भवतीति साधनावच्छिन्नसाध्यव्यापकत्वघटितलक्षणम् अनित्या-
नित्यत्वव्यापकम्भावत्वम् वाधितलक्षणमाह यस्येति अत्र वाधस्य ग्राह्याभावनिश्चयत्वेन सत्प्रति

यत्र वह्निस्तत्रार्द्रेन्धनसंयोग इति नास्ति अयोगोलके आर्द्रेन्धनाभावात् एवं साध्यव्याप
कत्वे सति साधनाव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः सोपाधिकत्वाद्वह्निमत्त्वम्व्याप्यत्वासि
॥द्धम् यस्य साध्याभावः प्रमाणान्तरे

पक्षस्य विरोधिज्ञानसामग्रीत्वेन साक्षादनुमितिप्रतिवन्धकत्वम्
इतरेषाम्परामर्शप्रतिवन्धकत्वम् तत्रापि साधारणस्याव्यभिचाराभाव

॥त्वव्यापकमिति विनाशीत्वव्याप
कत्वमित्यर्थः जन्यत्वस्योदासीनत्वं संपादयितुमप्रेप्सत्वादिति वाधस्य साध्याभाववत्तानिश्चयस्य ग्राह्याभावनिश्च
यत्वेनेति अनुमितिप्रतिवन्धकत्वमित्यनेनान्वयि विरोधिज्ञानसामग्रीत्वेनेति इदम्प्राचीनमते वस्तुतस्तु विरोधिपरा
मर्शस्य साध्याभावव्याप्यवत्तानिश्चयत्वेनैव प्रतिवन्धकत्वं लाघवात् इतरेषाम् व्यभिचारादिग्रहाणाम् तत्रापि व्य
भिचारादिग्रहेष्वपि साधारणस्येति भावप्रधाननिर्देशतया साधारण्यस्येत्यर्थः अव्यभिचाराभावत्यात्तदाह स्येति

रामः
२२

Digitized by Google

व्याप्तिज्ञानप्रतिबन्धकत्वमित्यनेनान्वयः एवमग्रेपि हेतौ साध्याभाववद्वृत्तित्वस्यैव साध्यतावच्छेदके हेतुसमानाधिकरणा
त्यन्ताभावप्रतियोगितावच्छेदकत्वस्यापि व्यभिचारतया तद्ग्रहस्य हेतुसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदक
त्वाभावरूपो योऽव्यभिचारः तद्ग्रहप्रतिबन्धकत्वमिति भावः हेतौ साध्याभाववद्वृत्तित्वप्रकारकग्रहस्य व्याप्तिग्रहप्रति
बन्धकत्वं नु मणिमन्त्रादिन्यायेन विशिष्टव्याप्यभाववत्तया हेतुव्यापकतावच्छेदकसाध्यतावच्छेदकावच्छिन्नसामा

वत्तया विरुद्धस्य सामानाधिकरण्याभाववत्तया व्याप्यत्वासिद्धस्य विशिष्टव्याप्यभाववत्तयाऽसाधारणा

णनिश्चितस्स बाधितः यथा वह्निरनुष्णो द्रव्यत्वादिति ॥

नुपसंहारिणोर्व्याप्तिसंशयाधायकत्वेन व्याप्तिज्ञानप्रतिबन्धकत्वम् आश्रयासिद्धस्वरूपासिद्धयोः पक्ष

नाधिकरण्याभावरूपतया व्याप्तिसंशयाधापकत्वेनेति हेतावसाधारण्यादिऽऽधर्मताज्ञानप्रतिबन्धकत्वम् ॥
॥ ॐ ॥ ज्ञानदशायां हेतुसाध्ययोः सामानाधिकरण्यनिश्चयासम्भवेन पक्षान्तर्भावेन च साध्यसंशयसत्त्वेन व्याप्तिसंशयसंभ
वान्न व्याप्तिनिश्चय इति प्राचीनमतमभिप्रेत्येदम् पक्षधर्मताज्ञानबन्धकत्वमिति पक्षे पक्षतावच्छेदकविरहस्य च निश्च
यदशायां हेतौ पक्षतावच्छेदकविशिष्टपक्षवृत्तित्वग्रहासंभवादिति भावः ननु पक्षत्वोक्तिरसङ्गता हेतावुपाधिग्रहदशा
यामपि व्याप्तिनिश्चयासम्भवेनोपाधिज्ञानस्य व्याप्तिनिश्चयप्रतिबन्धकतया त्रावश्यम्वक्तव्यतयोपाधेरपि हेत्वाभासलक्ष
णाक्रान्तत्वादत आह ॥

त॰ दी॰ उपाधिस्तु इति व्यभिचारज्ञानद्वारेति तथाच हेत्वाभासलक्षणे साक्षादनुमितितत्करणान्यतरप्रतिबन्धकत्वस्यैव निवेशनीयत
नी॰ या परमुखनिरीक्षकस्योपाधेर्न हेत्वाभासत्वमिति भावः ननु तथापि सिद्धिसत्त्वेऽनुमित्यनुदयात्तद्विषयस्य साध्यवत्पक्षस्यापि
३४ हेत्वाभासत्वमावश्यकमित्याशंकामरुचेर्नैयायिकमतमवलम्ब्येष्टापत्त्या परिहरति सिद्धसाधनन्त्विति पक्षताविघटकतये
ति तन्मते पक्षतायाः साध्यसंशयरूपतया तद्विघटकत्वं साध्यनिश्चयस्याक्षतमिति भावः अन्तर्भवतीति तथाच न विभा
गव्याघात इति भावः दर्शितमतमतिशिथिलमित्यालोच्याह निग्रहेति नच सिद्धान्तेऽनुमितिम्प्रति सिद्धेः प्रतिबन्धकत

उपाधिस्तु व्यभिचारज्ञानद्वारा व्याप्तिज्ञानप्रतिबन्धकः सिद्धसाधनन्तु पक्षताविघटकतया आश्रयासि

अत्रानुष्णत्वं साध्यं तदभाव उष्णत्वं स्पर्शनप्रत्यक्षेण गृह्यत इति बाधितत्वम् व्याख्यातम

द्धेऽन्तर्भवतीति प्राञ्चः निग्रहस्थानान्तरमिति नवीनाः ॥ इति तर्कदीपिकायामनुमानं ऽनुमानम्

मान तद्विषयस्य कथं हेत्वाभासतेति वाच्यम् सिसाधयिषायाः सिद्धिनिष्ठप्रतिबन्ध ऽसमाप्तम् ॥
कतायामुत्तेजकतया केवलं सिसाधयिषासहितसिद्धौ प्रतिबन्धकत्वाभावेन तद्विषये उक्तहेत्वाभासलक्षणासंस्पर्शादि
ति अधिकमस्मदीयाभिनवदीधितिव्याख्यायां तर्ककर्कशविचारचातुरीधुरीणैरनुसन्धेयम् ॥ ॥ इति तर्कसङ्ग्रह एमः

॥ दीपिकाप्रकाशे भगवदर्पिते अनुमानपरिच्छेदः समाप्तः ॥ ३२

उपमानंलक्षयतीति अवसरसंगत्योपमानंनिरूपयतीत्यर्थः उपमितिस्वरूपंव्युत्पादयतिमूले संज्ञेति संज्ञागवयपदंसं ज्ञीगवयस्तयोः संबंधःशक्तिस्तज्ज्ञानमित्यर्थः लक्षणंतूप मिनोमीत्यनुव्यवसायगम्योपमितित्वमेवेतिध्येयंवाक्यार्थं स्मरन् गोसदृशंपश्यतीति एतेनस्मरणंसादृश्यदर्शनजन्यमुद्बोधकांतरजन्यंवाउभयमपिसादृश्यदर्शनस्यसह कारिनतुसादृश्यदर्शनजन्यमेवस्मरणंसहकारीतिसूचितं प्रांचस्तुवाक्यार्थंस्मरन्नित्यत्रवर्त्तमानसामीप्येप्रत्ययः वाक्यार्थंस्मरिष्यन्नित्यर्थः एवंचवाक्यार्थस्मरणस्यसादृश्य दर्शनजन्यतालाभेनव्यापारतालाभइत्याहुः उप

**उपमानंलक्षयति उपमीतीति**

**उपमितिकरणमुपमानं संज्ञासंज्ञिसंबंधज्ञानमुपमितिः तत्करणंसादृश्यज्ञानं तथाहिकश्चिद्गवयशब्दवाच्यमजानन् कुतश्चिदारण्यकपुरुषाद्गोसदृशोगवयइति श्रुत्वा वनंगतोवाक्यार्थंस्मरन् गोसादृश्यंपश्यति तदनंतरमयंगवयशब्दवाच्यइत्युपमिति रुत्पद्यते इत्युपमानम् ॥**

मितीति तदनंतरमित्यादिसादृश्यदर्शनानंतरंगवयोगवयपदवाच्यइत्याकारिकागवयत्वरूपलघुधर्मधर्मितावच्छेदकोपमितिरुत्पद्यतइत्यर्थः इदमुपलक्षणं वैध र्म्यदर्शनेनाप्युपमितिरितिध्येयम् वैशेषिकास्तुपदवाच्यत्वव्याप्यसादृश्यादिपरामर्शात्पदवाच्यत्वस्यानुमितिरेवातोनोपमानंप्रमाणांतरमित्याहुः तच्चिंत्यंव्याप्तिज्ञानमंतरेणापि पदवाच्यत्वप्रमितेरनुभवसिद्धत्वादित्यन्यत्रविस्तरः इतितर्कसंग्रहदीपिकाप्रकाशेभगवदर्पितेउ

॥ पमानपरिच्छेदः समाप्तः ॥

शब्दं लक्षयतीति उपजीव्योपजीवकभावसंगत्या शब्दं निरूपयतीत्यर्थः अत्र ज्ञायमानशब्दस्य शब्दप्रमाणतया शब्देउप
मानोपजीवकत्वाभावादुपमितिशाब्दबोधरूपफलयोः संगतिर्बोध्या तथाहि शक्तिपरिछित्तिरेवोपमितिः तस्याश्च शाब्द
बोधोपजीव्यत्वेन फलयोरुपजीव्योपजीवकत्वसंभवः तादृशसंगतेश्च फलनिष्ठत्वे विषयाश्रयकरणत्वात्मकपरंप
रासंबंधेन करणनिष्ठत्वात्करणयोरनंतराभिधानप्रयोजकत्वं शब्दज्ञानस्य प्रमाणत्वांगीकर्तॄनवीनमते तूपमितेः

॥ शब्दं लक्षयति आप्तेति ॥

आप्तवाक्यं शब्दः आप्तस्तु यथार्थवक्ता वाक्यं पदसमूहः यथा गामानय शुक्लां दंडेनेति

॥ वाक्यं लक्षयति वाक्यमिति ॥

शक्तपदविषयकत्वेन शब्दप्रमाणतया तत्र चोपमानजन्यत्वस्याक्षततया स्वरूपयोरपि संगतिरिति मंतव्यम् ।
मूले आप्तवाक्यं शब्द इति शब्द इति लक्ष्यनिर्देशः प्रमाणशब्द इत्यर्थः आप्तवाक्यमिति लक्षणं भवती हि पयसा
सिंचतीत्यादि शब्दः आप्तोक्तवाक्यं न तु वह्निना सिंचतीत्यादि शब्दः तदुच्चारणकर्तुः यथार्थवक्तृत्वरूपाप्तत्वाभा
वात् प्रकृतवाक्यार्थगोचरयथार्थज्ञानजन्यवाक्यं प्रमाणशब्द इति तु निष्कर्षः वाक्यप्रयोगे वाक्यार्थज्ञानसंदे
॥ तुल्याग्रलक्षणसंगति स्फुटमेतच्छब्दमणौ ॥

मीमांसकमतनिरासत्वेनाग्रिममूलमवतारयितुंतन्मतसाधारण्येनशक्तिपदार्थमाह अर्थस्मृत्यनुकूलेतिशाब्दबोध
जनकार्थस्मृत्यनुकूलोघटादिपदघटादिरूपार्थयोः संबंधः शक्तिरित्यर्थः अनुकूलत्वमिह प्रयोजकत्वंनत्वकारणताव
च्छेदकेपदपदार्थसंबंधे व्याप्तंघटादिपदतदर्थयोरन्यसंबंधवारणायानुकूलांतविवक्षितार्थकंअन्यसंबंधज्ञानस्यार्थ
स्मृतिजनकत्वेपिशाब्दबोधजनकस्मृतिजनकत्वाभावात् अर्थस्मृत्यनुकूलत्वस्यादृष्टादिसाधारण्याद्विशेष्यमितिवो
ध्यम् पदार्थांतरमिति तत्तत्पदार्थंतावच्छेदकाभावकूटवदित्यर्थः तेनातिरिक्तपदार्थत्व स्यान्यमताप्रसिद्धत्वे
पिनव्याघातः अस्मात्पदादयमित्यादिमूलस्यएतत्पदजन्यबोधविषयोयमर्थइत्याकारकेश्वरेच्छाशक्तिरित्यर्थः न

पदलक्षणमाह शक्तमिति अर्थस्मृत्यनुकूलपदार्थसंबंधः साचपदार्थांतरमितिमीमांसकाः

शक्तंपदंअस्मात्पदादयमर्थोवोधव्यइतीश्वरसंकेतः शक्तिः

तन्निरासार्थमाह अस्मादितिडित्थादीनामिवघटादीनामपिसंकेतएवशक्तिः नतुपदार्थान्तरमि
॰॰त्यर्थः
तुपदार्थांतरमितिचेश्वरीयज्ञानस्येच्छायाः कृतेर्वाशक्तिरूपत्वमितिविनिगमनाविरहादतिरिक्तै
वशक्तिरितिवाच्यम् आधुनिकसंकेतस्येच्छारूपतयाशक्तेरपीच्छारूपत्वेसंकेतज्ञानस्यानुगतकार्यकारणभावः
संभवतिनान्यथेत्येवंविनिगमकसंभवेनेच्छायाएवशक्तित्वस्वीकारात् नचभगवदिच्छायाःसकलविषयिण्याःश
क्तित्वस्वीकारेघटवोधव्यत्वप्रकारकतदिच्छायाः पटेपिसत्वात्घटपदवाच्यत्वस्यातिप्रसंगः एवंगंगापदजन्यबोधवि
षयत्वप्रकारकेच्छायास्तीरेपिसत्वेनशक्त्यैवतद्बोधसंभवेलक्षणोच्छेदापत्तिरितिवाच्यं यतस्तत्तत्पदवाच्यत्वंतत्त
त्पदजन्यवोधविषयत्वप्रकारतानिरूपितेश्वरेच्छीयविशेष्यतावत्वंतादृशप्रकारतानिरूपितविशेष्यतासंबंधेन

नरिच्छावत्त्वं वा तथा च तादृशस्य घटपदवाच्यत्वस्य पटे ऽसत्त्वान्नातिप्रसंगः गंगादिपदजन्यत्वस्य बोधांशे बोधविषयत्व स्य च तीरांशे स्वातंत्र्येण भानमीश्वरेच्छायामुपेयते इत्थं च विशकलितभावस्थले निरूप्यनिरूपकभावापन्नविषय तायाश्च भावेन गंगादिपदजन्यत्वप्रकारतानिरूपितबोधविषयितानिरूपितविषयत्वप्रकारतानिरूपितविशेष्य तासंबंधेनेच्छावत्त्वस्य तीरे ऽसत्त्वेन न क्षतिरिति संक्षेपः विशिष्टे शक्तिं व्यवस्थापयितुं मीमांसकमतमुपन्यस्य दूषयति गवादीति विशेषणभूतजातिग्रहमंतरा विशिष्टग्रहासंभवेन विशिष्टे शक्तिकल्पनं न संभवति अतो जातिग्रहस्य प्रथममुपेक्षनत्वे जातावेव शक्तिकल्पनमुचितं लाघवात् इत्याह विशेषणतयेति प्रथममुपस्थि

गवादिशब्दानां जातावेव शक्तिः विशेषणतया जातेः प्रथममुपस्थितत्वात् व्यक्तिलाभस्त्वा क्षेपादिति केचित् तन्न गामानयेत्यादौ वृद्धव्यवहारेण सर्वत्रानयनादेर्व्यक्तावेव संभवेन जाति विशिष्टव्यक्तावेव शक्तिकल्पनात् ॥ ९ ॥

तत्वादिति विशिष्टग्रहात्पूर्वमवगतत्वादित्यर्थः कथं तर्हि व्यक्तिलाभ इत्यत आह व्यक्तीति आ क्षेपादिति अर्थापत्तिप्रमाणादित्यर्थः व्यक्तावेव संभवेनेति अनुपपत्तिप्रतिसंधानशून्यतादशायामपि व्यक्ति भानस्यानुभवसिद्धत्वेन चेत्यपि बोध्यं विशिष्टव्यक्तावेवेति एवकारेण केवलजातिकल्पनव्यवच्छेदः अत्रे दं बोध्यम् जातितद्विशिष्टतदाश्रयेषु शक्तिकल्पनीया पदार्थद्वयसंबंधस्य पदद्वयसमभिव्याहारलभ्यतेना न्यस्याशक्यस्य शाब्दबोधे भानासंभवादिति न व्याप्तुलक्ष्यतावच्छेदकत्वग्रहमात्रेण लक्ष्यतावच्छेदकस्य शाब्द बोधे भानं तथा शक्यतावच्छेदकत्वग्रहमात्रेण शक्यतावच्छेदकस्य शाब्दबोधे मानं संभवतीति शक्यतावच्छेदके

शक्तिग्रहश्च वृद्धव्यवहारेणेति शक्तिग्रहश्च वृद्धव्यवहारादिना भवतीत्यर्थः आदिना व्याकरणादिपरिग्रहः अतएवश
क्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च वाक्यस्य शेषाद्विवृत्तेर्वदंति सान्निध्यतः सिद्धपदस्य वृद्धा इत्य
भियुक्तोक्तिसंगच्छते व्याकरणात्प्रकृतिप्रत्ययादीनां शक्तिग्रहः उपमानाच्छक्तिग्रहस्तु अधस्ताद्दर्शितः अथैकदं
तहेरंबलंबोदरगजानन इति कोशादेकदंतादिशब्दाः गणेशत्वविशिष्टे शक्ता इत्यर्थकाद्गणेशत्वविशिष्टे शक्तिग्र
हः तत्रैकदंतादिशब्दानामेव पदार्थतया तेषां विभिन्नत्वेऽहं द्वोपपत्तिः कोकिलः पिकपदवाच्य इत्याप्तवाक्यात्पिक
पदस्य कोकिले शक्तिग्रहः व्यवहारतः शक्तिग्रहमुपपादयति व्युत्पित्सुरिति शक्तिग्रहेच्छावानित्यर्थः उत्तमवृद्धे
ति प्रयोजकवृद्धेत्यर्थः मध्यमवृद्धस्येति प्रयोज्यवृद्धस्येत्यर्थः गवानयनं दृष्ट्वा प्रवृत्तिमुपलभ्य चेत्यन्वयः उपल

शक्तिग्रहश्च वृद्धव्यवहारेण तथा हि व्युत्पित्सुर्बालो गामानयेत्युत्तमवृद्धवाक्यश्रवणानंतरं मध्यमवृ
द्धस्य प्रवृत्तिमुपलभ्य गवानयनं दृष्ट्वा मध्यमप्रवृत्तिजनकज्ञानस्यान्वयव्यतिरेकाभ्यां जन्यत्वं निश्चि
त्याश्वमानय गां बधानेति वाक्यान्तरे आवापोद्वापाभ्यां गोपदस्य गोत्वविशिष्टे शक्तिमश्वपदस्याश्वत्व

भ्येत्यस्यानुमायेत्यर्थः इयं क्रिया प्रयत्नपूर्विका विलक्षणक्रियात्वात् स्वीयक्रि ''विशिष्ट इति व्युत्पद्यते ॥
यावदित्यनुमानप्रयोगो बोध्यः प्रवृत्तिजनकज्ञानस्य घटानयनगोचरप्रयत्नजनकघटानयनज्ञानस्य वाक्यस्य
विशिष्टेऽर्थे शक्तिर्नकल्पनीया तादृशार्थस्य समभिव्याहारलभ्यत्वात् अनन्यलभ्यो हि शब्दार्थ इति न्यायादि
त्यभिसंधिमानाह अश्वमानयेत्यादि आवापोद्वापाभ्यामिति आवापः संग्रहः उद्वापस्त्यागः उत्पद्यत इति व्युत्प
त्याश्रयो भवतीत्यर्थः वाक्यशेषाद्यथा यवमयश्चरुर्भवतीत्यत्र यवशब्दः आर्यव्यवहाराद्दीर्घशूकविशिष्टस्य

वाचकः म्लेछव्यवहारात्कंगोर्वाचकोवेतिसंदेहेवसं तेसर्वसस्यानांजायते पत्रशातनं मोदमानाश्चतिष्टंतिपवाकणि शशालिनः इतिवाक्यशेषाद्दीर्घशूक विशिष्टेशक्तिनिर्णयः कंगौतुशक्तिभ्रमात्प्रयोगः विवरणाद्यथापचतिपाकं करोतीति यत्नार्थककरोतिनासर्वोख्यातव्याख्यानात् आख्यातस्ययत्नत्वविशिष्टेशक्तिग्रहः सिद्धपदसांनिध्याच्छ क्तिग्रहस्तुविकसितपद्मइत्याद्यग्रिमग्रंथएव स्फुटीभविष्यतीत्यलंपल्लवितेन॥ ॥ व्यवहारस्यकार्यपरत्वादितियो जनाकार्यपरत्वंचव्हतिसाध्यानयनादिरूपक्रियातात्पर्यकत्वंव्युत्पत्तिः शक्तिग्रहः व्यवच्छेद्यंस्फुटयति नसिद्देति

ननुसर्वत्रकार्यपरत्वाद्व्यवहारस्यकार्यवाक्यएवव्युत्पत्तिः नसिद्धाइतिचेन्नकाश्यांत्रिभुवनति लकोभूपतिः इत्यादौसिद्धेपिव्यवहारात् विकशितपद्मेमधूनिपिवतिमधुकरइत्यादौप्रसिद्धपद समभिव्यवहारेन् सिद्धेपिमधुकरादिव्युत्पत्तिदर्शनाच्चलक्षणापिशाब्दवृत्तिः शक्यसंबंधोलक्ष णागंगायांघोषइत्यत्रगंगापदवाच्य प्रवाहसंबंधादेवतीरोपस्थितौतीरेपिशक्तिर्नकल्प्यतेसैं धवादौलवणाश्वयोः परस्परसंबंधाभावान्नानाशक्तिकल्पनम्॥ ९ ॥ ॥

सिद्धेपिव्यवहारादिति तथाचसिद्धेपिशक्तिग्रहस्यावश्यकः अन्यथातत्रानुभवसिद्धस्यशाब्दबोधस्यापला पापत्तेरितिभावः तीरेपिशक्तिर्नकल्प्यतइति गंगापदस्येतिशेषः नन्वेवंसैंधवादिपदानांनानार्थकत्वानुप पत्तिः एकत्रशक्तिरन्यत्रलक्षणेत्येवनिर्वाहादतआह सैंधवादाविति आदिनाहर्यादिपरिग्रहः संबंधा भावादिति संयोगादिरूपसंबंधाभावादित्यर्थः इदमुपलक्षणंप्रसिद्धयोरर्थयोः कुत्रशक्तिः कुत्रलक्षणेत्य त्रविनिगमकाभावेनउभयत्रशक्तिकल्पनस्यावश्यकत्वेति॥ ९ ॥

मंचाइतिमंचपदंमंचस्थपुरुषेलाक्षणिकंवाच्यार्थस्यक्रोशनकर्तृत्वान्वयासंभवादितिभावः वाच्यस्यापीति अपिनालक्ष्यसमुच्च
यः छत्रिणइति एकसार्थवाहित्वेनछत्र्यछत्रिषुगमनकर्तृत्वान्वयतात्पर्यानुपपत्तिरेवलक्षणाबीजंनचछत्रिणिन्वस्यम
नुवर्थकेनप्रत्ययांततयापदसमूहरूपत्वेनतच्छक्त्याशक्यसंबंधरूपलक्षणायाअभावेनकथमिदमुदाहरणमितिवा
च्यम् प्रतिपाद्यसंबंध एवलक्षणाइत्येतदभिप्रायेणतदुदाहरणदानात् अन्यथाकाकेभ्योदधिरक्ष्यतामित्याद्युदाह
र्तव्यम् काकपदस्यकाकतदितरसाधारणदध्युपघातकत्वावच्छिन्नपरत्वात् केचित्तुछत्रपदस्यैकसार्थेलक्षणा
तद्धितार्थः संबंधीतथाचैकसार्थसंबंधिनोगच्छंतीत्यन्वयबोधइत्याहुः तत्वमसीतिअत्रतत्पदवाच्येसर्वज्ञत्वादिवि

> लक्षणात्रिविधा जहल्लक्षणाअजहल्लक्षणा जहदजहल्लक्षणाचेतियत्रवाच्यार्थस्यान्व
> याभावस्तत्रजहल्लक्षणायथामंचाः क्रोशंतियत्रवाच्यार्थस्यार्थान्वयस्तत्राजहदितियथा
> छत्रिणोगच्छंतियत्रवाच्यैकदेशत्यागेन एकदेशान्वयस्तत्रजहदजहदितियथातत्वमसीति

शिष्टेत्वंपदवाच्यस्यांतःकरणादिविशिष्टस्याभेदानुपपत्त्योभयत्रविशेषणांशपरित्यागः तथाचतत्पदलक्ष्यस्यशु
द्धस्यत्वंपदलक्ष्येणसहाभेदान्वयोपपत्तिरित्यभिप्रायः इदमुदाहरणंतुजीवब्रह्मणोरैक्यंब्रुवतांब्रह्मवादिनांसि
द्धांताभिप्रायेणनैयायिकमतेतस्यासंमतत्वात् नैयायिकरीत्यातुसोयंदेवदत्तइत्यादौतत्तांशस्येदानीमसंभवात्हा
नंइदंतांशस्यसंभवादहानमितिजहदजहल्लक्षणामाचक्षते परंतुघटोऽनित्यइत्यादौघटत्वस्येवसोयंदेवदत्त
इत्यादौतत्तांशस्योपलक्षणतयाभानेनकिंचिद्बाधकमितिकिंजहदजहल्लक्षणयेतिवदंति ॥ ॥

गौएयाद्दृत्यंतरत्वं निराचष्टे गौएयपीति ननु गंगायां घोष इत्यत्र तीरे शक्यस्य प्रवाहस्येवाग्निर्माणवक इत्यादौ माणवके शक्यस्याग्नेः साक्षात्संबंधो न संभवतीति कथं लक्षणया निर्वाह इत्यत आह लक्ष्यमाणेति लक्ष्यमाणो यो गुणः शुचित्वादिस्तत्संबंधरूपेत्यर्थः अयमभिप्रायः शक्यसंबंधो हि लक्षणा स च क्वचित्साक्षात्संबंधः क्वचित्परंपरासंबंधः एवं च शक्यस्याग्नेः स्वनिष्ठशुचित्ववत्त्वसंबंधमेव लक्षणेत्यालंकारिकाः पुनरेवमाहुः तीरे घोष इति प्रयोगे स्वायत्ते गंगायां घोष इत्यन न्विताभिधानं शैत्यपावनत्वादिप्रतीत्यर्थं न च सा प्रतीतिर्लक्षणयाप्युपपद्यते केवलतीरलक्षणयैवानुपपत्तिपरिहारे शैत्यपावनत्वादिविशिष्टलक्षणायां मानाभावात्तस्माद्व्यंजनावृत्तिरवश्यमंगीकर्त्तव्येति तन्मतं निरस्यति व्यंजनापीति शक्तिलक्षणांतर्भूतेति अयं भावः व्यंजकेनानार्थकस्य लेदूरस्या भूधरारम्यादित्यादौ भूध

गौएयपि लक्षणैव लक्ष्यमाणगुणसंबंधस्वरूपाग्निर्माणवक इति व्यंजनापि शक्तिलक्षणांतर्भूता शब्दशक्तिमूला अर्थशक्तिमूला च अनुमानादिनाऽन्यथासिद्धा ॥ ९ ॥

रशब्देन पर्वतानामिव राज्ञामपि शक्त्यैव प्रतीतिः संभवति गंगायां घोष इत्यादौ तु शैत्यपावनत्वादिविशिष्टतीरप्रतीतिरपि लक्षणासामग्र्या देव तत्र लक्षणाकल्पिका यास्तात्पर्यानुपपत्तेरेव सद्भावात् किमतिरिक्तव्यंजनयेति ननु शब्दशक्तिमूलाया व्यंजनाया अन्यथासिद्धत्वेपि अर्थशक्तिमूलायास्तस्याः नान्यथासिद्धिः तथाहि गच्छ गच्छसि चेत्कांत पंथानः संतु ते शिवाः ममापि जन्म तत्रैव भूयाद्यत्र गतो भवानित्यादौ हे प्रिय तव गमनोत्तर मम प्राणवियोगो भविष्यति अतो न गंतव्यमित्याद्यर्थो व्यज्यते न ह्यत्र शक्तिलक्षणाभ्यां निर्वाहः इत्थं च व्यंजनाया आवश्यकत्वे त्यत आह अर्थशक्तिमूला चेति च त्वर्थे अनुमानादिनेति अनुमानप्रकारस्तु इयं मदीयगमनोत्तरकालिकप्राणवियोगवती विलक्षणशब्दप्रयोक्तृत्वादित्यादिरूपः आदिना संभावनादिपरिग्रहः उत्कटैकतरकोटिकसंशयः

अन्यथानुपपत्तेर्लक्षणाबीजत्वेपदशीभ्रवेशयेत्यादौलक्षणानुपपत्तिस्तात्पर्यानुपपत्तेस्तथात्वस्मात्तत्रापिसत्वेनयष्टिपदस्ययष्टिध
रेलक्षणासंभवतीत्याशयेनाह तात्पर्य्यानुपपत्तिरितितत्प्रतीतिनीराद्विरूपत्वेप्रतीतिरित्यर्थः नानार्थइतिसैंधवमा
नयेत्यादिनानार्थस्थलेसैंधवपदस्याश्वेलवणेचशक्तेस्तुल्यतयाशाब्दबोधेतात्पर्यग्रहस्यकारणत्वमंतरानानियं
तकालेनतद्बोधोपपत्तिरितितत्रतत्कारणत्वस्यावश्यकत्वेतदनुरोधेनसर्वत्रतदावश्यकतेतिभावः नचमौनि
श्लोकादौशाब्दबोधानुपपत्तिस्तत्रनिरुक्ततात्पर्यस्यासत्वादितिवाच्यम् तात्पर्य्यस्यतत्प्रतीतिछारूपत्वपर्यवसा
नेनतत्रतादृशतात्पर्यसत्वेनादोषात् नचतथापितत्प्रतीतीछारहितशुकाद्युच्चरितवाक्यादपिशाब्दबोधस्यानुभवि

तात्पर्यानुपपत्तिर्लक्षणाबीजंतत्प्रतीतीछयाउच्चरितत्वंतात्पर्य्यंज्ञानंचवाक्यार्थज्ञानेहेतुः नानार्थानु
रोधात् प्रकरणादिकंतात्पर्यग्राहकंद्वारमित्यादौपिधेहीतिशब्दाध्याहारः ननुशब्दाध्याहारस्यार्थ
ज्ञानार्थत्वाच्छब्दस्यार्थमविज्ञायशब्दाध्याहारासंभवादर्थाध्याहार एवयुक्तइतिचेन्न पदविशेषज
न्यपदार्थोपस्थितेः शाब्दज्ञानेहेतुत्वात् अन्यथाघटकर्मत्वमानयनंकृतिरित्यत्रापिशाब्दज्ञानप्रसंगात्

कतयातत्रानुपपत्तेः परिहारासंभवइतिशंक्यंतत्रेश्वरीयेछामादायैवानुपपत्तेः परिहारसंभवादित्यलमनल्पजा
ल्पनेनप्रकरणादिकमितिआदिनासशंखचक्रोहरिःपूज्यइत्यादौहरिशब्दस्यभगवतितात्पर्यनिर्णायकस्यसशंखच
क्रइतिविशेषणादेः परिग्रहः कथंप्रकरणादेस्तात्पर्यग्राहकत्वमितिचेदित्थं इदंसैंधवपदंलवणबोधेछयोच्चरि
तंभोजनप्रकरणेउक्तत्वादित्यादिरीत्यागृहाणप्रभाकरमतंनिराकरिष्यमाणः स्वसिद्धांतंदर्शयति द्वारमिति अर्थज्ञा
नार्थत्वाच्छब्दस्येतिशब्दज्ञानस्यार्थज्ञानफलकत्वादित्यर्थः एतावताप्रथमतएवार्थानुसंधानेलाघवमितिहृदयं

Digitized by Google

किंचार्थबुद्ध्या वाक्यरचनेति न्यायेनार्थज्ञानमंतरा आकांक्षितशब्दानुसंधानरूपशब्दाध्याहारस्यैवासंभवेन प्रथमतोऽर्थाध्याहारस्यैवावश्यकतेत्याह अर्थमवीति यथा कथंचिदुपस्थितपदार्थानां शाब्दबोधानुदयेन पदजन्यत्वस्योपस्थितिविशेषणतया आवश्यकतया ताहशोपस्थितिसंपत्तये शब्दाध्याहार एवानापायानुम तव्य इत्याह पदविशेषेति । विशेषपदस्यापि प्रयोजनं दर्शयितुं घटः कर्मत्वमित्याद्यनुधावनं तत्र कर्मत्वादिपदजन्यकर्मत्वाद्युपस्थितेः सत्वेपि घटपदोत्तराऽमादिपदजन्यकर्मत्वाद्युपस्थितेरसत्वेन न सिद्धांतिमते शाब्दबोधप्रसंग इति भावः पदविशेषजन्येत्यत्र हत्यापदविशेषजन्येत्यपि बोध्यं तेन घटमानयेत्यादौ घटादिपदादाकाशादेरुपस्थितावपि न शाब्दबोध इति दिक् ॥ ॥ यद्यपि पदं तावच्चतुर्विधम् यौगिकं रूढं योगरूढं यौगिकरूढं चेति योगोऽवयवशक्तिस्तन्मात्रे

पंकजादिपदेषु योगरूढिः अवयवशक्तिर्योगः समुदायशक्ती रूढिः नियतपद्मत्वज्ञानार्थं समुदायशक्तिः अन्यथा कुमुदेपि प्रयोगप्रसंगः ॥

णार्थप्रतिपादकमाद्यं यथा पाचकादिपदं रूढिस्समुदायशक्तिस्तन्मात्रेणार्थप्रतिपादकं द्वितीयं यथा गवादिपदं योगरूढिभ्यां परस्परसहकारेणार्थप्रतिपादकं तृतीयं यथा पंकजादिपदं यौगिकं च तद्रूढं चेति व्युत्पत्त्या योगरूढ्या च परस्परासहकारेणार्थप्रतिपादकं चतुर्थकं यथाउद्भित्पदं योगेन तरुगुल्मादेः रूढ्या तु योगविशेषस्य वाचकं तथापि योगरूढं प्रदर्श्य तत्र योगरूढ्योः स्वरूपप्रदर्शनेन तद्रीत्या अन्यत्रापि बोद्धुं शक्यमित्यभिप्रायेण पंकजादिपदे योगरूढिं प्रदर्शयति पंकजादीति योगरूढिः शक्तियोगसहिता रूढिरित्यर्थः ननु पंकजादिशब्देष्वपि योग एवास्तु तावतैव निर्वाहादित्याशंक्य पंकजशब्दस्य पद्मत्वावच्छिन्नेवृत्तिमंतरा नियमेन पद्मत्वावच्छिन्न भानमनुभवसिद्धं न निर्वहतीति पद्मत्वावच्छिन्नरूढिरावश्यकेत्याह नियतेति नियतपद्मत्वावच्छिन्नभानानुभवे विप्रतिपन्नं प्रत्याह अन्यथेति नियतपद्मत्वावच्छिन्नभानोपयोगि समुदायशक्त्यनं

यद्यपि कार्यान्विते शक्तिरिति प्राभाकरमतं तथापि सिद्धार्थपरवाक्ये व्युत्पत्तेर्व्यवस्थापितत्वेन तत्साधारण्यमेतन्मतं परिष्कृत्य दर्श
यति इतरान्वितइति अन्विते शक्तिरिति तु निष्कर्षः अयमभिप्रायः कथंचिदुपस्थितपदार्थानां शाब्दबोधवारणाय तत्त
द्विषयकशाब्दबोधं प्रति वृत्तिज्ञानजन्यतदुपस्थितत्वेन हेतुतायाः कल्पनीयतयान्वयांशेपि शक्तिरपेक्षिता अन्यथा
तादृशसामान्यकार्यकारणभावभंगापत्तेः नच संसर्गविषयताभिन्नतत्तद्विषयकशाब्दबोधं प्रति वृत्तिज्ञानाधीनतत्त
दुपस्थितत्वेन हेतुत्वमास्तां तथा चान्वयांशेपि शक्त्यनंगीकारेपि न क्षतिरिति वाच्यम् तथा सति कार्यतावच्छेदकगौ
रवापत्तेः एवं चान्वितो घटपदवाच्य इत्याकारकशक्तिज्ञानमेव शाब्दबोधप्रयोजकमिति केचित्तु इतरान्विते
शक्तिरित्यस्य कार्यान्विते शक्तिरित्यर्थमाहुः सयुक्तिकं नैयायिकमतं दर्शयति अन्वयस्येति पदार्थसंसर्गस्य प

इतरान्विते शक्तिरिति प्राभाकरः अन्वयस्य वाक्यार्थतया भानसंभवादन्वयांशेपि शक्तिर्न कल्प
नीयेति गौतमीयाः

दसमभिहारबलादेव शाब्दबोधे भानसंभवात् तादृशसंसर्गांशेपि शक्तिर्न कल्पनीयेति समुदितार्थनिष्कर्षः अयमाशयः तद्विषयकशाब्दबुद्धिं प्रति वृत्तिज्ञानाधीनतदुपस्थितित्वेनानुगतकार्यकारण
भावो न संभवति शक्तिलक्षणोभयसाधारणस्य वृत्तित्वस्य दुर्वचत्वात् अपि तु तत्तच्छक्तपदज्ञानजन्यतदुपस्थितित्वेन
लाक्षणिकपदज्ञानजन्यतदुपस्थितित्वेन च अपराकारणता स्वीकर्त्तव्या परस्परं तत्तदुपस्थितिजन्याकारतानवच्छिन्नत्वं तत्तत्कारणजन्यतावच्छेदककोटौ निवेशनीयं एवं च
शाब्दबोधे व्यभिचारवारणाय च तत्तत्कारणाव्यवहितोत्तरत्वं तत्तत्कारणजन्यतावच्छेदककोटौ निवेशनीयं एवं च
शाब्दबोधे व्यभिचारवारणाय च तत्तत्कारणाव्यवहितोत्तरत्वं ... प्रशक्त्यादर्शनेन द्विविधकार्यकारणभा
वस्य निष्प्रत्यूहतेति किमन्वयांशे शक्तिकल्पनेन

आकांक्षादिरहितपदसमुदायाच्छाब्दबोधवारणायाकांक्षादेः शाब्दबोधहेतुत्वमभिहितंमूलकृतातच्चनवीनमतेननिर्वहती
तितज्ज्ञानस्यहेतुतामाह आकांक्षादिज्ञानमिति आदिनायोग्यतापरिग्रहः अन्यथाआकांक्षादेः शाब्दधीहेतुत्वेमूलेपद
स्येतियत्पदस्ययत्पदाभावप्रयुक्तमन्वयबोधाजनकत्वंतत्पदसमभिव्याहृततत्पदत्वमाकांक्षेत्यर्थः प्रयुक्तत्वंचकारणाभा

आकांक्षेति आकांक्षादिज्ञानमित्यर्थः अन्यथाआकांक्षादिभ्रमाच्छाब्दोभ्रमोनस्यात् आकांक्षांल
क्षयति पदास्येतियोग्यतामाह अर्थेति सन्निधिलक्षणमाह पदानामिति अविलंबेनपदार्थोपस्थि

आकांक्षायोग्यतासन्निधिश्चवाक्यार्थज्ञानेहेतु पदस्यपदांतरव्यतिरेकप्रयुक्तान्वयाननु
भावकत्वमाकांक्षाअर्थाबाधोयोग्यता पदानामविलंबेनोच्चारणंसन्निधिः तथाचाकांक्षा
दिरहितंवाक्यमप्रमाणंयथागौरश्वः पुरुषोहस्तीतिनप्रमाणं आकांक्षाभावात्प्रहरे
प्रहरेऽसहोच्चारितानिशुल्कांगामानयदंडेनेत्यादिपदानिनप्रमाणानिसान्निध्यभावात्

तिः सन्निधिः उच्चारणंतुतदुपयोगितयाउक्तः गौरश्वइतिघटः कर्मत्वमित्यमाकांक्षोदाहरणंद्रष्टव्यम् 
वात्कार्याभावइतिप्रतीतिसाक्षिकः स्वरूपसंबंधविशेषः अजनकत्वांतंपरिचायकं एकपदार्थेऽपरपदार्थवत्त्वंयोग्यतेतिमते
तिसंशयनिश्चयसाधारणतज्ज्ञानत्वावछिन्नंशाब्दधीहेतुः बाधनिश्चयाभावोयोग्यतेतिनवीनमतेतुस्वरूपसत्येवयोग्यता
॥ तद्धेतुरितिदिक्॥

मीमांसकाः शंकते नन्विति वेदस्यपुरुषोक्तत्वमनुमानेनव्यवस्थापयति वेदइति नन्वष्टादशपुराणानांकर्त्तासत्यवतीसु
तइत्यादिप्रमाणबलेनभारतादौकर्त्तोपलभ्यते नतथावेदे तथाचस्मर्यमाणकर्तृत्वस्यभारतादौसाध्यव्यापकत्वात् प
क्षेसाधनाव्यापकत्वात् वाक्यंविभजते वाक्यमितिवैदिकेविशेषमाह वैदिकमीश्वरोक्तत्वादिति ननुवेदस्यानादित्वा
त्कथमीश्वरोक्तत्वमितिचेद्वेदः पौरुषेयः वाक्यसमूहत्वात् भारतादिवदित्यनुमानेनपौरुषेयत्वसिद्धेः नचस्मर्यमा
णकर्त्तृत्वमुपाधिः गौतमादिभिःशिष्यपरंपरयावेदेपिसकर्त्तृत्वस्मरणेनसाधनव्यापकत्वात् तस्मात्तपनात्त्रयोवेदा
जायंत इतिश्रुतेश्च ननुवर्णाः नित्याः सएवायंगकारइतिप्रत्यभिज्ञाबलात् तथाचकथंवेदस्य नित्यत्वमितिचेन्न
उत्पन्नोगकारोनष्टोगकारइत्यादिप्रतीत्यावर्णानामनित्यत्वात्सोयंगकारइतिप्रत्यभिज्ञायाः सेयंदीपज्वालेतिवत् ।
जात्यावलंबनत्वात् वर्णानामनित्यत्वेचानुपूर्वीविशिष्टवाक्यस्याप्यनित्यत्वात् तस्मादीश्वरोक्तोवेदः मन्वादिस्मृती

वाक्यंहिद्विविधंवैदिकंलौकिकंचवैदिकमीश्वरोक्तत्वात् सर्वमेवप्रमाणंलौकिकंत्वाप्तोक्तंप्रमा
णंअन्यदप्रमाणंवाक्यार्थज्ञानपदार्थज्ञानशब्दज्ञानंतत्करणंशब्दइति शब्दप्रमाणं॥ ९ ॥

नामाचाराणांचवेदमूलकतयाप्रामाण्यंस्मृतिमूलवाक्यानामिदानीमनध्ययनात्तन्मूलभूताकाचिच्छाखोच्छिन्नेति
कल्प्यते ननुपठ्यमानवेदवाक्योत्सादस्यकल्पयितुमशक्यतयाविप्रकीर्णवादस्यायुक्तत्वान्नित्यानुमेयोवेदोमूलमि
तिचेन्न तथापिवर्णानुपूर्वीज्ञानाभावेनबोधकत्वासंभवात् नन्वेतानिपदानिस्मारितार्थसंसर्गवंतिआकांक्षादि
मत्पदकत्वात् गामानयदंडेनेतिमद्वाक्यवदित्यनुमानादेवसंसर्गज्ञानसंभवात् शाब्दोनप्रमाणान्तरमितिचेन्न
अनुमित्यपेक्षयाशाब्दज्ञानस्यविलक्षणस्यशाब्दात्प्रत्येमीत्यनुव्यवसायसाक्षिकस्यसर्वसंमतत्वात् नन्वर्थापत्ति
रपिप्रमाणांतरमस्तिपीनोदेवदत्तोदिवानभुंक्तेइतिदृष्टेश्रुतेवापीनत्वान्यथानुपपत्त्यारात्रिभोजनमर्थापत्याकल्प्य
तइतिचेन्नदेवदत्तोरात्रौभुंक्तेदिवाभुंजानत्वेसतिपीनत्वादित्यनुमानेनैवरात्रिभोजनस्यसिद्धत्वात् शतेपंचाशदि

रव्यवहारहेतुरितिनमानांतरं तस्मात्प्रत्यक्षानुमानोप
मानशाब्दाश्चत्वार्येवप्रमाणानि॥

तिसंभवोप्यनुमानमेवइहवटेयक्षस्तिष्ठतीत्यैतिह्यम
पिअज्ञानमूलवक्तृकःशाब्दएवचेष्टापिशाब्दानुमानद्वा

त·दी· उपाधित्वेनकथमिदमनुमानंसाध्यसाधकंभवेदित्याशंक्य ते नचेति गौतमादिभिः शिष्यपरंपरयावेदकर्त्तृरूपदे
मी· शेविवदंतंप्रत्याह तस्मादिति सएवायंगकारइतीति अत्रैतत्कालिकगकारे पूर्वकालिकगकाराभेदोभासते सचव
४० र्णानामनित्यत्वेनसंभवतीतिभावः अनित्यत्वादितिनर्हिप्रत्यभिज्ञाविरोधइत्यतआह सोयमिति उत्पत्तिवि·
नाशप्रत्यययोरन्यार्थकल्पनमपेक्ष्यैतत्प्रत्ययस्यतथात्वाकल्पनेलाघवमितिहृदयम् अग्निमीलेत्यादावानुपू
र्वीअकारोत्तरनत्वादिरूपातत्रोत्तरत्वमव्यवहितोत्तरक्षणवृत्तित्वरूपंवाच्यम् इत्थंचवर्णानांनित्यत्वांगीकारेप्य
नित्यक्षणघटितायाआनुपूर्व्याअनित्यत्वात्तद्विशिष्टवाक्यसमुदायात्मकवेदस्यतद भिमतनित्यत्वंनसिद्ध्य ती
तिवर्णानामनित्यत्वमेवोचितमित्याह वर्णानामिति यद्यपिस्मृत्यादीनामाप्तोक्तत्वादेवप्रमाणत्वंसिद्ध्यतितत्कर्तृमन्वा
दीनामाप्तत्वात् तथापितेषाम सर्वेविप्रतिपन्नंप्रत्याह मन्वादीति आचाराणामिति आचारप्रतिपादकशिष्टवाक्या
नामित्यर्थः एतेनप्रमाणविभागव्याघातशंकानिरस्ता वेदार्थंज्ञात्वैवमन्वादिभिस्तदर्थकस्मृत्यादीनिविचारिता·
नि अतस्तेषांप्रामाण्यमितिमनसिकृत्याह वेदमूलकतयेति ननुतर्हिसवेदः कुतोनोपलभ्यतइत्यतआह स्मृतिमू
लेति तन्मूलभूतेत्यादि स्मृत्यादिमूलभूताकाचिच्छाखापाठतः परिभ्रष्टेत्यनुमीयतइत्यर्थः वाक्योत्सादस्यवा
क्योच्छेदस्य ननुसमानानुपूर्वीकवेदपाठस्यसंप्रदायसिद्धत्वात् तादृशवेदेकतिपयवाक्योच्छेदस्यकल्पयि·
तुमशक्यत्वेपिपठ्यमानवेदेविशकलिततयाविद्यमानवाक्यानांस्मृतिमूलत्वमस्त्वित्यतआह विप्रकीर्णेति
अयुक्तत्वादिति स्मृत्यादिसमानार्थकवाक्यानांपठ्यमानवेदेऽनुपलंभादितिभावः नित्यानुमेयइति नित्यो·
नुमेयइत्यर्थः वर्णानुपूर्वीज्ञानाभावेनेति तादृशज्ञानस्यापिशाब्दबोधहेतुत्वादन्यथानदीदीनादिशब्दे रर्थे· रामः
विशेषबोधानापत्तेरितिभावः शब्दस्यप्रमाणत्वमनंगीकुर्वतांवैशेषिकाणांमतंदूषयितुमुपन्यस्यति नन्वे ४०
तानीत्यादिनाएतानिपदानिघटमानयेत्यादीनिस्मारितार्थसंसर्गवंतीतिस्मारितार्थसंसर्गज्ञानपूर्वकाणीत्यर्थः

दिनायोग्यतासत्त्वयोः परिग्रहः आकांक्षादिरहितेति पदकदंबके व्यभिचारवारणायाकांक्षादीति सर्वसंमतत्वादिति तथा
चकार्यवैलक्षण्यानुरोधेन शब्दः प्रमाणांतरमिति भावः मीमांसकः शंकते नन्विति दिवा न भुंक्ते इत्यर्थे दृष्टे प्रत्यक्ष
तो ज्ञाते श्रुते शब्दादवगते एतेन दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेत्यर्थापत्तेर्द्वैविध्यं सूचितम् पीनत्वान्यथानुपपत्त्येति
पीनत्वस्य रात्रिभोजनं विनानुपपत्त्येत्यर्थः अत्रेदमवधेयम् यद्विनायदनुपपन्नं तत्तदुपपादकमिति रात्रिभोजन
मुपपादकं पीनत्वमुपपाद्यं उपपादकज्ञानं फलं उपपाद्यज्ञानं करणं फलकरणयोरर्थापत्तिशब्दो वर्तते फलेऽर्थ
स्यापत्तिः कल्पनेति व्युत्पत्त्या करणे तु अर्थस्यापत्तिः कल्पना यस्मादिति व्युत्पत्त्येति व्यतिरेक्यनुमानेनैव गतार्थ
त्वादर्थापत्तेः प्रमाणांतरत्वमनुचितमिति समाधत्ते देवदत्त इति दिवामात्रभोजने पीने व्यभिचारवारणाय सत्यं
तं अहोरात्राभोजिन्यपीने व्यभिचारवारणाय विशेष्यम् योगाद्यजन्यपीनत्वपरं तेन भोजनशून्ये योगिनि पीने न व्यभि
चारः संभवेति द्वयोरतिरिक्तप्रमाणत्वं वदतां पौराणिकानां मतं दूषयति शते पंचाशदित्यादिना अनुमानमेव
न तु प्रमाणांतरमित्यर्थः शतवानित्युक्ते पंचाशद्वानिति ज्ञानं संभवति तस्यानुमानेनैव निर्वाहात् तस्य पंचाशद्व्याप्यत्वा
दिति भावः अज्ञातमूलेति विशिष्यानिश्चितप्रथमवक्तृकः शब्दः न तु प्रमाणांतरमित्यर्थः तादृशशब्दस्य यथार्थ
त्वे शब्दप्रमाणमध्येंतर्भावः अन्यथा त्वप्रमाणमेवेति हृदयम् नन्वनया चेष्टयाऽयमर्थो बोद्धव्य इति संकेतितचेष्ट
या विज्ञातीयप्रमाजननाच्चेष्टापि प्रमाणांतरमिति वदंतं निरस्यति चेष्टापीति शब्दानुमानद्वारेति शब्दद्वारा अनुमान
द्वारा वा न तु स्वातंत्र्येणेत्यर्थः चेष्टया कल्पितस्य शब्दस्य प्रमापकत्वेपि गौरवादनुमानानुसरणम् व्यवहारेति प्रमा
त्मकज्ञानेत्यर्थः उपसंहरति तस्मादिति ॥ ❀ ॥ इति श्रीतर्कदीपिकाप्रकाशे भगवदर्पिते शब्दपरिच्छेदः ॥ ❀ ॥ ॥

प्रमाणप्रसंगात् प्रमाणस्य परतो ग्राह्यतां व्यवस्थापयिष्यन्नाह ज्ञानानामिति षष्ठ्यर्थः आधेयत्वं तस्य चान्वयस्तद्वति तत्प्रकारकत्वे तच्च तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वं तच्छब्दार्थो घटत्वादिरूपः स्वतो ग्राह्यमिति ज्ञानग्राहकसामग्रीजन्यग्रहविषय इत्यर्थः परत इति ग्राह्यमित्यनुषज्यते अनुमानादिजन्यग्रहविषय इति तदर्थः त॰

॥ज्ञानानां तद्वति तत्प्रकारकत्वं स्वतो ग्राह्यं पर॥
॥तो वेति विचार्य्यते तत्र विप्रतिपत्तिः॥ ९ ॥

त्र विचारे प्रयोजकत्वं सप्तम्यर्थः विप्रतिपत्तावन्वेति कथं तस्य विचारप्रयोजकत्वमिति चेदत्र वदंति विरुद्धार्थप्रतिपादकवाक्यद्वयं हि विप्रतिपत्तिः तया ऽप्रामाण्यशंकाकलितस्तत्तद्वाक्यार्थबोधद्वारा मध्यस्थस्य संशयो जन्यते इ 
न्यैकतरकोटिनिश्चयाय न्यायप्रयोगादिरूपो विचारः एवं च विचारोपयोगिसंशयजनन्या विप्रतिपत्तेर्विचारोपयोगित्वमक्षतमिति ॥

ज्ञानप्रामाण्यमिति पक्षनिर्देशः अत्र तद्वति तत्प्रकारकज्ञानत्वरूपमेव प्रामाण्यं पक्षः ननु प्रमितिकरणत्वरूपमि
ति तात्पर्यग्राहकं ज्ञानपदं वस्तुतस्तु तद्वति तत्प्रकारकज्ञानत्वस्य घटत्वपटत्वादिरूपार्थभेदेन भिन्नतया कस्यापि प्रा
माण्यस्य यावज्ज्ञानग्राहकसामग्रीग्राह्यत्वं न संभवत्यतः यद्धर्मघटितं प्रामाण्यं यदा पक्षस्तदा तद्धर्मप्रकारकज्ञानग्राह
कयावद्ग्राह्यत्वमेव साधनीयं ननु सामान्यतो ज्ञानग्राहकयावद्ग्राह्यत्वमिति तात्पर्यग्राहकं ज्ञानपदं तदप्रमाण्येति तद
प्रामाण्याग्राहिका यावती ज्ञानग्राहिका सामग्री तज्जन्यग्रहविषयो न वेत्यर्थः एतादृशो ग्रहः गुरुमते व्यवसायः मुरा
रिमिश्रमते ऽनुव्यवसायः भट्टमते च ज्ञाततालिंगकानुमितिः अत्र गुरुमते सर्वस्मिन्नेव ज्ञानमिति मात्रभेयैतत्स्वयं
भासते तन्मते घटत्वेन घटमहं जानामीत्याकारकस्यैव व्यवसायस्योत्पत्तेः एवं च व्यवसायस्य स्वप्रकाशात्मकत

॥ ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावद्ज्ञानग्राहकसाम ॥
॥ ग्रीग्राह्यं न वा अत्र विधिकोटिः स्वतस्त्वं निषेधकोटिः परतस्त्वम् ॥

यास्तेनैव स्वगतप्रामाण्यस्य ग्रहणाद्भवति प्रामाण्यस्य स्वतो ग्राह्यत्वं विशिष्टबुद्धौ विशेषणज्ञानस्य कारणतायास्ते
रनंगीकाराद् अनुपस्थितस्यापि प्रामाण्यस्य भानसंभवात् मिश्रमते ऽयं घट इत्याकारकज्ञानानंतरं घटत्वेन घटमहं
जानामीति ज्ञानविषयकलौकिकमानसमुत्पद्यते तेन प्रामाण्यस्य ग्रहणं भट्टमते च ज्ञानस्यातींद्रियतया ज्ञाततालिंग
कानुमितेरेव प्राथमिकज्ञानग्रहरूपतया प्रामाण्यं गृह्यते अनुमानप्रयोगस्तु घटो घटत्ववद्विशेष्यकघटत्वप्रकारक ५२
ज्ञानविषयः घटत्वप्रकारकज्ञाततावत्वात् यन्नैवं तन्नैवमिति ज्ञातता च सविषयका ज्ञानजन्यः अतिरिक्तः पदार्थ
॥ इति मतविवेकः ॥

यावत्त्वविशेषणे सत्येव ग्राहकांतं सार्थकमित्यभिप्रेत्य प्रथमतस्तस्यैव प्रयोजनं दर्शयति अनुमानेति प्रामाण्यस्येत्यादिः सिद्धसाधनेति नैयायिकमतेपि इदं ज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वादित्यनुमानेन इदं ज्ञानं प्रमेत्याप्तवाक्ये न च ग्राह्यत्वादिति भावः नैयायिकैर्निषेधे साध्ये बाधवारणायेत्यादि बोध्यम् यावदितीति ननु सामग्र्या यावत्त्वविशेषणमयुक्तं यावत्सामग्रीजन्यग्रहप्रसिद्धेः नहि सर्वाभिर्ज्ञानसामग्रीभिरेकं ज्ञानं जन्यते न च यावतीसामग्रीः विशिष्योपादाय तत्तज्जन्यग्रहविषयत्वसाध्यत इति वाच्यम् अनुव्यवसायादिसामग्रीणां तादृश्येण प्रवेशे मतत्रयसाधारण्यानिर्वाहादिति चेन्न यतो यावदिति फलतो ग्रहं विशेषणं तथा च ज्ञानग्राहकसामग्रीजन्ययावद्ग्रहविषयत्वमिति फलितं तत्तद्धर्मप्रकारकज्ञानग्राहकसामग्रीजन्यग्रहत्वव्यापकविषयिताप्रतियोगित्वमिति निष्कर्ष इति संक्षेपः प्रामाण्या

अनुमानग्राह्यत्वेन सिद्धसाधनवारणाय यावदिति इदं ज्ञानमप्रमेति ज्ञानेन प्रामाण्याग्रहाद्बाधवारणाय अप्रामाण्याग्राहकेति इदं ज्ञानमप्रमेत्यनुव्यवसायनिष्ठप्रामाण्यग्राहकस्याप्रामाण्याग्राहकत्वाभावात्स्वतस्त्वं न स्यादत स्तदिति तस्मिन् प्रामाण्याश्रयेऽप्रामाण्याग्राहक इत्यर्थः उदाहृतस्य तेव्यवसायेऽप्रामाण्यग्राहकस्याप्यनुव्यवसायेतद्ग्राहकत्वात्स्वतस्त्वसिद्धिः ॥ ॥ग्रहादिति व्यवसायनिष्ठेत्यादि प्रामाण्याविषयीकरणादित्यर्थः अप्रामाण्याग्राहकेतीति तथा च तादृशज्ञानसामग्र्याः साध्यकोटौ निविष्टत्वात्तया प्रामाण्यस्याग्रहणेपि न बाध इति भावः अनुव्यवसायनिष्ठेत्यादि तादृशानुव्यवसायनिष्ठं अप्रामाण्यवद्विशेष्यकत्वविशिष्टाप्रामाण्यप्रकारकत्वरूपतद्ग्राहकस्येत्यर्थः सामान्येन पुंसक निर्देशः स्वतस्त्वं न स्यादिति यदा निरुक्तप्रामाण्यस्य पक्षता तदा अप्रामाण्याग्राहिकाः प्रामाण्यप्रकारकज्ञानजनकसामग्र्या एव साध्यकोटौ निवेशनीयतया तादृशसामग्र्या अप्रसिद्धत्वात्तस्य स्वतो ग्राह्यत्वं न सिद्ध्येदित्यर्थः सप्तमीतत्पुरुषमभिप्रेत्याह तस्मिन्निति एतस्यैव विवरणं ग्राह्यं प्रामाण्याश्रय इति यादृशप्रामाण्यं प्रकृतानुमितावुद्देश्यं तादृशप्रामाण्यान्वयविशेष्यकाप्रामाण्या

इत्थंविप्रतिपत्तिंप्रदर्श्यमीमांसकमतमुपन्यस्यति नन्विति स्वतएवेत्यादि घटत्वादिघटितप्रामाण्यनिरुक्तसामग्री-
तएवगृह्यतइत्यर्थः अप्यर्थकेणैवकारेणानुमानादिपरिग्रहः अनुव्यवसायेनेति इदंचमिश्रमताभिप्रायेण मतत्र-
यसाधारण्येनतु प्राथमिकज्ञानग्रहणेनेतिध्येयम् तत्संबंधस्यापीतिघटघटत्वयोर्यः संबंधः तस्यापीत्यर्थः नन्वनु-
व्यवसायेकथंसंबंधस्यभानमित्याशंक्य यथाघटघटत्वयोर्व्यवसायरूपप्रत्यासत्त्याभानं तथातत्संबंधस्यापिव्यव-
सायरूपप्रत्यासत्तेरविशेषादित्याह व्यवसायेतिननुतावताकथंप्रामाण्यस्यभानमतआह पुरोवर्त्तिनिप्रकारसं-
बंधस्यैवेति पुरोवर्त्तिनियः प्रकारसंबंधस्तद्घटितस्यैवेत्यर्थः अयमाशयः नैयायिकाअपिअनुव्यवसायेविशेष्यत्व-

ननुस्वतएवप्रामाण्यंगृह्यतेघटमहंजानामीत्यनुव्यवसायेनघटघटत्वयोरिवतत्संबंधस्यापिविष-
यीकरणात् व्यवसायरूपप्रत्यासत्तेस्तुल्यत्वात् पुरोवर्त्तिनिप्रकारसंबंधस्यैवप्रमात्वपदार्थत्वात्
इतिचेन्न स्वतःप्रामाण्यग्रहेजलज्ञानंप्रमानवेत्यनभ्यासदशायांप्रमात्वसंशयोनस्यादनुव्यवसा-
येनप्रामाण्यस्यनिश्चितत्वात्

प्रकारत्वयोर्भानमंगीकुर्वंतिपुरोवर्त्तिनिघटत्वेनजानामीत्याकारकस्यैवानुव्यव-
सायस्यतैरंगीकारात् परंतुपुरोवर्त्तिनिघटादौघटत्वादिरूपप्रकारसंबंधभानंनांगीकुर्वंति अतस्तत्रप्रकारसंबं-
धभानस्यव्यवस्थापनेकिमपिनाविशिष्टमितिप्रामाण्यस्यभानंसिद्ध्यतिअनुपस्थितयोरपिविशेष्यत्वप्रकारत्व-
योर्भानस्यसर्वसंमतत्वादिति जलज्ञानमित्यादिजलज्ञानंप्रमानवेत्याकारकअनभ्यासदशायांप्राथमिकजलज्ञान-
ग्रहोत्तरदशायामनुभवसिद्धःप्रमात्वसंशयोनस्यादित्यर्थः निश्चितत्वादिति तद्वत्तानिश्चयस्यतदभाववत्ताज्ञानंप्र-
तिप्रतिबंधकत्वादितिभावः अत्रज्ञातोघटइतिप्रतीतेर्ज्ञानविषयताविषयकत्वकल्पनेनैवनिर्वाहे। निरिक्तज्ञाततानकल्प-

तस्मादिति। अनभ्यासदशायां संशयानुभवादित्यर्थः एतत्स्वतोग्राह्यत्वाभावेऽन्वयः परतोग्राह्यत्वमिति प्रामाण्यस्यानुमा
नादिना एव ग्राह्यत्वमित्यर्थः प्रवृत्तौ सत्यामिति एतेन मीमांसकैरभ्युपगतायां प्रामाण्यनिश्चयस्य प्रवृत्तिहेतुतायां व्य
भिचारो दर्शितः नच निष्कंपप्रवृत्तावेव प्रामाण्यनिश्चयस्य हेतुता सकंपप्रवृत्तौ तु प्रामाण्यसंशयस्य निष्कंपत्वं सकं
पत्वं च स्वविषयिताविशेषः एवं च तत्र सकंपप्रवृत्त्यंगीकारेऽपि प्रामाण्यनिश्चयस्य हेतुतायां कथं व्यभिचार इति।
वाच्यम् तथापि यत्र प्रामाण्यस्याप्रामाण्यस्य वा ज्ञानं नासीद्यासीच्च केवलं जलादिज्ञानं तत्र प्रवृत्तिप्रदर्शनेन प्रामा

तस्मात्स्वतोग्राह्यत्वाभावात्परतोग्राह्यत्वं तथाहि प्रथमं जलज्ञानानंतरं प्रवृत्तौ सत्यां जललाभे सति पूर्वो
त्पन्नज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वात् यन्नैवं तन्नैवं यथाऽप्रमेति व्यतिरेकिणा प्रमात्वं निश्ची
यते द्वितीयादिज्ञानेषु पूर्वज्ञानदृष्टांतेन तत्सजातीयत्वलिंगेनान्वयव्यतिरेकिणापि गृह्यते ॥ ९ ॥

ण्यासंशयहेतुतायां व्यभिचारस्य दुर्वारत्वात् नचैवं जलादिज्ञानेऽप्रामाण्यनिश्चयकाले प्रवृत्तिः स्यादिति शंकनीयं
अगृहीताप्रामाण्यकजलादिज्ञानत्वेन तद्धेतुतास्वीकारेणादोषादिति संक्षेपः जललाभे सतीति एतावता वक्ष्य
माणस्य प्रामाण्यव्यवस्थापकहेतोः स्वरूपासिद्धिशंका निरस्ता तदानीं पक्षस्यासत्त्वादाह पूर्वोत्पन्नमिति स
मर्थेति तद्विशेष्यकतत्प्रकारकेत्यर्थः अन्वय्युदाहरणासंभवात् व्यतिरेक्युदाहरणं सदृष्टांतमाह यन्नैवं त
न्नैवमिति यदप्रमा न तत्समर्थप्रवृत्तिजनकमित्यर्थः व्यतिरेकिणा व्यतिरेकव्याप्तिमता निश्चीयते द्वितीयादि
ज्ञानेषु द्वितीयादिजलज्ञानेषु तत्सजातीयत्वलिंगेन पूर्वज्ञानसजातीयत्वरूपलिंगेन समर्थप्रवृत्तिजनकत्वेनिया
॥ वत् गृह्यत इति प्रामाण्यमनुमीयत इत्यर्थः

एवं ज्ञप्तौ परतस्त्वं व्यवस्थाप्योत्पत्तौ तन्निरूपयति प्रमायाइति प्रमासाधारणमिति प्रमात्वाधिकदेशवृत्तिधर्मानवच्छिन्नप्रमा
निष्ठकार्य्यतानिरूपितकारणताशालीत्यर्थः तेन ज्ञानमात्रहेतुभूतात्ममनस्संयोगादेः भ्रमजनकपित्तादिदोषाणां चव्यु
दासः अप्रमासाधारणकारणत्वमप्येवमेव परिष्कर्त्तव्यम् चतुर्विधप्रमायां हेतुभूतं गुणं क्रमेणोपपादयति तत्रेति
चतुर्विधप्रमायामध्यइत्यर्थः इत्याद्यूहनीयमिति पीतः शंख इत्यादिभ्रमे पित्तादिर्दोषः इदं रजतमित्यादिभ्रमे
चचाकचिक्यादिरित्यूहनीयमित्यर्थः अप्रमात्वस्य परतस्त्वं सयुक्तिकं दर्शयति पुरोवर्त्तिनीति अनुपस्थितत्वा

प्रमायाजगुणजत्वन्यत्वमुत्पत्तौ परतस्त्वं प्रमासाधारणं कारणं गुणः अप्रमासाधारणं दोषः तत्र प्र
त्यक्षे विशेषणवद्विशेष्यसन्निकर्षो गुणः अनुमितौ व्यापकवति व्याप्यज्ञानं उपमितौ यथार्थसादृ
श्यज्ञानं शाब्दज्ञाने यथार्थयोग्यताज्ञानमित्यूहनीयम् पुरोवर्त्तिनी प्रकाराभावस्यानुव्यवसायेना
नुपस्थितत्वादप्रमात्वं परत एव गृह्यते पित्तादिदोषजन्यत्वादुत्पत्तौ परतस्त्वं न नु सर्व्वेषां ज्ञानानां य

दिति अविषयीकरणादित्यर्थः तथा च प्रत्यासत्तेरभावादप्रमात्वस्यानुऽयथार्थत्वादयथार्थज्ञानमेव नास्तीति
व्यवसायेन ग्रहणं न संभवतीति भावः अप्रमात्वं तदभाववद्विशेष्यकत्वविशिष्टतत्प्रकारकत्वं परत एव गृह्यत इ
ति अनुमानादित एव गृह्यत इत्यर्थः अनुमानप्रयोगस्तु इदं ज्ञानमप्रमा विसंवादिप्रवृत्तिजनकत्वात् यन्नैवं तन्नै
वं यथा प्रमेति गुरुमतं निरस्यान्यथाख्यातिं व्यवस्थापयति नन्वित्यादिना यथार्थत्वात् प्रमात्वात् अयथार्थज्ञान
मेव नास्तीति तदभाववद्विशेष्यकतत्प्रकारकत्वरूपायथार्थत्वज्ञानवृत्तिर्नेत्यर्थः तेन न सिद्ध्यसिद्धिभ्यां व्याघा
॥तः अयथार्थत्वस्यानुप्रसिद्धिरिञ्छादौ बोध्या ॥

अन्यथाख्यातीति तदनंगीकारे पुरोवर्त्तिविशेष्यकरजतत्वादिरूपेष्टतावच्छेदकप्रकारकज्ञानस्य संवादिविसंवादिसाधारणप्रवृत्तिजनकतया तत्र प्रवृत्तिरेव न स्यादिति भावः रजतस्मृतीति इष्टप्रतिनियतपूर्ववर्त्तिभ्यामित्यादि संभवादिति नयाच प्रवृत्तिं प्रति विशिष्टज्ञानत्वेन कारणतैव नास्तीति तदनुरोधेनान्यथाख्यातिकल्पनं न संभवतीति भावः नन्वेवं यत्र नेदं रजतमिति बाधग्रहस्तत्रापि प्रवृत्तिः स्यादत आह उपस्थितेति एतावता स्मृतिरूपकारणापेक्षा स्फुटीकृता इष्टभेदाग्रहस्यैव रजतादिरूपेष्टभेदग्रहाभावस्यैव एवकारेण विशिष्टज्ञानस्य प्रवर्त्तकत्वव्यवच्छेदः सर्वत्रेति रजते शुक्तौ चेत्यर्थः रजतस्थले विशिष्टज्ञानस्यैव प्रवृत्तिं प्रति कारणत्वमेष्टव्यं अन्यथा धर्मधर्मिज्ञानयोरिष्टभेदा-

नच शुक्ताविदं रजतमिति ज्ञानात् प्रवृत्तिदर्शनादन्यथाख्यातिसिद्धिरिति वाच्यं रजतस्मृतिपुरोवर्त्तिज्ञानाभ्यामेव प्रवृत्तिसंभवात् उपस्थितेष्टभेदाग्रहस्यैव सर्वत्र प्रवर्त्तकत्वेन नेदं रजतमित्यादावतिप्रसंगाभावादिति चेन्न सत्यरजतस्थले पुरोवर्त्तिविशेष्यकरजतत्वप्रकारकज्ञानस्य लाघवेन प्रवृत्तिजनकतया शुक्तावपि रजतार्थिप्रवृत्तिजनकत्वेन विशिष्टज्ञानस्यैव कल्पनात् । ९ ॥

ग्रहत्वरूपगुरुधर्मावच्छिन्नस्य च कारणतापत्तेः एवं च तत्प्रवृत्तिं प्रत्यन्वयव्यतिरेकाभ्यां विशिष्टज्ञानस्य कारणतायां कल्पनीयायां लाघवात्सामान्यतः प्रवृत्तित्वावच्छिन्नं प्रति विशिष्टज्ञानत्वेनानुगतकार्यकारणभावस्यैव कल्पनीयतया विसंवादिप्रवृत्तेरपि तत्कार्यतावच्छेदकावलीढतया तत्पूर्वं विशिष्टज्ञानस्य कल्पनीयत्वादन्यथाख्यातिर्निराबाधैवेति समाधत्ते सत्यरजतेति रजतत्वप्रकारकज्ञानस्येति तादृशज्ञानत्वावच्छिन्नस्येत्यर्थः प्रवृत्तिजनकतया प्रवृत्तित्वावच्छिन्नजनकतया विशिष्टज्ञानस्यैव पुरोवर्त्तिविशेष्यकेष्टतावच्छेदकप्रकारकज्ञानस्यैव एतेनेष्टभेदाग्रहस्य व्यवच्छेदः कल्पनात् । अनुमानात् तत्प्रयोगस्तु इयं पुरोवर्त्तिविशेष्यकेष्टतावच्छेदकप्रकारकज्ञानजन्या प्रवृत्तित्वात् रजतस्थलीयप्रवृत्तिवदिति स्यादेतत् प्रत्यक्षे सन्निकर्षस्य कारणतया रजतत्वांशे तदभावेन कथं शुक्ताविदं रजतमिति प्रत्यक्षमिति चेन्नैवं लौकिकसन्निकर्षस्यापि प्रत्यक्षजनकतया व्यवस्थापितत्वेन ज्ञानलक्षणाप्रत्यासत्तेरेव प्रकृते संभवात् ॥

अनुभवेतीति स्मृतिं संस्कारं च प्रत्यनुभवत्वेन कारणतावदतां प्राचामभिप्रायः तत्तद्विषयकस्मृतिं तादृशसंस्कारं च प्रति तत्त
द्विषयकानुभवत्वेनैव हेतुता न तु तत्तद्विषयकज्ञानत्वेनानुभवत्व व्यापिजातित्वेन ज्ञानत्वापेक्षया गौरवाभावात् न च वि
निगमनाविरह इति शंक्यं व्याप्यधर्मपरिष्कारेण कारणत्वसंभवे व्यापकधर्मस्यान्यथासिद्धिनिरूपकत्वादिति नवीनाः
पुनस्तद्विषयकस्मृतिं तादृशसंस्कारं च प्रति तत्तद्विषयकज्ञानत्वेनैव हेतुता न त्वनुभवत्वेन संस्कारस्य फलनाश्यतया प्र
थमस्मरणेनैवानुभवजन्यसंस्कारस्य नाशेन सकृदनुभूतस्य स्मरणोत्तरमस्मरणप्रसंगात् न च स्वजन्यस्मरणस्य सं
स्कारनाशकत्वे स्मृतिसाधारणे न ज्ञानत्वेन हेतुत्वेपि घटपटादिरूपनानाविषयावगाहिनानुभवेन जनितस्य तावद्वि
षयकसंस्कारस्य घटाद्येकैकगोचरस्मरणेनापि विनाशात्तदुत्तरं पटादिस्मरणानुपपत्तिस्तत्तद्विषयकसंस्काराभावा

संस्कारं विभजते संस्कार इति संस्कारत्वजातिमान्संस्कारः वेगस्याश्रयमाह वेग इति वेगत्वजातिमान्वेगः भावनां

संस्कारस्त्रिविधः वेगो भावना स्थितिस्थापकश्चेति वेगः पृथिव्यादिचतुष्टयमनोमात्रवृत्तिः अनुभ
वजन्या स्मृतिहेतुर्भावना आत्ममात्रवृत्तिः ॥ ॥ लक्षयति अनुभवेति अनुभवध्वंसेतिव्याप्तिवारणाय
स्मृतीति आत्मादावतिव्याप्तिवारणायानुभवेति स्मृतेरपि संस्कारजनकत्वं नवीनैरुक्तम् ॥ ९ ॥

त्स्मृतिजन्यपटादिगोचरसंस्कारस्य च भिन्नविषयतया पटादिस्मारकत्वायोगादतः स्वजन्यचरमस्मृतेरेवानामत्यान तद्वा
क्तित्वेन तत्र संस्कारनाशकतया अंगीकर्त्तव्यतयानुभवत्वेन जनकतायामपि न दोष इति वाच्यम् अन्यूनविषयस्यै
व फलस्य नाशकत्वांगीकारेणादोषात् जायते च पुनः पुनः स्मरणाद्दृढतरः संस्कारः दार्ढ्यं चोत्कर्षरूपो जातिविशे
षो झटिति स्मृत्युत्पाद प्रयोजकः न च दैववशसंपन्नात् झटित्युद्बोधकसमवधानादेव झटिति स्मृतिनियमोपपत्ती
न तत्प्रयोजकतया संस्कारगतो जातिविशेषः सिद्ध्यतीति वाच्यं झटिति स्मृतेर्दैवाधीनझटित्युद्बोधकसमवधाना
धीनत्वमुपगम्य संस्कारातिशयखंडने शास्त्रादावभ्यासस्यैवानुपपत्तेः किं च परित्यज्य च निश्चिताव्यभिचारकं
रूपं गृह्यमाणव्यभिचारकेण कारणत्वकल्पनं न संभवतीति नानुभवत्वेन स्मृतिसंस्कारहेतुतासंभव इति प्रा

तन्मतं रशीयति स्मृतेरपीति अपिना नुभव परिग्रहः एत
मतिनल क्षणेनुभवजन्येतिव्याने नजन्ये तिनिवेशनीयम् ॥

द्रव्यविभाजकोपाधीति पृथिवीजलत्वादिरूपं यद्द्रव्यविभाजकोपाधिद्वयं प्रत्येकं तत्समानाधिकरणः द्वित्वद्विपृथक्त्वसंयोगादयः तदवृत्तिजातिमद्गुणत्वमित्यर्थः रूपादिषु चतुर्षु तादृशं रूपत्वादिकं सांसिद्धिकद्रवत्वे च द्रवत्वावान्तरजातिं स्नेहादिषु दशसु स्नेहत्वादिकं भावनायां संस्कारत्वावान्तरजातिं चादाय लक्षणसमन्वयः नन्विदं लक्षणमेकत्वादिष्वतिव्याप्तमेकत्वत्वादिजातेरपि तादृशत्वात् न च तादृशोपाधिद्वयसमानाधिकरणवृत्तिगुणत्वन्यूनवृत्तिजातिशून्यगुणत्वमिति तदर्थः एवं चैकत्वादिषु संख्यात्वादेः सत्त्वात्तादृशजातिशून्यत्वस्यासत्त्वेन नातिव्याप्तिरिति वाच्यमेवमपि परिमाणादिष्वतिव्याप्तिः परिमाणत्वादेस्तादृशजातित्वासंभवादिति चेदत्र प्रवदन्त्यभिज्ञाः पद्रू

स्थितिस्थापकं लक्षयति अन्यथेति संख्यादयोष्टौ नैमित्तिकद्रवत्ववेगस्थितिस्थापकाः सामान्यगु

अन्यथाकृतस्य पुनस्तद्वस्थापकः स्थितिस्थापकः कटादिपृथिवीवृत्तिः॥

णाः अन्ये रूपादयो विशेषगुणाः द्रव्यविभाजकोपाधिद्वयसामानाधिकरण्यावृत्तिगुणवृत्तिजातिम ॥त्वं विशेषगुणत्वम्

पावच्छिन्नसमानाधिकरणं यत्किंचिद्द्रव्यविभाजकोपाधिद्वयं तद्भिन्न स्थितिस्थापकवृत्तिभिन्ना च या जातिस्तद्वत्त्वे सति गुणत्वमिति तदर्थः यद्रूपावच्छिन्नसामानाधिकरण्यस्य स्वसमवायसंबंधघटितस्यैव निवेशनीयतया यद्रूपपदेन घटत्वादेर्धर्तुमशक्यत्वाद्घटादावतिव्याप्तिरतो विशेष्यं स्थितिस्थापके ऽतिव्याप्तिवारणाय स्थितिस्थापकभिन्नेति स्थितिस्थापकस्य पृथिव्यादिचतुष्टयवृत्तित्वमते तु न देयं रूपत्वादेर्यद्रूपपदेन धर्तुं शक्यत्वेप्यवान्तरजातीमादाय रूपादिषु लक्षणसमन्वयः पार्थिवानुष्णाशीतस्पर्शस्य वायवीयापेक्षया विजातीयस्यैवानुभवसिद्धत्वात् संख्यादयस्तु सामान्यगुणा इति न तत्र वैजात्यं जलपृथिव्या

दिभेदेन सिद्धो न सिद्धमतस्तत्र नातिव्याप्तिः तादृशजातिमद्भिन्नगुणत्वमेव सामान्यगुणानां लक्षणमवसेयमिति॥

तिपरमाणुवारणायजन्येतिअविनश्यदवस्थमेवापराश्रितमवति
ष्ठते विनश्यदवस्थंत्वनाश्रितंक्षणमवतिष्ठतेययातंत्वादिनाशेप
टादिरिति मनसिकृत्य मूले विनश्यदित्युक्तम्॥

मूलोक्तंसर्वसंग्राहकंनभवतीत्याह वक्रेतेति नित्यमितीति अत्रनित्यत्वंप्रागभावाप्रतियोगित्वंध्वंसाप्रतियोगित्वंवाएकतर
रनिवेशेनापिसंयोगादेर्वारणात् एकपदस्वरूपकथनमितिद्रष्टव्यं मूलेव्यावर्त्तकाइति नित्यद्रव्याणांपरस्परभेदसा

कर्मणोलक्षणमाह चलनेति उत्क्षेपणादीनांकार्यभेदमाह उर्द्धेति शरीरेति वक्रतासंपादकंकर्माकुं
चनम् ऋजुतासंपादकंप्रसारणमित्यर्थः सामान्यंलक्षयति नित्यमिति परमाणुपरिमाणादावतिव्या
प्तिवारणायानेकेति संयोगेऽतिव्याप्तिवारणायनित्यमिति जलपरमाणुगतरूपेतिव्याप्तिवारणायेकेति

चलनात्मकंकर्म उर्द्धदेशसंयोगहेतुरुत्क्षेपणमधोदेशसंयोगहेतुरपक्षेपणं शरीरसन्नि
कृष्टसंयोगहेतुराकुंचनंशरीरविप्रकृष्टसंयोगहेतुः प्रसारणमन्यत्सर्वंगमनंपृथिव्यादिचतु
ष्टयमनोमात्रवृत्तिः नित्यमेकमनेकानुगतंसामान्यंद्रव्यगुणकर्मवृत्तिपरंसत्ताअपरंद्रव्यत्वा
दिः नित्यद्रव्यवृत्तयोव्यावर्त्तकाः विशेषाः नित्यसंवंधः समवायः अयुतसिद्धवृत्तिःययोर्द्व
योर्मध्येएकमविनश्यदपराश्रितमेवावतिष्ठतेतावयुतसिद्धौअवयवावयविनौगुणगुणिनौ
क्रियाक्रियावंतौजातिव्यक्तीविशेषनित्यद्रव्येचेति॥ ॥अनुगतत्वंसमवेतत्वंघटाद्यत्यंताभावः घ
टाद्यनुगतोपि असमवेतइतितेननाभावादावतिव्याप्तिः विशेषंलक्षयतिनित्येतिसमवायंलक्षयति नित्य
संवंधइति संयोगेऽतिव्याप्तिवारणायनित्यइति आकाशादावतिव्याप्तिवारणायसंवंधइति अयुतसिद्ध
लक्षणमाह ययोरिति नीलोघटइतिविशिष्टप्रतीतिर्विशेषणविशेष्यसंवंधविषयाविशिष्टप्रत्ययत्वात्
दंडीतिप्रत्ययवदितिसमवायसिद्धिः अवयवावविनावितिद्रव्यासमवायिकारणमवयवःतज्जन्यद्रव्यमव
धकाइत्यर्थः अथविशेषपदार्थेकिंप्रमाणंनचात्यंतसंकीर्णानांपरमाणूनांभेदकधर्मविनाभेदासिद्धिरतोविशेषांगी
कर्त्तव्यइतिवाच्यमेकत्वादिव्यक्तेरेवभेदकत्वसंभवादितिचेन्नयतः एतत्परमाणोनतत्परमाणुभेदसाधनेएकत्वादेर्व्य
भिचारि तयाएतदेकत्वादेवहेतुतावाच्यानचतयोः परमाण्वोर्भेदासिद्धावेकत्वादावेतत्वंसुग्रहं एतत्परमाणुसमवेत

त्वेनसमानजातीया
नांपरस्परभेदासाधकइति तत्रापिविशेषांतरापेक्षानास्त्यतोनान
वस्थेतिसंप्रदायः वैशेषिकमतसाधारण्येनसमवायेऽनुमानं
प्रमाणयति नीलइति समवायिकारणस्यात्यावयविनिसत्वाद्द्रव्ये

Digitized by Google

प्रागभावे प्रमाणमाह भविष्यतीति संसर्गेति तादात्म्यातिरिक्तसंसर्गेत्यर्थः ध्वंसप्रागभावयोः प्रतियोगितावच्छेदकसंबंधो वर्त्तते
इति मताभिप्रायेण त्रैकालिकेति विशेषणमन्यथाऽन्योन्याभाववारकेणैव तयोर्वारणात्तद्वैयर्थ्यापत्तेः यदि संसर्गावच्छिन्ने
त्यादेरन्योन्याभावभिन्नाभाव इत्यर्थः तदा त्रैकालिकेति सिद्धांतेपि सार्थकं त्रैकालिकत्वमिह नित्यत्वरूपं मूले भूतले घ
टो नास्तीति अत्र घटाभावांशे भूतलस्य विशेष्यत्वं संबंधः घटाभाववद्भूतलमित्यत्र तु भूतलांशेऽभावस्य विशेषणत्वं
संसर्ग इति वदतां प्राचामयमभिप्रायः विशेष्यत्वविशेषणत्वे स्वरूपसंबंधविशेषौ न त्वानीयविषयताविशेषौ न च विशे

प्रागभावं लक्षयति अनादिरिति आकाशादावतिव्याप्तिवारणाय सांत इति घटादावतिव्याप्तिवारणा
यानादिरिति प्रतियोगिसमवायिकारणवृत्तिः प्रतियोगिजनकः भविष्यतीतिव्यवहारहेतुः प्रागभावः
ध्वंसं लक्षयति सादिरिति घटादावतिव्याप्तिवारणायानंत इति आकाशादावतिव्याप्तिवारणाय सादिरिति

अनादिः सांतः प्रागभावः उत्पत्तेः पूर्वं कार्यस्य सादिरनंतः प्रध्वंसः उत्पत्त्यनंतरं कार्यस्य त्रैका
लिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यंताभावः यथा भूतले घटो नास्तीति तादात्म्यसंबंधा
वच्छिन्नप्रतियोगिताकोऽन्योन्याभावः यथा घटः पटो नास्तीति॥ ॥ प्रतियोगिजन्यः प्रतियोगिसम

वायिवृत्तिः ध्वस्तत्वव्यवहारहेतुर्ध्वंसः अत्यंताभावं लक्षयति त्रैकालिक इति अन्योन्याभावे तिव्याप्तिवारणाय संस
र्गावच्छिन्न इति ध्वंसप्रागभावयोरतिव्याप्तिवारणाय त्रैकालिक इति अन्योन्याभावं लक्षयति तादात्म्य इति

णानाम्यः स्वरूपसंबंध एक एवास्तु भूतले घटो नास्तीति प्रतीतौ भूतलं घटाभाववदिति प्रतीतौ वैलक्षण्यायास्य विशेषणत्वा
वच्छिन्नाधेयताविषयत्वकल्पनेनैव निर्वाहादिति वाच्यं तादृशप्रतीत्योर्वैलक्षण्याय प्रथमायां विशेष्यतावच्छिन्नाधेयता
द्वितीयायां विशेषणता संसर्ग इत्युपेयते किं वा प्रथमायां विशेषणतावच्छिन्नाधारता द्वितीयायां विशेष्यतावच्छिन्नाधार
तेत्यत्र विनिगमकस्य दुर्लभत्वात् न च तादृशप्रतीत्योः संसर्गांशेऽविलक्षणत्वेपि विशेष्यविशेषणभावभेदाद्वैलक्षण्ये

त्वनामकयोरुभयोः स्वरूपसंबंधविशेषयोः संसर्गतात्तथाच भूतलवानघटाभावांशे भूतलस्यविशेष्यत्वसंसर्गौघटाभावे
भूतलमित्यत्र च भूतलांशे भावस्यविशेषणतासंसर्गोबाधितइति भ्रमसत्वनिर्वाहइति संक्षेपः ध्वंसप्रागभावयोरिवै
कप्रतियोगिकयोरत्यंतान्योन्याभाव योः किमेकविधत्वंनेत्याह प्रतियोगितेति आरोप्येति प्राचीनमताभिप्रायेणअ
त्रयथायोग्यंप्रतियोगितावच्छेदकधर्मसंसर्गभेदोऽत्यंताभाववहुत्वप्रयोजकःप्रतियोगितावच्छेदकधर्मभेदोऽन्योन्या
भाववहुत्वप्रयोजकइतिद्रष्टव्यम् तदेवदर्शयति केवलेति केवलदेवदत्ताभावाद्विशिष्टाभावअतिरिक्तइत्यन्व

प्रतियोगितावच्छेदकारोप्यसंसर्गभेदादेकप्रतियोगिकयोरत्यंताभावान्योन्याभावयोर्बहुत्वम् केव
लदेवदत्ताभावाद्दंड्यभावइतिप्रतीत्याविशिष्टाभावः एकसत्वेद्वौनस्तइतिप्रतीत्याद्वित्वावच्छिन्ना
भावः संयोगसंबंधेन चघटवतिसमवायसंबंधेनघटाभावः संबंधावच्छिन्नाभावः तत्तद्घटाभावा
द्घटत्वावच्छिन्नाप्रतियोगिताकसामान्याभावश्चातिरिक्तः एवमन्योन्याभावोपि ॥ ९ ॥

यः अन्यथाकेवलदेववदत्तवतिदंडीनास्तीतिप्रत्ययानापत्तेः उभयाभावस्यातिरिक्तत्वेप्रतीतिंप्रमाणयति ए
कसत्वेपीति घट पटौनस्तइत्यादौघटत्वंघटत्वमुभयत्वंचैतत्त्रितयंप्रतियोगितावच्छेदकंकेवलघटवतिकेव
लपटवति यत्किंचिदुभयवतिचतथाप्रत्ययात् संबंधभेदेनाभावस्यातिरिक्तत्वंदर्शयति संयोगेनेतिसामा
न्यविशेषाभावयोर्भेदंदर्शयति तत्तदिति अतिरिक्तइति अन्यथायत्किंचिद्घटवतिघटोनास्तीतिप्रत्ययाप
त्तेः एवमन्योन्याभावोपीति अवच्छेदकभेदात् तत्तद्घटभेदः तत्तदुभयभेदः घटभेदश्चअतिरिक्तइत्यर्थः

प्रसंगादाह घटत्वेनेति नांगीक्रियतइति अभावधियोविशिष्ट वैशिष्ट्यावगाहिमर्यादोपबृंहितेनतयाघटत्वेनप
टोनास्तीत्यादिप्रत्ययस्यविशिष्टवैशिष्ट्यानवगाहिनोघटत्वादेः प्रतियोगितावच्छेदकत्वव्यवस्थापकत्वाभावे
नव्यधिकरणधर्मावच्छिन्नाभावेमानाभावादितिभावः ननुतर्हितादृशप्रत्ययस्यकागतिरित्यतआह पटइति न
नुघटत्वेनपटोनास्तीतिप्रतीतेः पटाधिकरणकघटत्वाभावावगाहित्वंनसंभवति असतिबाधकेतच्छब्दोल्ले

घटत्वेनपटोनास्तीतिव्यधिकरण धर्माव॥
च्छिन्नाभावोनांगीक्रियतेपटेघटत्वंनास्तीति
तस्यार्थः अतिरिक्तत्वेसः केवलान्वयी॥

खिप्रतीतेस्तच्छब्दप्रतिपाद्यार्थविषयत्वपरित्यागायोगात् पटाधिकरणकघटत्वाभावस्यचघटत्वेनपटोनास्ती
ति शब्दात्कथमप्यप्रतीतेः किंत्ववच्छिन्नप्रतियोगिताकत्वसंबंधेनाभावांशेस्वातंत्र्येणघटत्वावगाहित्वमेवअ
भावबुद्धिविशिष्टवैशिष्ट्यावगाहिमर्यादांनातिशेतइतिनियमस्तुन एवंचव्यधिकरणधर्मावच्छिन्नाभावःसप्र
माणइतिचेदस्तुतर्ह्यतिरिक्तत्वंतस्येत्याह अतिरिक्तत्वइति सः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकः के
वलान्वयीतिप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिरूपविरोधिविरहादितिभावः



Digitized by Google

ननुभूतलादौ घटसत्वदशायां नतदभावबुद्धिरन्यदानुजायते अतस्सामयिकाभावोऽतिरिक्त एवांगीकर्त्तव्यइतिवदंतंनिरा
कर्त्तुमाह सामयिकेति प्रतियोगिविरहसमये प्रतीयमानोऽत्यंताभावः सामयिकाभावः नतूत्पत्तिविनाशशालिरतिरिक्त
इतिसमुदितार्थः नन्वेवंभूतलेघटस्यानयनदशायामपितदभावस्यनित्यत्वेनसत्वात्प्रत्ययापत्तिरतआह घटाभा
ववतीतितिपामकत्वमेवसमुपपादयति घटवतीति नतत्कालावच्छिन्नभूतलादेरेवघटाद्यभावसंसर्गतयाघटका
लेचतच्छून्यकालविशिष्टभूतलादिरूपसंसर्गाभावेनतदानतदभावबुद्धिरित्यपिद्रष्टव्यंनन्वभावोभावस्त्वतिरिक्तःप
दार्थः यस्मिन्नधिकरणेघटोनास्तीत्यादिप्रत्ययस्तस्मिन्नधिकरणेघटाद्यभावत्वकल्पनेनैवतथाप्रतीतिनिर्वाहा

सामायिकाभावोप्यत्यंताभावएवसमयविशेषेप्रतीयमानः घटाभाववतिघटानयनेऽत्यंताभावस्यान्यत्र
गमनाभावेप्यप्रतीतेर्घटापसरणेसतिप्रतीतेर्भूतलघटसंयोगध्वंसप्रागभावयोर्घटात्यंताभावप्रतीतिनि
यामकत्वंकल्पतेघटवतितत्संयोगप्रागभावध्वंसयोरसत्वादत्यंताभावस्याप्रतीतिः घटापसरणेचसंयोग
ध्वंससत्वात्प्रतीतिः केवलाधिकरणादेवनास्तीतिव्यवहारोत्पत्तौवभावोनपदार्थांतरमितिगुरवस्तन्नअ
भावानंगीकारेकैवल्यस्यनिर्वक्तुमशक्यत्वात् अभावाभावोभावएवनातिरिक्तः अनवस्थाप्रसंगात् ध्वं
स प्रागभावस्तद्ध्वंसश्चप्रतियोग्येवअभावाभावअतिरिक्तएवतृतीयाभावस्यप्रथमाभावरूपत्वात् नव

त् क्लृप्तधर्मिणिधर्मकल्पनायामक्लृप्तधर्मिकल्पनातोलघीयस्त्वादितिगुरुमतमाशंक्यनिराचष्टे केवलेति यद्यप्यनंते
ष्वधिकरणेषुधर्मकल्पनातोऽतिरिक्तैकधर्मिकल्पनस्यैवलघीयस्त्वात्त्वोक्तन्यायस्यानवतारः किंचाभावस्याधिकरण
स्वरूपत्वेजलादौविद्यमानस्यगंधाभावस्यजलादिरूपत्वादितरेंद्रियग्राह्यतापत्तिरित्यादिदूषणानिप्रस्फुरंतितथापि
केवलाधिकरणादेवेतितद्वचननिरासादेवतन्निरस्तेतिसंभवेकिमेतान्यपेक्षितानीत्यालोच्यतदेवनिराकरोतिअ

त·दी·
नी·
४८

केवल्यस्येति नन्वभावस्यातिरिक्तत्वे तदभावोप्यतिरिक्तस्तस्याप्यभावस्तथेत्यनवस्था स्यादत आह अभावाभाव इति ध्वंस
सेत्यादि ध्वंसस्य प्रागभावः प्रतियोगिस्वरूपस्तत्प्रागभावरूपं प्रागभावध्वंसस्तु प्रतियोगिरूप तत्ध्वंसरूपश्चेत्यर्थो
वसेयः तेन प्रतियोगिप्रागभावदशायामपि ध्वंसो भविष्यतीति प्रत्ययस्य प्रतियोगिध्वंसदशायामपि प्रागभावो नष्ट इ
त्यस्य चोपपत्तिः तत्काले द्रव्यत्वं नास्तीति प्रत्ययो जायते द्रव्यत्वाभाव इति न जायते इति वैषम्यनिर्वाहाय नास्तीति

ननु प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांतावयवतर्कनिर्णयवादजल्पवितंडाहेत्वाभासछलजा
तिनिग्रहस्थानानां तत्वज्ञानान्निःश्रेयसाधिगम इति न्यायशास्त्रे षोडशपदार्थानामुक्तत्वात्कथं स
प्तैवेत्यत आह सर्वेषामिति सर्वेषां सप्तस्वेवांतर्भाव इत्यर्थः आत्माशरीरेंद्रियार्थबुद्धिमनःप्रवृत्ति
दोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयमिति द्वादशविधप्रमेयम् प्रवृत्तिर्धर्माधर्मौ रागद्वेषमोहाः

॥सर्वेषामपि पदार्थानां यथायथमुक्तेष्वंतर्भावात्सप्तैव पदार्था इति सिद्धम्॥

दोषाः रागइच्छा द्वेषो मन्युः मोहः शरीरादावात्मभ्रमः प्रेत्यभावो मरणम् फलं भोगः अपवर्गो मोक्षः
स च स्वसमानाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसः प्रयोजनं सुखप्राप्तिः दुःखहानिश्च
दृष्टांतो महानसादिः प्रामाणिकत्वेनाभ्युपगतोर्थः सिद्धांतः निर्णयो निश्चयः प्रमाणफलं तत्वबुभुत्सोः क
था वादः उभयसाधनवती विजिगीषुकथा जल्पः स्वपक्षस्थापनहीना वितंडा कथा नाम नानावक्तृकः पूर्वो
त्तरपद प्रतिपादकवाक्यसंदर्भः अभिप्रायांतरेण प्रयुक्तस्यार्थांतरं प्रकल्प्य दूषणं छलं असदुत्तरं जातिः

प्रत्यये दैशिकसंबंधावच्छिन्नाधेयत्वभानं परिकल्पनीय मित्यं च घटाभावाभावादेर्घटादिरूपत्वे त्विह घटाभावो ना
स्तीति प्रत्ययस्य भ्रमत्वनेव स्यात् भावस्य विशेषणताविशेषेण वृत्त्यनङ्गीकारादत अभावाभावोतिरिक्तो न तु भावरू

प इति नवीनमतं दर्शयति अभावेतित्तहीनवस्थेत्यत आ
ह तृतीयेति परमकारुणिकेन मुनिना दुःखपंकमग्नं ज
गदुद्दिधीर्षुणा प्रणीतं प्रमाणप्रमेयेत्यादि सूत्रं तद्विरोधं
परिहर

एमः
४८

र्तुमाक्षिपति नन्विति प्रत्यक्षप्रमाणस्यद्रव्येऽनुमानादीनांचगुणेंतर्भावस्यस्फुटत्वात् प्रमेयादीनांद्रव्यादिष्वंतर्भावमा
ह आत्मेत्यादिना आत्मशरीरेंद्रियाणांद्रव्येंतर्भावः अर्थस्यपृथिव्यादिरूपस्यद्रव्यादिषुबुद्धेर्गुणे अंतरिंद्रियस्यमन
सोद्रव्येंतर्भावः एवमग्रेपियथायथमंतर्भावोद्रष्टव्यः धर्माधर्माविति तज्जनिकेत्यर्थः एतच्चस्फुटमाकरे रागःइच्छा
विशेषः मरणमिति मरणानंतरभाविजननमित्यर्थः तथाचपदव्युत्पत्तिःप्रेत्यमृत्वाभावोजननमितिचरमप्राणश
रीरसंयोगध्वंसोमरणं आद्यशरीरप्राणसंयोगोजननंमुक्तात्मसंयोगध्वंसवतः शवस्यमुक्तत्वापत्तिवारणायदुःख
ध्वंसवतामस्मदादीनामपिमुक्तत्वापत्तिवारणायकालीनांतं अन्यदीयदुःखप्रागवसमानकालिकदुःखध्वंसवतां
मुक्ताद्यात्मनाममुक्तत्वप्रसंगात्समानाधिकरणेतिदुःखप्राग भावविशेषणंनचसमानाधिकरणदुःखासमानका
लीनेत्यनेनैवसुषुप्तिकालिकदुःखध्वंसस्याप्यग्रिमदुःखक्षणवृत्तेर्वारणात्प्रागभावेति व्यर्थमितिवाच्यम् यथा
यथासन्निवेशिवैयर्थ्याभावादितिदिक् संशयस्यनिरूपितत्वात्प्रयोजनस्वरूपंदर्शयति प्रयोजनमिति उभयसा
धनवतीद्वंद्वंचवितंडायामतिव्याप्तिवारणायेतिध्येयम् स्वपक्षेतिअत्रविजिगीषुकथेत्यनुवर्तते नानेति
एकेनपूर्वपक्षः क्रियतेऽन्येनचसमाधानमेवंक्रमेणनानाकर्तृकत्वंवाक्यसमूहस्यावसेयम् छलमितियथानच
कंबलोयंदेवदत्तइतिनवत्वतात्पर्येणप्रयुक्तस्यनवत्वसंख्याविशिष्टमर्थांतरंपरिकल्प्यकश्चिद्दूषयति नास्यनवकंब
लाः संत्यतिदरिद्रत्वादित्यादि असदुत्तरमिति उत्तरस्यासत्वंतुस्वसाधकतासाधारण्येनपरसाधकतासाधकतया
स्वव्यापकत्वात् तथाचस्वव्याघातकमुत्तरंजातिरितिलक्षणंपर्यवस्यति

तद्वांतरभेदानदर्शयति साधर्म्येत्यादिना दृष्टांते रूपमाणत्वात्समाशब्दस्य प्रत्येकं योगः साधर्म्यसमा वैधर्म्यसमेत्याद
यः चतुर्विंशतिजातयः साधर्म्येण स्थापनाहेतुदूषकमुत्तरं साधर्म्यसमा यथा आत्मा सक्रियः क्रियाहेतुगुणवत्त्वात् लो
ष्टवत् क्रियाहेतुगुणश्चात्र क्रियाजनकवायुसंयोगादिरेवेति स्थापनायामुत्तरं यदि सक्रियसाधर्म्यात्सक्रियस्तदा विभुत्व
रूपनिष्क्रियसाधर्म्यान्निष्क्रिय एव किं न स्यात् न चात्र किंचिद्विनिगमकमस्तीति वैधर्म्येण दूषकमुत्तरं वैधर्म्यसमा
यथा तत्रैव क्रियावतो लोष्टस्य साधर्म्याद्यदि क्रियावानात्मा तदा विभुत्वरूपतद्वैधर्म्यान्निष्क्रिय एव किं न स्यात् न हि त
त्साधर्म्यात् क्रियावता भवितव्यं न तद्वैधर्म्यान्निष्क्रियेण न भवितव्यमित्यत्र किंचिन्नियामकमस्तीति २ परोक्तसाध
नादेव तद्व्यापकधर्मस्य पक्षे आपादनमुत्कर्षसमा यथा शब्दो नित्यः कृतकत्वाद्घटवदित्यादौ कश्चिदेवमाह यदि

॥साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्य॥

कृत कत्वेन हेतुना शब्दो घटवदनित्यः स्यात्तर्हि तेनैव हेतुना शब्दो घटवत्सावयवः स्यादिति ३ परोक्तदृष्टांतस
धर्म्येण पक्षे पराभिमतधर्मान्तरस्याभावसाधनमपकर्षसमा यथा तस्मिन्नेवानुमाने यदि कृतकत्वेन शब्दो घटवद
नित्यः स्यात्तर्हि तेनैव शब्दो घटवदश्रावणः स्यादिति वर्ण्यस्य स्थापनीयस्य दृष्टांतधर्मस्य पक्षे साधनं वर्ण्यसमा य
था पूर्वोक्तानुमाने क्रियाजनकनोदनाख्यसंयोगवत्त्वाल्लोष्टादेर्भवतु क्रियावत्त्वं आत्मनस्तु क्रियावत्त्वेन तज्जनकनो
दनाख्यसंयोगवत्त्वमपि स्यादिति ५ साध्यहेत्वोर्धर्मयोरपि पक्षे तुल्यतया साधनमवर्ण्यसमा यथा तत्रैवानुमाने
लोष्टादिगतनोदनादिरूपक्रियाहेतुगुणवत्त्वमात्मन्यसिद्धं तथा च तुल्यतया यथाऽसिद्धेन क्रियाहेतुगुणेनात्मनि
क्रियावत्त्वं साध्यते न तथा तादृशेन क्रियावत्त्वेन तज्जनकगुणवत्त्वमपि किमिति न साध्यते नियामकाभावादिति ६॥

दृष्टांतविकल्पं प्रदर्श्य यदा दार्ष्टांतिके विकल्पकथनं विकल्पसमा यथा तत्रैवानुमाने क्रियाहेतुगुणयुक्तं किंचिद्गुरु यथा लोष्ठा
दि किंचिल्लघुः यथा वायुः एवं क्रियाहेतुगुणयुक्तं किंचित्क्रियावत्स्यात् यथा लोष्ठादिः किंचिदक्रियं यथात्मा पू
र्वविकल्पो भवत्ययं तु न भवतीत्यत्र किं नियामकं स्यादिति ७ दृष्टांतस्य पक्षतुल्यताकथनं साध्यसमा साध्यशब्दो
त्र पक्षवाची यथा तत्रैव यदि यथा लोष्ठस्तथात्मेति त्वयोच्यते तदा यथात्मा तथा लोष्ठोऽप्यस्त्वित्यायातं तथा च य
द्यात्मनि क्रियावत्त्वं साध्यं तेन तर्हि लोष्ठेपि तत्साधनीयं नेति चेत्तर्हि यथा लोष्ठस्तथात्मेति न वाच्यं लोष्ठसदृशश्चा
त्मा आत्मसदृशो लोष्ठ इत्यत्र नियामकाभावादिति ८ प्राप्य प्रत्यवस्थानं प्राप्तिसमा प्राप्तिश्च साध्यहेत्वोः सामाना
धिकरण्यं यथा तत्रैव क्रियाहेतुगुणवत्त्वेनैव किमिति क्रियावत्त्वं साध्यते किमिति क्रियावत्त्वेन तादृशगुणवत्त्वं

विकल्पसाध्यप्राप्त्यप्राप्तिप्रसंगप्रतिदृष्टांत ॥ ॥

न उभयोरविशेषादिति ९ अप्राप्य प्रत्यवस्थानमप्राप्तिसमा यथा तत्रैव पूर्वोक्तदोषाद् प्राप्तस्य हेतोः साध्यसा
धकत्वं वाच्यं तथा चाप्राप्तविशेषत्वात्सर्वः सर्वं साधयेदिति अयमेव हेतुः साध्याभावं किमिति न साधयेदि
त्यत्र विनिगमकाभावादिति १० साधनपरंपराप्रश्नः प्रसंगसमा यथा क्रियावत्त्वे क्रियाहेतुगुणवत्त्वं साधनं तत्र
किं साधनं नहि साधनं विना कस्यचित्सिद्धिरस्ति एवं तत्रापि किं साधनमित्यादि ११ दृष्टांतांतरेण साध्याभा
वसाधनं प्रतिदृष्टांतसमा यथा तत्रैव लोष्ठदृष्टांतेन क्रियावत्त्वे साधिते निष्क्रियाकाशदृष्टांते नात्मनो निष्क्रिय
त्वमेव किं न स्यात् लोष्ठदृष्टांतेन क्रियावत्त्वमाकाशदृष्टांतेन निष्क्रियत्वं नेत्यत्र नियामकाभावादिति १२ 

Digitized by Google

अनुत्पत्त्याप्रत्यवस्थानमनुत्पत्तिसमा यथाघटोननित्यः जन्यैकत्वादित्यादौ कश्चिदाह यदिजन्यैकत्वमनित्यत्वेप्रमाणंत॰
दाघटे एकत्वोत्पत्तेः पूर्वंतदभावान्नित्यत्वंनित्यश्चेत्तदानुत्पन्नएवेति १३ साधारण धर्मप्रदर्श्यसंशयोद्भावनंसंशयसमा।
यथाशब्दोऽनित्यः कार्यत्वादित्यादौ शब्दस्यानित्येनघटेनसहकार्यत्वरूपंसाधर्म्यंयथास्तितथानित्येनशब्दत्वेनसह श्राव
णप्रत्यक्षविषयत्वं साधर्म्यमस्तीति उभयसाधर्म्यदर्शनात्संशयः स्यात् एकपरिशेषेनियामकाभावादिति १४ वायुक्त॰
हेतोः साध्यविपरीतसाधकंहेत्वंतरोद्भावनंप्रकरणसमा सत्प्रतिपक्षोदाहरणमेवात्रोदाहरणंबोध्यम् १५ कालत्रयेपि
हेतुत्वासंभवेनाहेतुत्वकथनमहेतुसमा यथाकार्यत्वादिरूपसाधनंसाध्यात् नित्यत्वात्पूर्वकालवृत्तिचेन्नतदानित्यत्वरूप
साध्यस्यतदानीमभावात्कस्यसाधनंकिंकस्यसाध्यंविनिगमकाभावात्कस्यसाध्यमनित्यत्वंयदिचोभयमेककालवृत्ति

॥अनुत्पत्तिः संशयप्रकरणहेत्वर्थापत्ति॥

किंकस्यसाध्यंविनिगमकाभावादितिहेतुसमेतिपाठेतुकालत्रयेपिहेतुत्वस्यासंभवकथनंहेतुसमेत्यर्थः १६ अर्थाप।
त्तिपुरस्कारेणसाध्याभावोद्भावनमर्थापत्तिसमा यथापूर्वोक्तानुमानेशब्दस्यानित्यसाधर्म्याद्नित्यत्वंयदितदार्थापत्त्या
सिद्धंनित्यसाधर्म्यान्नित्यत्वमपिएकतरावधारणेनियामकाभावात् १७ सर्वाविशेषोद्भावनमविशेषसमा यथातत्रै
वकृतकत्वादिनाऽनित्यघटादिसाधर्म्येणशब्दस्यानित्यत्वंतदाप्रमेयत्वादिरूपेणतत्साधर्म्येणसर्वस्यैवानित्यत्वंस्या
त् मदुक्तसाधर्म्येणतत्सिद्ध्यति ननुत्वदुक्तेनेत्यत्रनियामकाभावादिति १८ उभयपक्षसाधर्म्येणसाधनोपपत्ति॰
कथनमुपपत्तिसमायदिचानित्यत्वसाधनंकार्यत्वमुपपद्यत इतिशब्दस्यानित्यत्वंतदानित्यत्वसाधनमपि किं
॥ चिदुपपद्यत इति नित्यत्वंकिंनस्यादिति॥



Digitized by Google

वापुपदृष्टांतसाधनाभावेपिसाध्यस्योपलब्धिकथनमुपलब्धिसमायथाशब्दोऽनित्यः प्रयत्नानुविधायित्वात् घटवत्
दित्यत्रप्रयत्नंविनापिवायुनोदनवशात् वृक्षशाखाभंगजन्योपलब्धेर्नप्रयत्नानुविधायित्वंशब्देऽस्तीति २० वादि
नानुपलब्धिवशात्कस्यचित्पदार्थस्यानंगीकारेऽनुपलब्धिवशादेववाद्यभिमतस्यापियत्किंचित्पदार्थस्याभा
वसाधनमनुपलब्धिसमायथाजलादेर्विद्यमानस्याप्यावरणवशादनुपलब्धिः तद्वत्उच्चारणात्पूर्वंशब्दस्यवि
द्यमानस्याप्यावरणवशादनुपलब्धिरित्येतन्मतंवादिनादूष्यते यथावरणवशाच्छब्दोनोपलभ्यते तदाजल
लाद्यावरणमिवशब्दाद्यावरणमप्युपलभ्येतेति अत्रोत्तरं यदिभवद्भिरनुपलब्धितआवरणवशाच्छब्दोनो
पलभ्यते तदानुपलब्धेरप्यनुपलब्ध्याभावेसिद्धेतदभावादावरणसिद्धिरिति २१ धर्मस्यनित्यत्वानित्य

॥ ॥उपलब्ध्यानुपलब्धि नित्यानित्यकार्य्याकार्यसमाजातयः

त्वविकल्पाद्धर्मिणि नित्यत्वसाधनंनित्यसमायथाशब्दस्ययदनित्यत्वंभवद्भिरुच्यतेतन्नित्यमनित्यंवाय
दिनित्यंन दाशब्दवृत्तेरेवतस्यसदानत्वाच्छब्दस्यातथात्वमागतं अथापित्वनदाशब्देकदाचिदनित्य
त्वाभावोस्तीतिनित्यएवशब्दइत्युभयथापिशब्दस्यनित्यत्वमिति २२ अनित्यदृष्टांतसाधर्म्यात्सर्वानि
त्यत्वप्रसंगोद्भावनमनित्यसमा यथायद्यनित्येनघटेनसादृश्याच्छब्दोऽनित्यइत्युच्यते तदायेनकेनचि
द्धर्मेणसर्वस्यैवतत्सादृश्यत्वात्सर्वस्यानित्यत्वप्रसंगइति २३ वाद्युक्तहेतोरन्यकार्येणापिसंभवाभिधानंका
र्यसमायथातत्रैवप्रयत्नानुविधायित्वमुभयथापिसंभवतिघटादिवच्छब्दस्वरूपोत्पत्तौजलादिवदावरक
निवृत्तौचउभयत्रापिप्रयत्नानुविधायित्वदर्शनात् तथाचतस्यावरकनिवृत्तिरूपकार्यांतरस्यसंभवान्न
नियतत्वमिति २४ क्वचित्कारणसमेतिपाठः तस्यापिकारणस्यप्रयत्नानुविधायित्वस्योभयत्रशादृश्यो

त॰दी॰
नी॰
५१

निग्रहस्थानं लक्षयति वादिन इति इदं च यद्यपि छलादावप्यस्ति तथाप्यर्थान्तरादिरूपनिग्रहस्थानमध्येऽन्तर्भावाददोषः छल
त्वादिनापि ज्ञानस्योपयोगित्वात्पृथगुपादानं हेत्वाभासवत् तस्यावान्तरभेदान्दर्शयति प्रतिज्ञेत्यादिना तत्र प्रतिज्ञा
तार्थविरुद्धाभ्युपगमः प्रतिज्ञातार्थपरित्यागो वा प्रतिज्ञाहानिः यथा शब्दो नित्यः प्रत्यक्षगुणत्वादित्यत्र सोऽयं गकार इ
त्यादिप्रत्यभिज्ञाबलात्परेण बाधे उद्भाविते अस्तु तर्हि नित्यः शब्द इति नित्यत्वमंगीकुर्वन्वादी शब्दस्यानित्यत्वप्रतिज्ञां
जहाति १ परोक्तदोषोद्दिधीर्षया पूर्वानुक्तविशेषणविशिष्टतया प्रतिज्ञातार्थकथनं प्रतिज्ञान्तरं यथा क्षित्यादिकं गुणज

वादिनोऽपजयहेतुर्निग्रहस्थानं प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासः हेत्वं
तरमर्थान्तरं निरर्थकं अविज्ञातार्थमपार्थकम् अप्राप्तकालं न्यूनमधिकं पुनरुक्तं अननुभाषणमज्ञा
नमप्रतिभाविक्षेपमतानुज्ञापर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगः अपसिद्धांतः हेत्वाभासाश्च
निग्रस्थानाविशेषः सुभगमम् ॥

॥न्यं कार्यत्वादित्यत्रादृष्टजन्यत्वेन सिद्धसाधनोद्भावने सविषयकेति गुण॰
विशेषणदानं २ स्वोक्तसाध्यविरुद्धहेतुकथनं प्रतिज्ञाविरोधः यथा द्रव्यं गुणभिन्नं रूपादितः पृथक्त्वेनानुपलभ्यत्वादिति ३
स्वोक्तेऽर्थे परेण दूषिते तदपलापः प्रतिज्ञासंन्यासः यथा शब्दो नित्य ऐन्द्रियकत्वादित्युक्ते परेण सामान्ये व्यभिचारमुद्भाव्य दू
षिते स्वोक्तमुपलपति केनोच्यते शब्दो नित्य इति ४ परोक्तदूषणोद्दिधीर्षया पूर्वोक्तहेतुकोटौ विशेषणान्तरोपादानं हेत्वन्त
रं यथा शब्दो नित्यः प्रत्यक्षत्वादित्यत्र सामान्ये व्यभिचारोद्भावने जातिमत्त्वे सतीति विशेषणदानं ५ प्रकृतानुपयुक्ता राम:
र्थकथनमर्थान्तरं यथा नित्यः शब्दः अस्पर्शवत्त्वादिति हेतुः हेतुपदं च हिनोतेस्तुनिप्रत्ययेन निष्पन्नं पदं च सुप्तिङन्त । ५१

मित्यादि ६ अवाचकशब्दप्रयोगो निरर्थकं यथा शब्दो नित्यः जवगडदशत्वादित्यादि ७ परिषत्प्रतिवादिबोधप्रयो
जकपदप्रयोगः अविज्ञातार्थं नच श्लिष्टान्वयमप्रसिद्धार्थकं त्वरितोच्चारितमित्यादिरूपं ८ परस्परानन्विता
र्थकपदसमूहोऽपार्थकं यथा शब्दघटः पटो नित्यमनित्यं च प्रमेयत्वादित्यादि ९ अवयवानां व्युत्क्रमेण कथन
मप्राप्तकालं यथा शब्दत्वाच्छब्दो नित्य मित्यादि १० यत्किंचिदवयवशून्य वयवाभिधानं न्यूनं स्पष्टं
११ अधिकहेत्वादिकथनमधिकं यथा शब्दोऽनित्यः शब्दत्वात् श्रावणत्वाच्चेत्यादि १२ अनुवादं विना कथिता
नस्य पुनः कथनं पुनरुक्तं यथा शब्दो नित्य इत्यादि १३ परिषदा त्रिरभिहितस्याप्यननुवादः अननुभाषणं १४
परिषदा विज्ञातस्य वादिना त्रिरभिहितस्यापि वाक्यार्थस्याबोधः अज्ञानं १५ उत्तरार्हे परोक्ते बुद्ध्यापि उत्तरस्या
स्फूर्ति वशात् तूष्णींभावः अप्रतिभा असंभवत्कालान्तरककार्यव्यासंगमुद्भाव्य कथाविच्छेदो विक्षेपः १७ स्वप
क्षे दोषमनुद्धृत्य परपक्षे दोषाभिधानं मतानुज्ञा १८ उद्भावनार्हपरकीयनिग्रहस्थानानुद्भावनं पर्य्यनुयोज्यो
पेक्षणं १९ निग्रहस्थानरहिते निग्रहस्थानोद्भावनं निरनुयोज्यानुयोगः २० एकसिद्धान्तमतमाश्रित्य कथाप्रव
र्त्तेन तद्विरुद्धसिद्धान्तमतमालंब्योत्तरदानं अपसिद्धान्तः २१ प्रतिज्ञाहान्यननुभाषणाज्ञानाप्रतिभाविक्षेपपर्यनुयो
ज्योपेक्षणानामभावे अन्येषां हेत्वाभासव्यतिरिक्तनिग्रहस्थानानां गुणे हेत्वाभासानां च द्रव्यादिष्वन्तर्भावो यथा
यथं बोध्यः अतिरिक्तः सूत्रार्थः सुगम इत्यभिप्रायेणाह शेषमिति ॥

त॰दी॰ नी॰ पृ॰

नन्वनलसंयोगेसत्यपिमण्यादिसमवधानेदाहोनजायतइति मण्यादेःप्रतिबंधकतावाच्यासाचवह्नौदाहानुकूल
शक्तिस्वीकारएवनिर्वहतिप्रतिबंधकतायाःकार्यानुकूलशक्तिविघटकत्वरूपत्वदन्यथानुपपत्तिसिद्धायाःशक्तेरति
रिक्तत्वात् सप्तैवपदार्थाइत्यसंगतमिति प्राभाकरःशंकतेनन्विति नन्वेवंशक्तिसिद्धावपितस्याअतिरिक्तत्वासि
द्धिरितिचेन्न यतोनतावद्द्रव्यात्मिकाशक्तिः गुणादिवृत्तित्वात् अतएवनगुणकर्मान्यतररूपानचसामान्याद्यन्य
तमरूपाउत्पत्तिविनाशशालित्वात् एवंचातिरिक्तपदार्थत्वसिद्धिरितिननुप्रतिबंधकत्वंनकार्यानुकूलशक्तिवि
घटकत्वंअपितुकारणीभूताभावप्रतियोगित्वंतच्चमण्यभावस्यहेतुत्वादेवोपपद्यते मणिसमवधानदशायांचत
दभावरूपकारणांतराभावादेवदाहानुत्पत्तिसंभवइत्थंचातिरिक्तशक्तिस्वीकारोनुचितइत्याशयेनसमाधत्तेप्रति

ननुकरतलानलसंयोगेसत्यपिप्रतिबंधकेसतिदाहानुपपत्तेःशक्तिःपदार्थांतरमितिचेन्नप्रतिबं
धकाभावस्यकार्यमात्रेकारणत्वेनशक्तेरनुपयोगात्कारणत्वस्यैवशक्तिपदार्थत्वात् ॥ ६ ॥

बंधकाभावस्येति ननुदाहोत्पादेचवह्निःशक्तइतिव्यवहारान्यथानुपपत्त्यासेत्स्यत्यतिरिक्तःशक्तिरित्याशंक्य
तस्याःकारणतारूपत्वेपिव्यवहारोपपत्तेर्नातिरिक्ताशक्तिरित्याह कारणत्वस्येति ननुमण्याद्यभावस्यहेतुत्वे
मणिसमवधानदशायांसत्यप्युत्तेजकेदाहोनस्यात् मन्मतेतुमण्याद्यपसारणदशायामिवोत्तेजकसमवधा
नदशायामपिवह्नौदाहानुकूलशक्त्यंतरोत्पत्तेरंगीकारेणनदोषइतिचेन्न उत्तेजकाभावविशिष्टमण्याद्यभा
वस्यकारणत्वांगीकारेणादोषात् नचोत्तेजकानामननुगतत्वात्तदुत्तेजकाभावकूटविशिष्टमण्याद्यभाव
स्यैवकारणतायाःकल्पनीयतयागौरवमिति वाच्यंदाहानुकूलशक्तिंप्रत्येतादृशकारणतायास्तवाप्यावश्य
कत्वात् अनंतशक्तितत्प्रागभावध्वंसकल्पनेनमहागौरवादितिसंक्षेपः ॥ ६ ॥

नन्वेवमपि कांस्यादेरस्पृश्यवस्तुस्पर्शे सति न भोजनादिरूपकार्यार्हता शक्तिमत्कांस्यादेरेव तदर्हत्वात् अस्पृश्यस्पर्शे सति शक्तेर्नाशात् भस्मसंयोगे पुनः शक्तेरुत्पादनात् तदर्हता एवं च कांस्यादावाधेयशक्तिः स्वीकार्या न च कांस्यादौ भोजनादिकं प्रत्यस्पृश्यस्पर्शस्य प्रतिबंधकत्वकल्पनादेवोपपत्तौ न तदंगीकार इति वाच्यं प्रकृते चास्पृश्यस्पर्शस्यास्पृश्यसंयोगरूपतया तत्विनाशे प्रतिबंधकाभावसद्भावात् कांस्यादावेतराभस्मादिसंयोजनं भोजनाद्यर्हतापत्तेरिति पुनः प्रत्यवतिष्ठते ननु भस्मादिनेति प्रथमेनादिपदेनाम्लादिः द्वितीयेन च ताम्रादेः परिग्रहः कृतध्वंसविशेषणेव कांस्यादेः शुद्धत्वोपपत्तावतिरिक्तशक्त्यंगीकारोनुचित इति समाधत्ते भस्मादिसंयोगेति यत्र कांस्यादौ भस्मादिसंयोगध्वंसानंतरं पुनरस्पृश्यस्पर्शस्तत्रापि भस्मादिसंयोगध्वंसस्य सत्वाच्छुद्ध्यापत्तिरतः सहितांतं ध्वंसविशे

ननु भस्मादिना कांस्यादौ शुद्धिदर्शनादाधेयशक्तिरंगीकार्येति चेन्न भस्मादिसंयोगसमानकालीनाः
स्पृश्यस्पर्शप्रतियोगिकयावदभावसहितभस्मादिसंयोगध्वंसस्य शुद्धिपदार्थत्वात् स्वत्वमपि न पदा
र्थांतरं पर्येष्टविनियोगयोग्यत्वस्य स्वत्वस्वरूपत्वात् तदवच्छेदकं च प्रतिग्रहादिलभ्यत्वमेवेति ॥ ९ ॥

षणं साहित्यं चात्र संबंधविशेषनियंत्रितसामानाधिकरण्यं अस्पृश्यवस्तूनामनंगमकरूपस्य दुर्वचनतया सामान्यधर्मावच्छिन्नाभावनिवेशासंभवात् यत्किंचिदस्पृश्यस्पर्शाभावस्य च तत्र सत्वात्तदापत्तिस्तदवस्थैव वेत्यतो यावदिति तथा च तत्र यावतां तत्तदस्पृश्यस्पर्शाभावानां निरवच्छिन्नविशेषणतासंबंधेनासत्वान्नोक्तदोष इति भावः यत्र च भस्मादिसंयोगास्पृश्यवस्तुसंस्पर्शौ युगपदेवोत्पन्नौ विनष्टौ च तत्तदस्पृश्यस्पर्शाभावकूटसामानाधिकरण्यविशिष्टभस्मादिसंयोगध्वंसमादाय शुद्धतापत्तिरतो भस्मादिसंयोगकालावच्छेदेन तत्र विद्यमानार्थकं कालीनांतमभावविशेषणं तथा च तत्र भस्मादिसंयोगक्षणावच्छेदेन तत्र विद्यमानार्थकं कालीनांतमभावविशेषणं तथा च तत्र भस्मादिसंयोगक्षणावच्छेदेन यावत्तत्तदभावानामसत्वान्न दोष इति भावः चैत्रस्येदं धनमित्या

सर्वेषां पदार्थानामुक्तपदार्थेषु यथायथमंतर्भावं निरूप्य मूलन्यूनतां परिहर्त्तुं विधिं निरूपयिष्यमाणः शिष्यावधा
नायतन्निरूपणं प्रतिजानीते अथेति स्वपरमतसाधारणं विधित्वं तावन्निर्वक्ति प्रयत्नेति प्रयत्नजनिकाया चिकी
र्षा तज्जनकं यज्ज्ञानं तद्विषय इत्यर्थः गुरुमते कृतिसाध्यताज्ञानस्य स्वमते च कृतिसाध्यत्वविशिष्टेष्टसाध
नस्य चिकीर्षाद्वारा प्रयत्नजनकत्वात् तन्मते च कृतिसाध्यत्वे स्वमते च कृतिसाध्यत्वविशिष्टेष्टसाधनत्वे लक्षणसंगतिः
अभिधायकस्य विधिमताभिप्रायेणाह तत्रेति तादृशज्ञानविषयकार्यत्वादिप्रतिपादकलिङादिरित्यर्थः लिङा
दीत्यादिना लोट्तव्यादिसंग्रहः वाकारेणास्यायां गुरुमतमाशंकते कृत्यसाध्य इति कृत्यसाध्यत्वेनावगत इत्यर्थः प्र

अथ विधिर्निरूप्यते प्रयत्नजनकचिकीर्षाजनकज्ञानविषयो विधिः तत्प्रतिपादको लिङादिर्वा
कृत्यसाध्ये प्रवृत्त्यदर्शनात्कृतिसाध्ये प्रवृत्तिदर्शनात्कृतिसाध्यज्ञानं प्रवर्त्तकं न च विषभक्षणादौ प्र
वृत्तिप्रसंगः इष्टसाधनतालिंगककृतिसाध्यताज्ञानस्य काम्यस्थले विहितकालजीवित्वनिमित्तज्ञा
नजन्यस्य नित्यनैमित्तिकस्थले प्रवर्त्तकत्वात् न चाननुगमः स्वविशेषणवत्ताप्रतिसंधानजन्यत्वस्यानु

वर्त्तकमिति चिकीर्षाद्वारा प्रवृत्तिजनकमित्यर्थः न च कृत्यसाध्यत्वज्ञानाभाव एव प्रवर्त्तकोस्त्विति शंक्यं कृत्यसाध्य
त्वज्ञानाभावत्वेन तत्त्वे गौरवात् कृतिसाध्यत्वाभावकृतिसाध्यभेद तत्तद्व्याप्त्यादिदर्शनानां प्रवृत्तौ प्रतिबंधकत्व
कल्पनेन महागौरवाच्चेति दिक् ननु विषभक्षणादौ प्रवृत्त्यापत्तिः कृतिसाध्यताज्ञानस्य तत्रापि सत्वादित्याशंकां नि
राचष्टे न चेत्यादिना इष्टसाधनतालिंगकेति अयं मत्कृतिसाध्यः मत्कृतिं विना अनुपपद्यमानत्वे सतीष्टसाधनत्वादि
त्यानुमानिकेत्यर्थः काम्यस्थल इति प्रवर्त्तकत्वादित्यनेनान्वयः ज्योतिष्टोमयागादावित्यर्थः विहितकालेत्यादि वि
हितकालशुचिजीवित्वज्ञानाधीनस्य कृतिसाध्यताज्ञानस्य नित्ये संध्यावंदनादौ आशौचादिरूपनिमित्तज्ञानाधी



Digitized by Google

न्यत्वमवसेयं अननुगमइति प्रवृत्तिसामान्यप्रयोजकस्यैकस्याभावात् इति भावः स्वविशेषणवत्तेत्यादि स्वंप्र
स्त वर्त्तमानः पुरुषस्य विशेषणं तन्निष्ठो धर्मः कामनादिस्तद्रूपायाः स्वविषयसाधनत्वादिरूपस्य तत्संबंधस्य प्रति।
संधानं ज्ञानं तज्जन्यत्वस्येत्यर्थः लाघवेनेति कारणतावच्छेदकलाघवेनेत्यर्थः तन्मते कारणतावच्छेदकस्य जन्यत्वा
दिघटितत्वाद्गौरवमिति भावः कृतिसाध्येष्टसाधनतेति अत्र बलवदनिष्टाननुबंधित्वमप्यंतर्भावनीयं तेः

तत्र लाघवेन कृतिसाध्येष्टसाधनताज्ञानस्यैव चिकीर्षाद्वारा प्रयत्नजनकत्वात् नच नित्ये
इष्टसाधनत्वाभावादप्रवृत्तिप्रसंगः तत्रापि प्रत्यवायपरिहारस्य पापक्षयस्य च फलत्व
कल्पनात् तस्मात्कृतिसाध्येष्टसाधनत्वमेव लिङाद्यर्थः ॥ ९ ॥

नकृतिसाध्यत्वेन तृप्तिरूपेष्टसाधनत्वेन चावगते विषसंपृक्ते भोजनादौ न प्रवृत्त्यापत्तिः विशिष्टज्ञानत्वाव
च्छिन्नस्य कारणत्वकथनं तु प्राचां मतेन नव्यमते कृतिसाध्यत्वादिज्ञानानां पृथगेव दंडचक्रादिन्यायेन का
रणत्वात् प्रयत्नेति प्रवृत्तीत्यर्थः प्रत्यवायेति प्रत्यवायस्य परिहारः प्रागभावस्तस्य च दुःखजनकाभावत
त्व यातन्नाशस्यैवेष्टत्वेन फलमिति भावः नच कथं प्रागभावस्य फलत्वं तस्याजन्यत्वादिति वाच्यं यत्सत्वे यत् स
त्वमिति व्यवहारलभ्यस्य रूपसंबंधरूपस्य संध्यावंधनप्रयोजनत्वस्य तत्र सत्वेन फलत्वाक्षतेरित्यवसेयम्
त्व

Digitized by Google

नन्वि.लिङ्गादेः कार्य एव शक्तिरिति गुरुमतमाशंकते नन्विति इष्टविशेषरूपस्य यागस्याशुतरविनाशिनः स्वर्गसाधन
त्वेन भानं न संभवति अयोग्यत्वादित्यपूर्वरूप एव कार्ये शक्तिरंगीकार्येत्याह यागस्येति आशुतरविनाशिनः इती
यक्षणवृत्तिध्वंसप्रतियोगिनः स्थापिफलपर्यंतस्थायि अन्वयप्रकारं दर्शयति कार्यं कृतिसाध्यमिति यागे कृति
साध्यत्वं साक्षात् अपूर्वं तु यागद्वारेति बोध्यम् कार्यबोद्धेति इदं मत्कृतिसाध्यमिति ज्ञानवानित्यर्थः विध्यर्थ
मुख्यविशेष्यकं शाब्दबोधं दर्शयति तेनेति स्वर्गकामस्य लिङर्थे कार्ये तदेकदेशे च यागस्यान्वयेनेत्यर्थः न्या

नन्वि ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र लिङा स्वर्गसाधनकार्यं प्रतीयते यागस्याशुतरविनाशिनः काला
तरभावि स्वर्गसाधनत्वायोगात् योग्यं स्थायि कार्यमपूर्वमेव लिङर्थः कार्यं कृतिसाध्येष्टं तेः सविष
यत्वाद्विषयाकांक्षायां यागो विषयत्वेनान्वेति कस्य कार्यमिति नियोज्याकांक्षायां स्वर्गकामपदं नियो
ज्यपरत्वेनान्वेति कार्यबोद्धा नियोज्यः तेन ज्योतिष्टोमनामकयागविषयं स्वर्गकामस्य कार्यमिति वाक्या
र्थः संपद्यते वैदिकलिङ्त्वात् यावज्जीवमग्निहोत्रं जुहुयादिति नित्यवाक्येप्यपूर्वमेव वाच्यम्
कल्प्यते आरोग्यकामो भेषजयानं कुर्यादिति लौकिके लिङः क्रियाकार्ये लक्षणा ॥ ॥ यमतेनुतत्र कृतिसा
ध्यवलवदनिष्टाजनकेष्टसाधन यागानुकूलकृतिमान् स्वर्गकाम इति वाक्यार्थबोधः नन्वपूर्वस्यपू
र्वमनुपस्थितत्वात्कथं तत्र शक्तिग्रह इति चेद तद्धर्मावच्छिन्नविषयकशाब्दबोधप्रतिप्रवदं त्वभिज्ञाः न
न्मतेन तद्धर्मावच्छिन्नविषयकशक्तिग्रहस्य नादृशोपस्थिते श्च हेतुतानानुसमानविषयकत्वेन हेतुहे
तुमद्भावः एवं च कार्यत्वावच्छिन्ने यत्र कुत्रचिच्छक्तिग्रहः योग्यतावलाच्चपूर्वरूपकार्यस्य शाब्द
बोधे भानं न हि यागविषयकमन्यत्कार्यं संभवतीति ननु नित्ये फलाभावात्कथं तत्रापूर्वबोधकत्वं

न्या.मः
५७

लौकिकालौकिकसाधारण्येन कार्यत्वादावेव लिङादेः शक्तिरंगीकार्येत्याशयेन समाधत्ते यागस्येति अयोग्यत्वा-
त् यागस्य स्वर्गसाधनत्वेन भानं न संभवतीत्युक्तदोषं निराचष्टे अयोग्यतेति अयोग्यतासंशयसत्त्वेपि तस्याविघटक-
त्वात् शाब्दबोधो भवत्येवेति भावः वाक्यादिष्टसाधनत्वे यागेऽवगते तस्याशुतरविनाशिनो व्यापारं विना फलज-
नकत्वासंभवात् तन्निर्वाहायापूर्वं कल्प्यत इत्याह तन्निर्वाहार्थमिति ननु यागध्वंसस्यैव व्यापारत्वमस्तु किमपूर्व-
कल्पनेनेत्यत आह कीर्त्तनादिनेति आदिना कर्मनाशानलस्पर्शात्करतोयाविलंघनात् गंडकीबाहुतरणा-
द्धर्मः क्षरति कीर्तनादित्यत्रोक्तकर्मनाशाजलस्पर्शादिपरिग्रहः ध्वंसस्य व्यापारत्वे स्वर्गधारयतिरित्यपि

इति चेन्न यागस्याप्ययोग्यतानिश्चयाभावेन साधनतया प्रत्ययनंतरं तन्निर्वाहार्थं अवांतरव्यापारत-
याऽपूर्वकल्पनात् कीर्त्तनादिना नाशश्रुतेन यागध्वंसो व्यापारः लोकव्युत्पत्तिबलात् क्रियायामेव कृति-
साध्येष्टसाधनत्वलिङ्बोध्यत इति लिङ्त्वेन विध्यर्थकत्वं आख्यातत्वेन यत्नार्थकत्वम् किं क-
रोतीति प्रश्ने पचतीत्युत्तरादाख्यातस्य प्रयत्नार्थकत्वनिश्चयात् ॥ २९ दूषणं विभावनीयं लोकव्युत्प-

त्तीति लोकव्यवहारेत्यर्थः स च यो यत्र प्रवर्त्तते सः कृतिसाध्यत्वेनेष्टसाधनत्वेन च तज्जानातीत्येवंरूपः केचित्तु
यदिच्छया यत्र प्रवृत्तिस्तत्तत्साधनमिति रूपो लोकव्यवहार इत्याहुः नव्याः पुनः लोके पचेतेत्यादि लिङादि-
समभिव्याहारस्थले क्रियायामेव कृतिसाध्यत्वविशिष्टेष्टसाधनत्वबोध इति नियमबलादित्यर्थः सर्वत्रेति
शेष इति व्याचख्युः आख्यातत्वेनेति न च संकेतसंबंधेनाख्यातपदवत्त्वं तिङादिकमेव शक्ततावच्छेदकमि-
ति नु नव्याः यत्नार्थकत्वं कृतित्वावच्छिन्नवाचकत्वं किं करोतीति कृतित्वावच्छिन्नजिज्ञासितसंबंधकं हि
तत्प्रश्नवाक्यं उत्तरवाक्यस्य कृतित्वावच्छिन्नपाकसंबंधबोधकत्व एव तन्निवर्त्तकत्वं नान्यथेति भावः

ननु रथो गच्छतीत्यादावाख्यातस्य कृतिबोधकत्वासंभवात्तदनुरोधेन व्यापार एव शक्तिर्वक्तव्येत्यत आह रथो गच्छतीत्यादा
विति व्यापारेऽनुकूलत्वोत्कीर्त्तनं तु तेन संबंधेन व्यापारे गमनस्यान्वयलाभाय नव्याः पुनः गच्छतीत्याख्यातस्य जानाती
त्यादाविवाश्रयत्वे निरूढलक्षणा न चाश्रयतासंबंधेनैव प्रथमांतार्थे गमनादेरन्वयेन निर्वाहे आश्रयत्वे निरूढल
क्षणाकल्पनं निरर्थकमिति वाच्यं नामार्थयोरिव धात्वर्थयोरभेदातिरिक्तसंबंधेनान्वयस्याव्युत्पन्नत्वात् तत्र तथा
न्वयासंभवात् स्तोकं पचतीत्यादौ स्तोकादेर्धात्वर्थे पाकेऽन्वयादभेदातिरिक्तेति ध्येयम् वैयाकरणमतं निराचष्टे
देवदत्त इति नाख्यातार्थत्वमिति आख्यातस्य कर्त्रादौ शक्तिस्वीकारेऽनंतत्वादेः शक्यतावच्छेदकत्वमंगीकर्त्तव्यं कृ
त्यादौ शक्तिस्वीकारे तु कृतित्वादिजातेः शक्यतावच्छेदकत्वाल्लाघवमिति भावः तद्गतैकत्वादीनामेवेति आख्याता

रथो गच्छतीत्यादावनुकूलव्यापारे लक्षणा देवदत्तः पचति देवदत्तेन पच्यते तंडुल इत्यादौ कर्तृक
र्मणोर्नाख्यातार्थत्वं किंतु तद्गतैकत्वादीनामेव तयोराक्षेपादेव लाभः प्रजयतीत्यादौ धातोरेव प्रक
र्षे शक्तिः उपसर्गाणां द्योतकत्वमेव न तु तत्र शक्तिरस्ति ॥ ॥ र्थत्वमिति पूर्वेणान्वयः आदिना कृत्यादिप
रिग्रहः ननु तर्हि कर्त्तृकर्मणोः कथं लाभ इत्यत आह तयोरिति आक्षेपादेवेति परमतेन स्वमते तु प्रथमांतपदेनैव
तल्लाभाद्देवदत्तस्तंदुलं पचतीत्यत्र तंदुलकर्मकपाकानुकूलकृतिमान्देवदत्त इत्यन्वयबोधः देवदत्तेन पच्यते
तंदुल इत्यत्र तु देवदत्तसमवेतकृतिजन्यपाककर्मीभूततंदुल इति शाब्दबोधः न च देवदत्तः पचतीत्यत्र तृतीया
तंदुलः पच्यत इत्यत्र च द्वितीया स्यात् तत्र कर्तृकर्मणोराख्यातेनानादिति वाच्यम् अनभिहिते कर्त्तृत्वे तृतीया
याः तादृश्ये च कर्मत्वे द्वितीयायाः विधानेनादोषादिति ध्येयं उपसर्गाणां वाचकत्वमतं निरस्यति प्रजयतीत्यादा
विति ननु धातुनैव प्रकर्षादेर्बोधे प्रशब्दादेर्वैयर्थ्यमत आह उपसर्गाणामिति द्योतकत्वं तात्पर्यग्राहकत्वं एतेने

प्रेक्षावत्प्रवृत्तये सकलकामनाविषयमुक्तिप्रयोजनकतां ग्रंथस्य दर्शयति पदार्थज्ञानस्येति पदार्थतत्वज्ञानस्येत्यर्थः अन्येषामवांतरप्रयोजनानामपि सद्भावादाह परमेति श्रुतेरयमर्थः अरे मुमुक्षुणा आत्मा द्रष्टव्यः मुमुक्षोरात्मदर्शनमिष्टसाधनमिति यावत् आत्मदर्शनोपायं दर्शयति श्रोतव्य इत्यादि तेनार्थक्रमेण शाब्दक्रमस्त्यक्तो भवति अग्निहोत्रं जुहोति यवागूं पचतीत्यादिवत् असंभावनानिवृत्तेरिति अप्रामाण्यज्ञाननिवृत्तेरित्यर्थः युक्त्यनुसंधानेति अयं भावः युक्तिभिरनुचिंतनं मननं तच्चात्मन इतरभिन्नत्वेनानुमानं तच्च भेदप्रतियोगीतरज्ञानसाध्यं तदर्थं सकलपदार्थनिरूपण

पदार्थज्ञानस्य परमप्रयोजनं मोक्षः तथाहि आत्मा वारे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुत्या श्रवणादीनां तत्वसाक्षात्कारे हेतुत्वबोधनात् श्रुत्या देहादिविलक्षणात्मज्ञाने सत्यप्यसंभावनानिवृत्तेः युक्त्यनुसंधानरूपमननसाध्यत्वात् मननोपयोगिपदार्थनिरूपणद्वारा शास्त्रस्यापि मोक्षोपयोगित्वं तदनंतरं श्रुत्योपदिष्टयोगविधिना निदिध्यासने कृते तदनंतरं देहादिविलक्षणात्मसाक्षात्कारे सति देहादावहमभिमानरूपमिथ्याज्ञाननाशे सति दोषाभावात् प्रवृत्त्यभावे धर्माधर्मयोरभावात् जन्माभावे पूर्वधर्माधर्मयोरनुभवेन नाशे चरमदुःखध्वंसरूपो मोक्षो जायते ज्ञानमेव मोक्षसाधनं मिथ्याज्ञाननिवृत्तेः ज्ञानमात्रसाध्यत्वात् तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति साधनांतरनिषेधाच्च ॥ ॥मिति मोक्षोपयोगित्वं विशदयति तदनंतरमिति मननानंतरमित्यर्थः श्रुतस्यार्थस्य नैरंतर्येणानुसंधानरूपनिदिध्यासनस्योपायमाह योगविधिनेति इंद्रियाणि विषयेभ्यः प्रत्याहृत्य इंद्रियेभ्यः मनः प्रत्याहृत्य साक्षात्कर्तव्ये वस्तुनि मनःप्रणिधानं योगस्तदनंतरं निदिध्यासनानंतरं मिथ्याज्ञाननाशे वासनासहितमिथ्याज्ञाननाशे दोषः रागादि एवकारेण कर्मव्यवच्छेदः मिथ्याज्ञानेति शुक्त्यादौ रजतभ्रमो विशेषदर्शनेनैव यथा निवर्तते तथा प्रकृतेपीति भावः

त॰दी॰ कैवल्यंलभतेनरइत्यादिना श्रीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरइत्यादिश्रुतेः ज्ञानाग्निः सर्वकर्माणिभस्म

नी॰ सात्कुरुतेतथा इत्यादिस्मृतेश्चसंग्रहः ज्ञानद्वारेवेति अत्रायंक्रमः निष्कामतयाभगवत्प्रीत्यर्थंकृतैः कर्मभि

५६ र्दुरितक्षयरूपात्मशुद्धिर्भवति ततोविषयेषुवैराग्यंततः श्रवणादौप्रवृत्तिः ततः श्रवणादिक्रमेणतत्त्वज्ञानो

त्पत्तौपूर्वोक्तमिथ्याज्ञाननाशादिक्रमेणमोक्षनिष्पत्तिः अधिकमस्मदीयाभिनवचिंतामणिव्याख्यायामनु

ननुतत्प्राप्तिहेतुर्विज्ञानंकर्मचोक्तंमहामुनेइतिकर्मणोपिमोक्षसाधनत्वश्रवणात् ज्ञानकर्मणोः समुच्चयइतिचेन्ननित्यनैमित्तिकैरेवकुर्वाणोदुरितक्षयं ज्ञानंचविमलीकुर्वन्नभ्यासेनचपाचये

कणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये अन्नंभट्टेनविदु
षारचितस्तर्कसंग्रहः १ इतितर्कसंग्रहःसमाप्तः॥ ९ ॥

त॰ अभ्यासात्पक्वविज्ञानंकैवल्यंलभतेनरइत्यादिनाकर्मणोज्ञानसाधनत्वप्रतिपादनात् ज्ञानद्वारैवकर्ममोक्षसाधनंनसाक्षात्तस्मात्पदार्थज्ञानस्यमोक्षःपरमप्रयोजनमित्येवरमणीयमिति

इतिश्रीमदन्नंभट्टोपाध्यायविरचितातर्कदीपिकासमाप्ता॥ ९ ॥

संधेयंतर्ककर्कशविचारचातुरीधुरीणैरितिकौंडिन्यगोत्रसंभूतोनीलकंठाख्यपंडितः कृतिमर्पिप
दितस्मैचंद्रचूडायमंगलं॥ ७॥ इतिश्रीमत्पार्णेवंशाप्ययः पाणवापरकाचंद्रायमानपदवाक्यप्रमाण राम:
पारावारीणश्रीरामभट्टतनूजश्रीनीलकंठभट्टविदुषाविरचितस्तर्कसंग्रहदीपिकाप्रकाशः ५६

Digitized by Google

॥ इतिदीपिकानीलकण्ठीसहितस्त ॥
॥ र्कसङ्ग्रहश्छात्रोपकारकस्समाप्तः ॥

Digitized by Google